## ॥ इति शुक्लयजुर्वेदीयवैदिकवास्तुशान्तिप्रयोगः ॥

### ॥ अथ पुण्याहवाचनप्रयोगः ॥

स्वपुरतः शुद्धायां भूमौ पञ्चवर्णैस्तन्दुलैर्वाष्टदलं कर्तव्यम् ॥ तत्र भूमिं स्पृष्ट्वा—ॐमहीद्यौः पृथिवीचनऽइमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ $\frac{३२}{८}$ ॥ तत्र यवप्रक्षेपः—ॐओषधयः समवदन्तसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तᳪराजन्पारयामसि ॥ $\frac{९६}{१२}$ ॥ अष्टदलोपरि कलशस्थापनम्—ॐआजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥ $\frac{४२}{८}$ ॥ कलशे जलपूरणम्—ॐवरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदं-

१ पुण्याहवाचनसूत्रम्—अथ पुण्याहवाचनमृद्धिपूर्तेष्वृद्धिर्विवाहान्तापत्यसंस्काराः प्रतिष्ठोद्यापनादि पूर्तं तत्कर्मणश्चाद्यन्तयोः कुर्याच्छुचिः स्वलंकृतो वाचयिता तथाभूते सद्मनि मङ्गलसंभारान्संभृत्यब्राह्मणान्प्रशस्तांल्लक्षणसंपन्नान्गन्धादिभिरभ्यर्च्यदक्षिणयातोषयेदथतेप्राङ्मुखाः प्रसन्नादर्भपाणयस्तिष्ठेयुर्दक्षिणतोवाचयितोदङ्मुखः संस्कार्यावाचयितुर्दक्षिणंपार्श्वमभितिष्ठेयुरथवाचयितादर्भपाणिरपांपूर्णं कुंभंस्वर्चितंसपल्लवमुखंधृत्वा तिष्ठन्समाहितोमनःसमाधीयतामितिब्राह्मणान्ब्रूयात्समाहितमनसःस्मः इतिप्रतिब्रूयुः प्रसीदन्तुभवन्तइतिवाचयिता प्रसन्नाः स्मइतीतरेसर्वेसंहत्य शांतिः पुष्टिस्तुष्टिर्वृद्धिरविघ्नमायुष्यमारोग्यं स्वस्ति शिवं कर्मकर्मसमृद्धिर्धर्मसमृद्धिः पुत्रसमृद्धिर्वेदसमृद्धिः शास्त्रसमृद्धिर्धनधान्यसमृद्धिरिष्टसंपदित्यंतानि पंचदशास्तवन्तानि वाक्यान्युक्त्वातन्नाम्नाकर्मदेवताः प्रीयन्तामिति ब्रूयुरथवाचयितापूर्वंतत्तल्लिङ्गमंत्रान्पठित्वा त्रिस्त्रिर्मन्द्रमध्योच्चस्वरैरोंपुण्याहं भवन्तो ब्रुवन्त्वोङ्कल्याणं भवन्तोब्रुवन्त्वोंस्वस्तिभवन्तोब्रुवन्त्वोमृद्धिंभवन्तोब्रुवन्त्वितिब्रूयात्तेपितथाप्रत्येकंप्रतिब्रूयुरोमृद्ध्यतामित्यृद्धौब्रूयुरथप्राङ्मुखमासीनंसामात्यंकर्तारंब्राह्मणाःसपल्लवदर्भपाणयःशान्तिपवित्रलिङ्गाभिर्ऋग्भिः सिंचेयुः पुरंध्र्यो नीराजनादिमंगलानि कुर्वन्ति ॥ अन्यच्च—पुण्येऽहनि तु संप्राप्ते विवाहे चौलके तथा । व्रतबन्धे च यज्ञादौ तथा च दानकर्मणि ॥ गृहारंभे धनप्राप्तौ तीर्थाभिगमने तथा । नवग्रहमखे शान्तावद्भुतेषु तथैव च ॥ गृहप्रवेशने चैव ग्रामस्याभिनिवेशने । गजबन्धे तुरंगाणां दासादीनां च संग्रहे ॥ अन्यस्मिन्नपि सर्वस्मिञ्छुभे कर्मणि चोदिते । वाचनीया द्विजाः सर्वे वेदशास्त्रपरायणाः ॥ इति विधानरत्नमालायाम् ॥ अपरं च—संपूज्य गन्धमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् । धर्मकर्मणि माङ्गल्ये संग्रामाद्भुतदर्शने ॥ इति व्यासः ॥ एतदेव निरोङ्कारं कुर्यात्क्षत्रियवैश्ययोरितिदानखण्डवचनाद्ब्राह्मणस्यओंकारपूर्वकं क्षत्रियवैश्ययोर्निरोङ्कारं शूद्रस्य स्वस्तिमात्रम् ॥२॥ कलशस्थापनं कार्यं कमलेऽष्टदलेऽमले ॥ इति परशुरामः ॥३॥ क्रमेण कलशं स्थाप्य पूर्णपात्रं च सर्वशः । वरुणं तत्र संपूज्य गङ्गाद्यावाहनादिकम् ॥ स्वर्णं वा राजतं वापि ताम्रमृन्मयजं तु वा । अकालमव्रणं चैव सर्वलक्षणसंयुतम् ॥ पंचाशांगुलवैपुल्यमुत्सेधे षोडशाङ्गुलम् । द्वादशाङ्गुलकं मूलं मुखमष्टाङ्गुलं तथा ॥ इति ॥

नमसिवरुणस्यऽऋतसदनमासीद ॥ ३६/७ ॥ गन्धप्रक्षेपः—ॐत्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥ ९८/१२ ॥ धान्यप्रक्षेपः—ॐधान्यमसिधिनुहिदेवान्प्राणायत्त्वोदानायत्वा व्यानायत्वा ॥ दीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥ २०/१ ॥ सर्वौषधीप्रक्षेपः—ॐयाऽओषधीः पूर्वाजाता-देवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहःशतन्धामानिसप्तच ॥ ७५/१२ ॥ दूर्वाप्रक्षेपः—ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानो-दूर्वेप्रतनुसहस्रेणशतेनच ॥ २०/१३ ॥ पञ्चपल्लवप्रक्षेपः—ॐअश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ७९/१२ ॥ सप्तमृद्प्रक्षेपः—ॐस्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥ १३/३६ ॥ फलप्रक्षेपः—ॐयाः फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ ८९/१२ ॥ पञ्चरत्नप्रक्षेपः—ॐपरिवाजपतिः कविरग्निर्हव्यान्यक्रमीत ॥ दधद्रत्नानिदाशुषे ॥ २५/११ ॥ हिरण्यप्रक्षेपः—ॐहिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषा विधेम ॥ ४/१३ ॥ रक्तसूत्रेण वस्त्रेण च वेष्टयेत्—ॐयुवासुवासाः परिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ तन्धीरासःकवयउन्नयन्तिस्वाध्यो-मनसादेवयन्तः ॥ पा०गृ०का०२कं०२मं०९ ॥ पूर्णपात्रमुपरिन्यसेत्—ॐपूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्नेववविक्रीणावहाऽइषमूर्ज्जꣳशतक्रतो ॥ ४९/३ ॥ वरुणमावाहयेत्—ॐतत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणोदेवता वरुणावाहने विनियोगः। ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुः प्रमोषीः ॥ ४९/१८ ॥ ॐभूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि स्थापयामि ॥ प्रतिष्ठापनम्—ॐमनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳस- ॥ ७ ॥

१ केचन सूत्रवेष्टने—ॐसुजातोज्ज्योतिषासहशर्म्मवरूथमासदत्स्वः ॥ वासोऽअग्नेविश्वरूपꣳसंव्ययस्वविभावसो ॥ ४०/११ ॥ इति मन्त्रं वा पठन्ति ॥ २ ॥ धातुजं मृन्मयं वापि कलशं यत्प्रतिष्ठितम् । तद्वत्प्रादेशदीर्घं च चतुरङ्गुलमुच्छ्रितम् ॥ सिततन्दुलपूर्णं च पूर्णपात्रं प्रकीर्तितम् ॥

मिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोꣳम्प्रतिष्ठ ॥ १३/२ ॥ ॐवरुणाय नमः सुप्रतिष्ठितो वरदो भव ॥ ॐभूर्भुवः स्वः वरुणाय नमः चन्दनं समर्पयामि ॥ इत्यादिपञ्चोपचारैः संपूज्य तत्त्वायामीति पुष्पाञ्जलिं समर्प्य अनेन पूजनेन वरुणः प्रीयताम् ॥ ततः अनामिकया कलशं स्पृष्ट्वा अभिमंत्रयेत्—कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूलेतत्रस्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरीतथा ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥ ततः गायत्र्यादिभ्यो नमः इत्यनेन पञ्चोपचारैरभ्यर्च्य कलशं प्रार्थयेत्—देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति भूतानि यतः कामफलप्रदाः । त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय । सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥ ततः स्वस्तिवाचनार्थं युग्मविप्रान्संपूज्य ॥ अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेनपाणिना स्वर्णपूर्णकलशं धारयित्वा वदेत्—ॐत्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः ॥ अतोधर्म्माणिधारयन् ॥ ४३/३४ ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥ विप्रा वदेयुः—तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ पुनः—ॐत्रीणितऽआहुर्द्दिविबन्धनानित्रीण्यप्सुत्रीण्यन्तः समुद्रे ॥ उतेवमेवरुणश्छन्त्स्यर्वन्यत्रातऽआहुः परमञ्जनित्रम् ॥ १५/२९ ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायु-

१ स्पृशन्नवनामिकाग्रेण क्वचिदालोकयन्नपि । अनुमन्त्रणं सर्वत्र सदैवमभिमन्त्रयेत् ॥

रस्तु ॥ पुनः-ॐत्रयादेवाऽएकादशत्रयास्त्रिंऽशाऽसुराधसऽ ॥ बृहस्पतिंपुरोहितादेवस्यसवितुऽसवे ॥ देवादेवैरवन्तुमा ॥ ११/२० ॥ तेनायुः-प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु॥अपा मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्॥ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु ताः॥ ब्राह्मणानां हस्ते सुप्रोक्षितमस्तु शिवा आपः सन्तु सन्तु शिवा आपः॥सौमनस्यमस्तु अस्तु सौमनस्यम् ॥+अक्षतं चारिष्टं चास्तु अस्त्वक्षतमरिष्टं च ॥ गन्धाः पान्तु सौमङ्गल्यं चास्त्विति भवन्तो ब्रुवन्तु ॥ गन्धाः पान्तु सौमङ्गल्यं चास्तु॥ अक्षताः पान्तु आयुष्यमस्त्विति भवन्तो ब्रुवन्तु ॥ ॐअक्षताः पान्तु आयुष्यमस्तु ॥ पुष्पाणि पान्तु सौश्रियमस्त्विति भवन्तो ब्रुवन्तु ॥ ॐपुष्पाणि पान्तु सौश्रियमस्तु ॥ ताम्बूलानि पान्तु ऐश्वर्यमस्त्विति भवन्तो ब्रुवन्तु ॥ ॐताम्बूलानि पान्तु ऐश्वर्यमस्तु ॥ पूगीफलानि पान्तु बहुफलमस्त्विति भवन्तो ब्रुवन्तु ॥ ॐपूगीफलानि पान्तु बहुफलमस्तु ॥ दक्षिणाः पान्तु बहुदेयं चास्त्विति भवन्तो ब्रुवन्तु ॥ ॐदक्षिणाः पान्तु बहुदेयं चास्तु ॥ ॐदीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रञ्चास्त्विति भवन्तो ब्रुवन्तु ॥ ब्राह्मणा वेदयुः-ॐदीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिःश्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचास्तु॥ यजमानो वदेत्—यत्कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्त्तन्ते तमहमोङ्कारमादिङ्कृत्वा ऋग्यजुःसामाथर्वणाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ॥ ॐवाच्यताम् ॥ अथाशीर्वादः ॥ ब्राह्मणानां हस्तेष्वक्षतान्दद्यात् ॥ यजुः—ॐभद्रङ्कर्णेभिऽशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राऽ ॥ स्थिरैरङ्गैस्तुष्टुवाᳪसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ॥ २१/२५ ॥ ॐदेवानाम्भद्रासुमतिर्ऋजूयतान्देवानाᳪरातिरभिनोनिवर्त्तताम् ॥ देवानाᳪसख्यमुपसेदिमावयन्देवानऽआयुऽप्रतिरन्तुजीवसे ॥ १५/२५ ॥ ॐदीर्घायुस्तऽओषधेखनितायस्मैचत्त्वाखनाम्म्यहम् ॥ अथोत्त्वन्दीर्घायुर्भूत्वाशतवल्शाविरोहतात् ॥ १००/१२ । ॐऋक्—द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत् ॥ द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः ॥ अष्टक १ ४/७ ॥ यजुः ॐद्रविणोदाऽपिपीपतिजुहोतप्रचतिष्ठत ॥

नष्टाद्दतुभिरिष्यत ॥ २२/२६ ॥ साम—ॐदेवो ३ वो ३ द्रविणोदाः । पूर्णांविवष्ट्वासिचं । उद्वा १ सिंचा २ । ध्वमुपवापृणध्वं । आदिद्वोदे २ । वओहते । ईडा २ ३ भा ३ ४ ३ । ओ २ ३ ४ ५ ई । डा ॥ वेयगानस्य द्वितीयप्रपाठकस्य प्रथमार्द्धे साम २४ ॥ अथर्वणः—ॐधातारातिःसवितेदंजुषंताम्प्रजापतिर्निधिपतिर्नोअग्निः ॥त्वष्टाविष्णुःप्रजयासंरराणोयजमानायद्रविणंदधातु का०७अ०२सू०१७मं०४ ऋक्—ॐसवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ ७ ११/८ ॥ यजुः—सवितात्त्वासवानाᳪसुवतामग्निर्गृहपतीनाᳪसोमोवनस्पतीनाम् ॥ बृहस्पतिर्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्रऽपशुभ्योमित्रऽसत्योवरुणोधर्म्मपतीनाम् ॥ ३९/९ ॥ साम—ॐऊर्द्ध्वऊषुणा ३ ऊता २ ३ ४ याई । तिष्ठादेवोनसविता । ऊर्द्ध्वोवा २ ३ जा । स्यासनिता यादंजिभीः । वाघाद्भीरः । वीवी २ । ह्वयामा २ ३ हा ३ ४ ३ ई । उं २ ३ ४ ५ ई । डां ॥ वेयगानस्य द्वितीयप्रपाठकस्य प्रथमार्द्धे साम २६ ॥ अथवणः—ॐअभयंद्यावापृथिवीइहास्तुनोभयंसोमःसवितानःकृणोतु॥अभयन्नोस्तूर्वाऽन्तरिक्षंसप्तऋषीणांचहविषाभयन्नोऽस्तु का०६अ०४सू०४०मं०१॥६ १/२० ॥ ऋक्—ॐनवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रं ॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः ॥ ८ २३/३ ॥ यजुः—ॐनतद्रक्षाᳪसिनपिशाचास्तरन्तिदेवानामोजःप्रथमजᳪह्येतत् ॥ योबिभर्तिदाक्षायणᳪहिरण्यᳪसदेवेषुकृणुतेदीर्घमायुऽसमनुष्येषुकृणुतेदीर्घमायुः ॥ ५१/३४ ॥ साम—चंद्रमाआउवा । प्सुवान्ताराउवा । सुपर्णो धाउवा । वतेदिवि । न वोहिराउवा । ण्यनाइमायाउवा । पदंविंदाउवा । तिविद्युताः । वित्तंमाआउवा । स्यरोदा २ ३ सा ३ ४ ३ ई । ओ २ ३ ४ ५ ई । डा ॥ वेयगानस्य एकादशप्रपाठकस्य प्रथमार्द्धे साम ३१ ॥ अथर्वणः—नैनंरक्षांसिनपिशाचाःसहंतेदेवानामोजःप्रथमजंह्येतत् ॥ योबिभर्त्तिदाक्षायणंहिरण्यं-

१ अत्र-ॐअहोरात्राभ्यांनक्षत्रेभ्यःसूर्याचन्द्रमसाभ्याम् ॥ भद्राहमस्मभ्यंराजंशकधूमत्वंकृधि॥ काण्ड ६ अनुवाक १३ सूक्त १२८ मन्त्र ३ इत्यपिपठंति॥

सजीवेषुंकृणुतेदीर्घमायुः ॥ १ ३/३८ ॥ ऋक्—ॐउच्चादिविदक्षिणावंतोऽअस्थुर्येऽअश्वदाःसहतेसूर्येण ॥ हिरण्यदाऽअमृतत्वंभजंतेवासो-
दाःसोमप्रतिरंतऽआयुः ॥ ८ ३/६ ॥ यजुः—ॐउच्चातेजातमन्धसोदिविसद्भूम्यादंदे ॥ उग्रᳬशर्म्ममहिश्रवः ॥ १६/२६ ॥
साम—उच्चाता ३ ईजातमंधसाः । दिवाई । सा१द्भू२। मिया२३ ददाई। उग्राᳬशर्म्मा। महा२३ईश्रवाउ। वा ३। स्तोपे२३४५ ॥ वेयगानस्य
द्वादशप्रपाठकस्य द्वितीयार्द्धे साम १३ ॥ अथर्वणः—ॐउच्चापतंन्तमरुणंसुपर्णमध्येदिवस्तरणिंभ्राजमानम् ॥ पश्यामत्वासवितारंयमा-
हुरजस्त्रंज्योतिर्यदविन्ददत्रिः ॥ का० १३ अ० २ मं० ३६ इत्याशीर्वादः ॥ + व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां
ब्राह्मणानां मनः समाधीयताम् ॥ * समाहितमनसः स्मः ॥ + प्रसीदन्तु भवन्तः ॥ प्रसन्नाः स्मः ॥ + ॐशान्तिरस्तु ॥ अस्तु !
ॐपुष्टिरस्तु ॥ ॐतुष्टिरस्तु । ॐवृद्धिरस्तु । ॐअविघ्नमस्तु । ॐआयुष्यमस्तु । ॐआरोग्यमस्तु । ॐशिवंकर्मास्तु । ॐकर्मसमृ-
द्धिरस्तु । ॐवेदसमृद्धिरस्तु । ॐशास्त्रसमृद्धिरस्तु । ॐधनधान्यसमृद्धिरस्तु । ॐपुत्रपौत्रसमृद्धिरस्तु । ॐइष्टसंपदस्तु । ॐअरिष्ट-
निरसनमस्तु । ॐयत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ॥ ॐयच्छ्रेयस्तदस्तु ॥ ॐउत्तरेकर्मणि निर्विघ्नमस्तु ॥ ॐउत्तरोत्तर-
महरहरभिवृद्धिरस्तु॥ ॐउत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम् ॥ ॐतिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ॥ पात्रे उदकसेकः ॥
ॐतिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् ॥ ॐतिथिकरणे मुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम् ॥ ॐदुर्गापाञ्चाल्यौ प्रीयेताम् ॥
ॐअग्निपुरोगाविश्वेदेवाः प्रीयन्ताम् ॥ ॐइन्द्रपुरोगामरुद्गणाः प्रीयन्ताम् ॥ ॐमाहेश्वरीपुरोगाउमामातरः प्रीयन्ताम् ॥ ॐअरुन्धतीपुरोगा एक-
पत्न्यः प्रीयन्ताम् ॥ ॐविष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम् ॥ ॐब्रह्मपुरोगाः सर्वेवेदाः प्रीयन्ताम् ॥ ॐब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॥ ॐश्रीसर-

---

१ अत्र—ॐउच्चैर्घोषोदुंदुभिःसत्वनायन्वानस्पत्यःसंभृतउस्रियाभिः ॥ वाचंक्षुणुवानोदमयन्त्सपत्नान्सिंहइवजेष्यन्नभितंस्तनीहि ॥ का० ५ अ० ४ सू० २० मं० १ इत्यपि मन्त्रं पठन्ति ॥ + यजमानो वदेत् ॥ * ब्राह्मणा वदेयुः ॥ २ अस्तु इति द्विजाः सर्वत्र प्रतिवचनं वदेयुः ॥

स्वत्यौ प्रीयेताम् ॥ ॐश्रद्धामेधे प्रीयेताम् । ॐभगवती कात्यायनी प्रीयताम् ॥ ॐभगवती माहेश्वरी प्रीयताम् ॥ ॐभगवती ऋद्धिकरी प्रीयताम् ॥
ॐभगवती सिद्धिकरी प्रीयताम् ॥ ॐभगवती पुष्टिकरी प्रीयताम् ॥ ॐभगवती तुष्टिकरी प्रीयताम् ॥ ॐभगवन्तौ विघ्नविनायकौ प्रीयेताम् ॥
ॐसर्वाः कुलदेवताः प्रीयन्ताम् ॥ ॐसर्वाग्रामदेवताः प्रीयन्ताम् ॥ बहिः—ॐहताश्च ब्रह्मद्विषः ॥ ॐहताश्च परिपन्थिनः ॥ ॐहताश्च विघ्नकर्तारः ॥
ॐशत्रवः पराभवं यान्तु ॥ ॐशाम्यन्तु घोराणि । ॐशाम्यन्तु पापानि ॥ ॐशाम्यन्त्वीतयः ॥ पुनःपात्रे—ॐशुभानि वर्द्धन्ताम् ॥ ॐशिवा आपः
सन्तु ॥ ॐशिवा ऋतवः सन्तु ॥ ॐशिवा ओषधयः सन्तु ॥ ॐशिवा नद्यः सन्तु ॥ ॐशिवा गिरयः सन्तु ॥ ॐशिवा अतिथयः सन्तु ॥ ॐशिवा अग्नयः
सन्तु ॥ ॐशिवा आहुतयः सन्तु ॥ ॐअहोरात्रे शिवे स्याताम् ॥ ऋक्—शन्नः कनिक्रदद्देवःपर्ज्जन्योअभिवर्षतु ॥ शन्नोद्यावापृथिवीशं
प्रजाभ्यःशन्नएधिद्विपदेशंचतुष्पदे ॥ ऋ० ब्र० शान्तिपाठे परिशिष्टमन्त्र ८ यजुः—ॐनिकामेनिकामेनᳬपर्ज्जन्योवर्षतुफलवत्योनऽ
ओषधयᳬपच्यन्तांयोगक्षेमोनः कल्पताम् ॥ २२/२२ ॥ ब्राह्मणम्—ॐनिकामेनिकामेनᳬपर्ज्जन्योवर्षत्विति निकामेनिकामेवैतत्रपर्ज्जन्योवर्ष-
तियत्रैतेनयज्ञेनयजन्तेफलवत्योनऽओषधयᳬपच्यन्तामितिफलवत्योवैतत्रौषधयᳬपच्यन्तेयत्रैतेनयज्ञेनयजन्तेयोगक्षेमोनᳬकल्पतामितियोगक्षे-
मोवैतत्रकल्पतेयत्रैतेनयज्ञेनयजन्तेतस्माद्यत्रैतेनयज्ञेनयजन्तेक्लृप्तᳬप्रजानांयोगक्षेमोभवति ॥ साम—ॐत्वष्टा ३४ । नो दैवियं वचाः ।
पर्जन्योब्रह्मणस्पा २३ तीः । पुत्रैर्भ्रातृभिरदितिर्नुपातू २३ नाः । दुष्टारा २३ न्त्रा । मणंवा २३ चा ३४३ः । ओ
२३४५ ई । डा ॥ वेयगानस्य अष्टमप्रपाठकस्य प्रथमार्द्धस्य साम २० ॥ अथर्वणः—गणास्त्वोपगायन्तुमारुताःपर्ज्जन्यघोषिणः पृथक् ॥
सर्गावर्षस्यवर्षतोवर्षन्तुपृथिवीमनु ॥ का० ४ अ० ३ सू० १५ मं० ४ ॥ ॐशुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः
सर्वे ग्रहाः प्रीयन्ताम् ॥ ॐभगवान्नारायणः प्रीयताम् ॥ ॐभगवान्पर्जन्यः प्रीयताम् । ॐभगवान्स्वामी महासेनः प्रीयताम् ॥ ॐपुरोनुवा-

कयया यत्पुण्यं तदस्तु ॥ ॐयाज्यया यत्पुण्यं तदस्तु ॥ ॐवषट्कारेण यत्पुण्यं तदस्तु ॥ ॐप्रातःसूर्योदये यत्पुण्यं तदस्तु ॥ ॐपुण्याहका
लान्वाचयिष्ये ॥ ॐवाच्यताम् ॥ ब्राह्मं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम् । वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥ भो ब्राह्मणाः
मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य वास्तुशान्त्याख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥
ॐपुण्याहम् ॥ एवं त्रिः ॥ ऋक्-ॐउद्गातेवशकुनेसामगायसिब्रह्मपुत्रऽइवसवनेपुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकु-
नेभद्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ २ $\frac{१२}{८}$ ॥ यजुः-ॐपुनन्तुमादेवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदः
पुनीहिमा ॥ $\frac{३९}{१९}$ ॥ ब्राह्मणम्-ॐसयःकामयेतमहत्प्राप्नुयामित्युदगयनऽआपूर्यमाणपक्षेपुण्याहेद्वादशाहमुपसद्व्रतीभूत्वौदुंबरेकंसेचमसे
वासर्वौषधम्फलानीतिसम्भृत्यपरिसमुह्यपरिलिप्याग्निमुपसमाधायावृताज्यंसंस्कृत्यपुंसानक्षत्रेणमन्थंसन्नीयजुहोति ॥ साम-
२र र १ ५ १र रर र २र ३ २ १२ २ १र र र
ॐपुनानःसोमा३धारा २३४ या । आपोवसानोअर्षस्यारत्नधायोनिमृतस्यसा २ ईद साई । ओहा३उवा । उत्सोदेवोहिरा २३
२ १२ २ २१ २ ४५ ४ ५
हाई । ओहा ३ उवा । ण्यया । ओ । ३होवा । हो ५ ई । डा ॥ वेयगानस्य चतुर्दशप्रपाठकस्य प्रथमार्द्धे साम ३५ ॥
अथर्वणः-ॐपुनन्तुमादेवजनाःपुनन्तुमनवोधिया॥ पुनन्तुविश्वाभूतानिपवमानःपुनातुमा ॥ का०६अ०२सू० १९ मं० १ पृथिव्यामुद्धृतायां तु
यत्कल्याणं पुरा कृतम् । ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचन-
मपेक्षमाणाय मया क्रियमाणस्य वास्तुशान्त्याख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु ॥ ॐअस्तु कल्याणम् ॥ एवं त्रिः ॥ ऋक्-ॐअपाः-
सोमस्तमिन्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते ॥ यत्रारथस्यबृहतोनिधानंविमोचनंवाजिनोदक्षिणावतः ॥ ३ $\frac{२०}{३}$ ॥ यजुः-ॐयथेमांवाचंकल्या-
णीमावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्याᳲशूद्रायचार्य्यायचस्वायचारणायच ॥ प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयंम्मेकामः
समृद्ध्यतामुपमादोनमतु ॥ $\frac{२}{२६}$ ॥



ब्राह्मणम्-ॐअथाध्वर्योःप्रतिगरोरात्सुरिमेयजमानाभद्रमेभ्योयजमानेभ्योभूदितिकल्याणमेवैतन्मानुष्यैवाचोवदति ॥ साम-ॐकाऽ५
र ५४ २ ४र ५ १ १र र २ १ २ र २ १ २ ई ३ र २ १
या । नश्वा ३ इत्रा ३ आभूवात् । उ । ती स दा वृध स्स । खा । ओ३ हो हाइ । कया २३ शचा ई । ष्ठयौ हो ३ । हुम्मा
१२ । वाऽ २ तो ३५ हाइ ॥ वेयगानस्य पंचमप्रपाठकस्य प्रथमार्द्धे साम २५ ॥ अथर्वणः-ॐविश्वजित्कल्याण्यैमापरिदेहि ॥
कल्याणिद्विपाच्चसर्वन्नोरक्षचतुष्पाद्यच्चनःस्वम् ॥ का० ६ अ० ११ सू०१०७मं०३ सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता । सम्पूर्णा
सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य
वास्तुशान्त्याख्यस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ॥ ॐकर्मऋद्ध्यताम् ॥ एवं त्रिः ॥ ऋक्-ॐऋद्ध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथे-
हेपयातं ॥ यशोपनक्कंमधुगोष्वंतराभूतांशोऽअश्विनोः काममप्राः ॥ ८ $\frac{२}{६}$ ॥ यजुः-ॐसत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम ॥
दिवम्पृथिव्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ $\frac{५२}{८}$ ॥ ब्राह्मणम्-ॐतऽउत्तरस्यहविर्धानस्यजघन्यायाक्ववर्षाᳲसामाभिगायन्ति
२र र र र र र र २ १ २ १र
सत्रस्यऽऋद्धिरितिराद्धिमेवैतदभ्युत्तिष्ठंत्युत्तरवेदेर्वोत्तरायाᳲश्रोणाविन्तरंतुक्रतूत्तरम् ॥ साम-औ हो वा औ हो वा औ हो ३ वा । अगन्म ज्यो
२ १ २ १र२ १ २ १र २१र२ र २१र २र २१र२ र र १ २ १र र२र र १ २ १र र
तिः । अगन्म ज्योतिः । अगन्मज्यो तिः । अमृताअ भूम । अमृता अभूम । अमृता अ भू मा । तरिक्षंपृथिव्याअध्यारु हा मा । तरिक्षंपृथिव्याअध्यारु
२र २ १ २ १र र २ २र १ २ १ २र १ २र २र १ २ १ :र१ २र २र १ २ १ २र १ २र २र
हा मा । तरिक्षंपृथिव्याअध्यारुहाम । दिवमन्तरिक्षा दध्यारु हा म । दिवमन्तरिक्षादध्यारु हाम । दिवमन्तरिक्षा दध्या रुहाम ।
१ २र र १र १ २र र १र १ २र र १र १ २र १र २ १ २र १र २ १ २र १र २र
अविदामदे वा न् । अविदामदे वा न् । अविदामदे वान् । समुदे वै रगन्महि । समु दे वै रगन्महि । समु दे वै रगन्महि । औ
र र २र र र २र २ १ र ३ १ १ १ १
हो वा । औ हो वा । औ हो ३ वा । सुवर्ज्यो ती २ ३ ४ ५ः ॥ आरण्यगानस्य चतुर्थप्रपाठकस्य प्रथमार्द्धे साम ४ ॥

अथर्वणः—ॐऋधंङ्मंत्रोयोनिंय आंबभूवामृतासुवर्द्धमानःसुजन्मां॥अदंब्धासुभ्राजंमानोहेंवत्रितोधर्त्तादांधारत्रीणिं॥ का० ५अ० १सू० १मं० धनधान्यधराधर्म निधिकोशगृहाणि च। ध्रुवाणि यत्र तिष्ठन्ति सा ऋद्धिः सर्वदास्तु ते॥ स्वस्त्यस्तु या विनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः॥ भोब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणाय वास्तुशान्त्याख्याय कर्मणे स्वस्ति भवन्तो ब्रुवन्तु॥ ॐ आयुष्मते स्वस्ति॥ एवं त्रिः॥ ऋक्—ॐस्वस्तिरिद्धिमर्पथेश्रेष्ठारेक्णस्वत्यभियावा-ममेतिं॥ सानोंऽअमासोऽअरंणेनिपांतुस्वावेशाभंवतुदेवगोंपा॥ ८<sup></sup>॥ यजुः—ॐस्वतिनऽइन्द्रोंवृद्धश्रंवा᳚स्वस्तिनं÷पूषाविश्वं-वेंदा᳚॥ स्वस्तिनस्तार्क्ष्योंऽअरिंष्टनेमि᳚स्वस्तिनोबृहस्पतिंर्दधातु॥ १९/२५ ॥ ब्राह्मणम्—ॐगातुंन्यज्ञायगातुंन्यज्ञपतयऽइतिगातुंह्ये-षयज्ञायेच्छतिगातुंन्यज्ञपतयेयोयज्ञस्यसङ्स्थान्देवीस्वस्तिरस्तुनःस्वस्तिर्मानुष्येभ्यऽइतिस्वस्तिनोदेवत्रास्तुस्वस्तिर्मानुष्यत्रेत्येवैं तदाहोर्ध्वं-जिगातुभेषजमित्यूर्ध्वोंनोयज्ञोदेवलोकंन्यजत्वित्येवैतदाहशन्नोऽअस्तुद्विपदेशञ्चतुष्पदऽइत्येतावद्वाऽ इदङ्सर्वंन्यावद्विपाच्चैवचतुष्पाच्चतस्माऽ एवैतद्यज्ञस्यसङ्स्थांगत्वाशंकरोतितस्मादाहशन्नोऽअस्तुद्विपदेशंचतुष्पदे॥ साम—ॐत्वाँ तारमिन्द्रमविता। रमि २३ न्द्राम्। ह वे हवे सुहव᳚शू। र मी २३ न्द्राम्। हुवाइ नुशक्रंपुरुहू। तमी २३ न्द्राम्। इ द᳚ह। वाइः। म घ वा। वा३४३ इ। तू ३ वा ५ इन्द्रा ६५६ः॥ वेयगानस्य नवमप्रपाठकस्य प्रथमार्द्धे साम ३॥ अथर्वणः—ॐस्वस्तिमात्रउतपित्रेणोंअस्तु स्वस्तिगोभ्योजगतेपुरुषेभ्यः॥ विश्वंसुभूतंसु-विदत्रंन्नो अस्तुज्योगेवदृंशेमसूर्यम्॥ का०१अ०६सू०३१मं०४ समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥ भो ब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य वास्तुशान्त्याख्यस्य कर्मणः श्रीरस्त्विवतिभवन्तोब्रुवन्तु॥ अस्तु श्रीः॥ एवं त्रिः॥ ऋक्—ॐश्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति॥ श्रियंवसा-नाऽअमृतत्वमांयन्भवंतिसत्यासंमिथामितद्रौ॥ ७/४॥ यजुः—ॐमनंस᳚कामुमाकूंतिंवाच?सत्यमंशीय॥ पशूना᳚रूपमन्नंस्यरसोयश᳚श्री?

श्रंयताम्मयिस्वाहा॥ ४/३९॥ अथवा—ॐश्रीश्चंतेलक्ष्मीश्चपत्न्यांवहोरात्रेपार्श्वेनक्षंत्राणिरूपमश्विनौंव्यात्तम्॥ इष्णन्निषाणामुम्मंऽइषाणसर्वं-लोकम्मंऽइषाण॥ २२/३१॥ ब्राह्मणम्—ॐतेनोहततऽईजेदक्ष᳚ पार्वतिस्तऽइमेप्येतर्हिदाक्षायणाराज्यमिवैवप्राप्ताराज्यमिवहवैप्राप्नोतियऽएवंविद्वाने-तेनयज्ञेनयजतेतस्माद्वाऽएतेनयजेतस्माऽएकैकऽएवानूचिनाहं पुरोडाशोभवत्येतेनोहास्यासपत्नानुपबाधाश्रीर्भवति॥ ॐआयन्तइवसूं४ रायां। विश्वा ५२ इदिन्द्रा ५२। स्यभा ५२ क्षाता। वा सू नि जा तो ज निमा। नियोजा१ सा ५२। प्रतिभा गं नदी २ धिमः। प्रा २३ ती। भागांना ३ दा। हुं। धिमा ३ः। ओ २३४वा। है २ ३ ४ ५॥ वेयगानस्य सप्तमप्रपाठकस्य द्वितीयार्द्धे साम ५॥ अथर्वणः—ॐएहयांतु-वरुणः सोमोंअग्निर्बृहस्पतिर्वसुंभिरेहयांतु॥ अस्यश्रियंमुपसंयांतसर्वंऽउग्रस्यंचेतुःसंमंनसः सजाताः॥ काण्ड ६ अनुवाक् ८ सूत्र ७३ मंत्र १॥ कृतेऽस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु॥ अस्तु परिपूर्णः॥ अथाभिषेकः॥ कर्तुर्वामतः पत्नीं उपवेश्य॥ पात्रपातितकलशोदकेन अविधुराश्चत्वारोब्राह्म-णादूर्वाम्रपल्लवैरुदङ्मुखास्तिष्ठन्तः सपत्नीकं यजमानमभिषिञ्चेयुः॥ तत्रमंत्राः—ॐपय÷पृथिव्याम्पयऽओषधीषुपयोंदिव्यन्तरिक्षेपयोंधा᳚॥ पयंस्वती᳚प्रदिशं÷सन्तुमह्यम्॥ ३६/१८॥ ॐपञ्चनद्य÷सरंस्वतीमपिंयन्तिसस्त्रोंतस᳚॥ सरंस्वतीतुपञ्चधासोदेशेभंवत्सरित्॥ ११/३४॥ ॐवरुंण-स्योत्तम्भंनमसिवरुंणस्यस्कम्भसर्ज्जनीस्त्थोवरुंणस्यऽऋतसदंन्यसिवरुंणस्यऽऋतसदंनमसिवरुंणस्यऽऋतसदंनमासींद॥ ३६/४॥ ॐपुनन्तु-मादेवजना?पुनन्तुमनंसाधियं÷॥ पुनन्तुविश्वांभूतानिजातंवेद᳚पुनीहिमा॥ ३९/१९॥ ॐदेवस्यंत्त्वासवितु?प्प्रंसवेश्विनोंर्बाहुभ्यांम्पूष्णोह-स्ताभ्याम्॥ सरंस्वत्यैवाचोयन्तुर्य्यन्त्रियेंदधामिबृहस्पतेंष्ट्वासाम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ॥ ३०/९॥ ॐदेवस्यंत्वासवितु?प्प्रंसवेश्विनोंर्ब्बाहु-भ्यांम्पूष्णोहस्तांभ्याम्॥ सरंस्वत्त्यैवाचोयन्तुर्य्यन्त्रेणाग्ग्ने?साम्राज्ज्येनाभिषिञ्चामि॥ ३७/१८॥ ॐदेवस्यंत्वासवितु?प्प्रंसवेश्विनोंर्ब्बाहु-

भ्यांम्पूष्णोहस्ताभ्याम् ॥ अश्विनोर्भैषज्ज्येनतेजसेब्रह्मवर्च्चसायाभिषिंञ्चामिसरस्वत्यैभैषज्ज्येनवीर्य्यायान्नाद्यायाभिषिंञ्चामीन्द्रस्येन्द्रि-
येणबलायश्रियैयशसेभिषिंञ्चामि ॥ ३/२० ॥ ॐविश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ३/३० ॥ ॐधामच्छदग्निरिन्द्रोब्रह्मा-
देवोबृहस्पतिः ॥ सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनःशुभे ॥ ७६/१८ ॥ ॐत्वंयविष्ठदाशुषोनॄँ?पाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥ ५२/१३ ॥
ॐअन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ ८३/११ ॥ ॐद्यौ?शान्तिरन्तरिक्षंशान्तिः पृथिवी-
शान्तिरापःशान्तिरोषधयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवा?शान्तिर्ब्रह्मशान्तिःसर्वंशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥
॥ १७/३६ ॥ ॐयतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ २२/३६ ॥ ब्राह्मणम्—ॐपालाशंभवति।।तेनब्राह्मणो-
भिषिंञ्चतिब्रह्मवैपलाशोब्रह्मणैवैनमेतदभिषिंञ्चति ॥ औदुंबरंभवति।।तेनस्वोभिषिंञ्चत्यन्नंवाऽऊर्गुदुंबरऽऊर्ग्वैस्वंयावद्वैपुरुषस्यस्वंभवतिनैवताव-
दशनायतितेनोर्कूस्वंतस्मादौदुंबरेणस्वोभिषिंञ्चति ॥ नैय्यग्रोधपादंभवतितेनमित्रोराजन्योभिषिंञ्चतिपद्भिर्वैन्यग्रोधःप्रतिष्ठितोमित्रेणवैराजन्यः
प्रतिष्ठितस्तस्मान्नैय्यग्रोधपादेनमित्रोराजन्योभिषिंञ्चति ॥ आश्वत्थंभवति।।तेनवैश्योभिषिंञ्चतिसयदवादोश्वत्थेतिष्ठतइन्द्रोमरुतऽउपामंत्रयते
तस्मादाश्वत्थेनवैश्योभिषिंञ्चति ॥ यद्देवकुल्पाञ्जुहोतिप्राणावैकुल्पाऽअमृतमुवैप्राणाऽअमृतेनैवैनमेतदभिषिंचति ॥ सर्वेषांवाऽएषवेदानांरर-
सोयत्सामसर्वेषामेवैनमेतद्वेदानांरसेनाभिषिंञ्चति ॥ शान्तिः शान्तिः सुशान्तिर्भवतु ॥ स्वस्थाने उपविश्य हस्ते जलं गृहीत्वा –अभिषेककर्तृभ्यो
ब्राह्मणेभ्यो यथोत्साहदक्षिणां दास्येतेनश्रीकर्माधीशःप्रीयताम् ॥ ततः पुत्रवतीभिर्वृद्धसुवासिनीभिर्नीराजनं कार्यम् ॥ तस्यमंत्रः—ॐअनाधृष्टा
पुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्येप्रजाम्मेदाः सुखदापश्चाद्देवस्यसवितुराधिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतो- ॥ १२ ॥
धातुराधिपत्येरायस्पोषम्मेदाः ॥ विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजोमेदाविश्वाभ्योमानाष्ट्राभ्यस्पाहिमनोरश्वासि ॥ १२/३७ ॥
अनेन पुण्याहवाचनेन कर्माङ्गदेवता श्रीवास्तोष्पतिः प्रीयताम् ॥ इति पुण्याहवाचनप्रयोगः ।

॥ अथ मातृकापूजनप्रयोगः ॥

पीठोपरि रक्तं वस्त्रं प्रसार्य तदुपरि गोधूमाक्षतपुञ्जेषुपूगीफलेषुवासगणाधिपगौर्यादिचतुर्दशमातॄणांदक्षिणोपक्रमाणांउदगपवर्गाणांप्रत्यगुपक्रमा-
णां प्रागपवर्गाणां वा स्थापनम् ॥ ॐगणानांन्त्वागणपतिंहवामहे प्रियाणांन्त्वा प्रियपतिंहवामहेनिधीनान्त्वानिधिपतिंहवामहेवसोमम ॥ आहमजा-
निगर्भधमात्वमजासिगर्भधम् ॥ १९/२३ ॥ ॐगणेशायनमःगणेशंआवाहयामिस्थापयामि । भोगणपते इहागच्छ इहतिष्ठ ॥ ॐआयङ्गौ?पृश्निरक्रमीदस-
दन्मातरम्पुर? ॥ पितरञ्चप्रयंत्स्वः ॥ ६/३ ॥ ॐभूर्भुवः स्वःगौर्यैनमः गौरीं आवाहयामिस्था० ॥ भोगौरि इहागच्छ इहतिष्ठ ॥ १ ॥ ॐहिर-
ण्यरूपाऽ उषसो विरोकऽ उभाविन्द्राऽ उदिथःसूर्य्यश्च ॥ आरोहतं वरुण मित्र गर्तन्ततश्चक्षाथामदितिन्दितिञ्च मित्रोसि वरुणोऽसि ॥ १६/१० ॥ उपोपे-
ॐभूर्भुवःस्वः पद्मायै नमः पद्मामावाहयामि स्था० ॥ भो पद्मे इहागच्छ इहतिष्ठ ॥ २ ॥ ॐकदाचनस्तरीरसिनेन्द्रसश्चसिदाशुषे ॥ उपोपे-
न्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यतऽआदित्येभ्यस्त्वा ॥ २/८ ॥ ॐभूर्भुवः स्वः शच्यै नमः शचीमावाहयामि स्थापयामि ॥ भो शचि इहाग-
च्छ इहतिष्ठ ॥ ३ ॥ ॐमेधाम्मेवरुणोददातुमेधामग्नि?प्रजापतिः ॥ मेधामिन्द्रश्चवायुश्चमेधान्धातादधातुमेस्वाहा ॥ १५/३२ ॥ ॐभूर्भुवःस्वः मेधा-
यै नमः मेधामावाहयामिस्था० ॥ भोमेधे इहागच्छ इहतिष्ठ ॥ ४ ॥ ॐउपयामगृहीतोऽसि सावित्रोसि चनोधाश्चनोधाऽअसि चनोमयिधेहि ॥ जिन्व-
यज्ञञ्जिन्वयज्ञपतिम्भगायदेवायत्वासवित्रे ॥ ८/७ ॥ ॐभूर्भुवःस्वः सावित्र्यैनमः सावित्रीं आवाहयामि स्था० ॥ भोसावित्रि इहागच्छइहतिष्ठ ॥ ५ ॥
ॐविज्ज्यन्धनुःकपर्दिनोविशल्ल्योबाणवाँ२उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधि? ॥ १०/१६ ॥ ॐभूर्भुवःस्वःविजयायैनमःविजयांआवा-
हयामि स्था० ॥ भोविजये इहागच्छइहतिष्ठ ॥ ६ ॥ ॐयातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २/१६ ॥

१ गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनःकुलदेवता । गणेशेनाधिकाह्येता वृद्धौ पूज्याश्चतुर्दश ॥ अत्र चतुर्दशपदसमाहारान्मातरोलोकमातर इति सर्वासां विशेषणम् ॥ केचन मातृःलोकमातृः अपि आवाहयन्ति तदयुक्तं एवं करणे मण्डपे षड्विनायकादि-
घृतमातृकान्तानां चतुःषष्टिमातॄणां स्थाने षट्षष्टिमातरः भवन्ति वस्तुतस्तु चतुःषष्टिरेव ॥

ॐ भूर्भुवः स्वः जयायै नमः जयां आवाहयामि स्था०॥ भो जये इहागच्छ इह तिष्ठ ॥७॥ ॐ देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्त्तताम् ॥ देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ १५/२५ ॥ ॐ भूर्भुवः स्वः देवसेनायै नमः देवसेनां आवाहयामि स्थापयामि ॥ भो देवसेने इहागच्छ इ०॥८॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ३६/१९ ॥ ॐ भूर्भुवः स्वः स्वधायै नमः स्वधां आवाहयामि स्थापयामि ॥ भो स्वधे इ० इह तिष्ठ ॥९॥ ॐ स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात्स्वाहा द्यावापृथिवीभ्यां स्वाहा वातादारभे स्वाहा ॥ ६/२ ॥ ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहां आवाहयामि स्थापयामि ॥ भो स्वाहे इहागच्छ इह तिष्ठ ॥१०॥ ॐ धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधा देवयजं वह ॥ ध्रुवमसि पृथिवीं दृंह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ १/१७ ॥ ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि ॥ भो धृते इहागच्छ इह तिष्ठ ॥११॥ ॐ त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्द्धना ॥ द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥ २०/२१ ॥ ॐ भूर्भुवः स्वः पुष्ट्यै नमः पुष्टिमावाहयामि स्थापयामि ॥ भो पुष्टे इहागच्छ इह तिष्ठ ॥१२॥ ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ ३/२६ ॥ ॐ भूर्भुवः स्वः तुष्ट्यै नमः तुष्टिमावाहयामि स्थापयामि ॥ भो तुष्टे इहागच्छ इह तिष्ठ ॥१३॥ ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन ॥ ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ १९/२३ ॥ ॐ भूर्भुवः स्वः आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवतामावाहयामि स्थापयामि भो आत्मनः कुलदेवते इहागच्छ इह तिष्ठ ॥ १४ ॥ अथ श्र्यादिसप्तवसोर्धारास्थापनम्—पात्रस्थेन विलीनेन सगुडेन घृतेन मातृणां संनिहितकु-

१ अत्र वसोर्द्धारापूजनपूर्वं केचन वैश्वदेवसङ्कल्पं कुर्वन्ति तदनुपपन्नम् । विशेषवचनादर्शनात्कल्पद्रुमादिप्राचीनप्रमाणग्रन्थेषु अनङ्गीकाराच्च ॥ अविघ्नो मण्डपश्चैव मातॄणां पूजनं सकृत् । वैश्वदेवं वसोर्द्धारा नान्दीश्राद्धमतः परम् ॥ अविघ्नपूजनात्पूर्वं वैश्वदेवं विधाय च ॥ इत्यत्र मूलं मृग्यम् ॥ अन्यच्च स्वाहाकारमहारुद्रवास्तुशान्त्यादिप्रयोगेषु अविघ्नपूजनस्याप्यभावः ॥ वैश्वदेवप्रायश्चित्तसङ्कल्पे आचार एव प्रमाणम् ॥ कल्पद्रुमादिग्रन्थेषु निर्णजनान्तपञ्चमहायज्ञान्तः कृतनित्यक्रियो यजमानः स्वासने उपविश्य इत्युक्तत्वात् न कर्मणि कर्मान्तरप्रवेश इत्युक्तत्वाच्चास्मिन्नैमित्तिककर्मणि न पुनर्नित्यकर्मरूपवैश्वदेवसङ्कल्पाऽवसरः ॥ अतः नास्माभिरङ्गीकृत इति दिक् ॥



ड्यलग्नाः दक्षिणाद्युदगपवर्गाः पश्चिमादिप्रागपवर्गाः नातिनीचा न चोच्छ्रिताः सप्त वसोर्द्धाराः कर्तव्याः—ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा ॥ ३/१ ॥ नमोस्तु वसुमातृभ्यो घृतमातृभ्य एव च । स्वयज्ञकार्यसिद्ध्यर्थं धारां दास्यामि मातरः ॥ इत्यनेन सप्तधाराः कृत्वा ततः शिष्टाचारात् ऊर्ध्वभागे गुडेनैकीकरणम्—ॐ कामधुक्षः ॥ ३/१ ॥ श्रीपूर्वसप्तमातृभ्यो घृतमातृभ्य एव च । गुडेन मेलयिष्यामि ताः सर्वार्थप्रसाधिकाः ॥ इत्यनेनैकीकृत्य कुङ्कुमादिना बिन्दुकरणेनालङ्कृत्य प्रतिधारायामेकैकदेवतामावाहयेत्—ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥ पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥ ४/३९ ॥ ॐ भूर्भुवः स्वः श्रियै नमः श्रियं आ० भो श्रीः इ० इ० ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२/३१ ॥ ॐ भू० लक्ष्म्यै नमः लक्ष्मीं आ० भो लक्ष्मि इ० इह तिष्ठ । ॐ इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ॥ उपसृजन्धरुणं मात्रे धरुणो मातरं धयन् ॥ रायस्पोषमस्मासु दीधरत्स्वाहा ॥ ५१/८ ॥ ॐ भू० धृत्यै नमः धृतिं आ० भो धृते इ० इ० ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ॥ मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ १५/३२ ॥ ॐ भू० मेधायै नमः मेधां आ० भो मेधे इ० इ० ॐ देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥ ५१/२१ ॥ ॐ भू० पुष्ट्यै नमः पुष्टिमा० भो पुष्टे इ० इ० ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ३०/१९ ॥ ॐ भू० श्रद्धायै नमः श्रद्धां आ० भो श्रद्धे इ० इ० ॐ देवी तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन् ॥ अस्पृक्षद्भारती दिवं रुद्रैर्यज्ञं सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥ १९/२८ ॥ ॐ भू० सरस्वत्यै नमः सरस्वतीं आ० भो सरस्वति इ० ॐ मनो जूति० ॥ ॐ भूर्भुवः स्वः सगणेशगौर्याद्यावाहितमातरः वसोर्द्धारासहिताः सुप्रतिष्ठिताः वरदाः भवत ॥ ॐ भूर्भुवः स्वः सगणेशगौर्याद्यावाहितमातरः वसोर्द्धारासहिताभ्यो नमः इत्यनेन षोडशोपचारैः पूजयेत् ॥ प्रार्थना—गणेशपूर्विका देव्यो गौर्यादिप्रमुखाः स्मृताः ॥ प्रसीदन्तु हि कल्या-

ण्यो निर्विघ्नं कुरुताध्वरम् ॥ गौर्यादिदेव्यः सदापूज्याः सप्त वै घृतमातरः । कल्याणानि प्रयच्छन्तु सकुटुम्बस्य मे सदा ॥ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः । कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥ इति मातृकापूजनप्रयोगः ॥

॥ अथायुष्यमन्त्रजपः ॥

आयुष्यंवर्चस्यमिति त्र्यृचस्य दक्षऋषिः उष्णिक्शक्करीत्रिष्टुप्छन्दांसि हिरण्यं देवतं आयुष्याभिवृद्ध्यर्थं जपे विनियोगः—ॐ आयुष्यंवर्चस्य ꣳ रायस्पोषमौद्भिदम् ॥ इद ꣳ हिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम् ॥ ५०/३४ ॥ नतद्रक्षा ꣳ सिनपिशाचास्तरन्तिदेवानामोजः प्रथमज ꣳ ह्येतत् ॥ योबिभर्तिदाक्षायण ꣳ हिरण्य ꣳ सदेवेषुकृणुतेदीर्घमायु ꣳ समनुष्येषुकृणुतेदीर्घमायुः ॥ ५१/३४ ॥ यदाबध्नन्दाक्षायणाहिरण्य ꣳ शतानीकायसुमनस्यमानाः ॥ तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ५२/३४ ॥

अथ साङ्कल्पिकविधिना नान्दीश्राद्धप्रयोगः ॥

अथ यज्ञोपवीती[३] प्राङ्मुखो दक्षिणं जानु पातयित्वा पात्रे उदङ्मुखान् प्राक्संस्थान् स्वयंउदङ्मुखश्चेत्प्राङ्मुखान्[६] उदक्संस्थान्वैश्वदेवस्थानेद्वौ[७]

१ हेमाद्रौ षड्विंशन्मते—अनग्निको यदा विप्र उच्छिन्नाग्निरथापि वा । तदा वृद्धिषु सर्वासु साङ्कल्पं श्राद्धमाचरेत् ॥ हेमाद्रौ संवर्तः—समग्रंयस्तु शक्नोति कर्तुं नैवेह पार्वणम् । अपि सङ्कल्पविधिना काले तस्य विधीयते ॥ स्मृतिरत्नावल्याम्- वृध्यनंतरभाविनिवृद्धावपिपिण्डदानस्यप्रातिषिद्धत्वात्ताहशस्थले पिण्डनिषेधाऽन्यथानुपपत्त्याभियुक्तैः सङ्कल्पश्राद्धानुष्ठानस्यैवौचित्यस्वीकारः इत्यादिप्रमाणादनग्निकोच्छिन्नाग्निकर्तृकासुसर्वासुवृद्धिषुसङ्कल्पश्राद्धस्यैवविहितत्वात्साङ्कल्पिकाभ्युदयिकश्राद्धप्रयोगोऽत्रास्माभिःप्रयोजितः । तावन्मात्रेण सम्बद्धंश्राद्धं साङ्कल्पमुच्यते ॥ साङ्कल्पिकश्राद्धस्वरूपमाह हेमाद्रौसंवर्तः—पात्रभोज्यस्यचान्नस्यत्यागःसङ्कल्पउच्यते । तत्प्रयुक्तोविधिर्यस्तुयत्तेन व्यपदिश्यते ॥ पिण्डहीनःश्राद्धशब्दःसङ्कल्पश्राद्धपर्यायः ॥ साङ्कल्पिके समंत्रकावाहनार्घ्याग्नौकरणपिण्डदानविकिराक्षय्यस्वधावाचनप्रश्नेत्येतत्सप्तकंवर्ज्यम् ॥ २ गौर्यादिमातृकापूजनंनान्दीश्राद्धाङ्गं यत्रनान्दीश्राद्धंनक्रियतेतत्रमातृकापूजनमपिनकार्यम् ॥ अस्य आभ्युदयिकश्राद्धमित्यपरः पर्यायः ॥ अस्यार्थः—पुत्रजन्मविवाहादिरूपोऽभ्युदयस्तस्मिन्सतिक्रियमाणं श्राद्धं आभ्युदयिकशब्देनोच्यते ॥ पूर्वाह्णे आभ्युदयिकं विधेयम् ॥ अत्र पूर्वाह्णस्त्रेधाविभक्तस्याह्नः प्रथमोभागः ॥ पूर्वाह्णोवैदेवानां मध्यन्दिनोमनुष्याणामपराह्णःपितॄणाम् ॥ पुत्र

सपत्नीकपितृपार्वणस्थानेद्वौसपत्नीकमातामहपार्वणस्थानेद्वौचएवंषट्कुशवटून्दूर्वाकाण्डानिवा[३] संस्थाप्य क्षणंदानम्[४]—यवान्गृहीत्वा—ॐ सत्यवसुसंज्ञकानांविश्वेषांदेवानांनान्दीमुखानां अद्यकर्तव्यवास्तुशान्तिकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धेभवद्भ्यां क्षणः क्रियताम् ॥ इति यवान्निक्षिप्य ॥

जन्मादौ तु तत्कालएव न तत्र पूर्वाह्णनियमः ॥ यथा—नियतेषुनिमित्तेषुप्रातर्वृद्धिनिमित्तकम् । तेषामनियतत्वे तु तदानन्तर्यमिष्यते ॥ नान्दीश्राद्धंत्रिविधम्—विवाहादिनित्यनैमित्तिकंपुत्रजन्माद्यनियतनिमित्तंअग्न्याधानादिनिमित्तंचेति ॥ तत्रविवाहादिनिमित्तंप्रातःकार्यंतदाहशातातपः—प्रातर्वृद्धिनिमित्तकम् ॥ अत्रप्रातःशब्दःसार्द्धप्रहरात्मककालवचनः ॥ तदाहगार्ग्यः—ललाटसम्मितेभानौप्रथमःप्रहरःस्मृतः । सएवसार्द्धसंयुक्तःप्रातरित्यभिधीयते ॥ अग्न्याधाननिमित्तंत्वपराह्णेकार्यंतदाहगालवः—पार्वणंचापराह्णेतुवृद्धिश्राद्धंतथाग्निकम् ॥ पुत्रजन्मादौनिमित्तानन्तरमेवतत्कार्यम् ॥ ३ अत्रश्राद्धेनापसव्यम्—पितॄणांरूपमास्थायदेवा अन्नंसमश्नुते । तस्मात्सव्येन दातव्यं वृद्धिश्राद्धे तु नित्यशः ॥ हेमाद्रौ शातातपः—सव्येनचोपवीतेनकृजुदर्भैश्चधीमता ॥ कर्तव्यंचाभ्युदयिकंश्राद्धमभ्युदयार्थिना ॥ ४ यथैवोपचरेद्देवांस्तथावृद्धौपितॄनपि ॥ छन्दोगपरिशिष्टेकात्यायनोऽपि—दक्षिणंपातयेज्जानुदेवान्परिचरन्सदा । पातयेदितरत्जानुपितॄन्परिचरन्नपि ॥ निपातोनहिसव्यस्य जानुनो विद्यतेक्वचित् । सदापरिचरेद्भक्त्या पितॄनप्यत्र देववत् ॥ ५ अत्र प्राङ्मुखेभ्य उदङ्मुखोदद्यादित्युदङ्मुखतानियमः ॥ उदङ्मुखेभ्योवाप्राङ्मुखइत्यनेनप्राङ्मुखत्वोदङ्मुखत्वयोर्विकल्पउक्तः ॥ अतएवहेमाद्रौमार्कण्डेयपुराणे-उदङ्मुखः प्राङ्मुखोवायजमानः समाहितः । वृद्धिश्राद्धं प्रकुर्वीत नान्यवक्त्रःकदाचन ॥ ६ अत्र देवधर्मत्वेन सर्वेपिप्राङ्मुखाविप्राः ॥ हेमाद्रौभविष्यपुराणे—सर्वानेवतुतान्विप्रान्प्राङ्मुखानुपवेशयेत् ॥ हेमाद्रौछागलेयोक्तेर्दैवेपित्र्येचयेविप्रास्तेसर्वेपिप्राङ्मुखाउपवेशनीयाः ॥ ७ युग्मानाशयेदत्र इतिकात्यायनसूत्राद्वैश्वदेवार्थेपित्रार्थेमातामहार्थेचद्वौद्वौविप्रौइत्युक्तंरुद्रकल्पद्रुमे ॥ उभयतःदैवेपित्र्येच ॥ १ न हि कात्यायनसूत्रादौ कालत्रये मात्रादिश्राद्धत्रयविधिरस्ति ॥ तस्माद्वाजसनेयिभिरेकस्मिन्पूर्वाह्णेएवैकप्रयोगंपार्वणद्वयात्मकमाभ्युदयिकंश्राद्धमनुष्ठेयम् ॥ छन्दोगपरिशिष्टे—प्रातरामन्त्रितान्विप्रान्युग्मानुभयतस्तथा ॥ छन्दोगपरिशिष्टेकात्यायनः—न योषिद्भ्यःपृथग्दद्यादवसानदिनादृते । स्वभर्तृपिण्डदानाच्च तृप्तिरासां यतःस्मृता ॥ तत्रैव—आयुष्याणिचशान्त्यर्थंजप्त्वातत्रसमाहितः । षड्भ्यःपितृभ्यस्तदनुभक्त्याश्राद्धमुपक्रमेत् ॥ तस्मात्पित्रादीनांषण्णामेवेहदेवतात्वम् ॥ मातृश्राद्धंतुपूर्वंस्यात्पितॄणांतदनन्तरम् । ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतम् ॥ इत्यादीनिवचनानितानिशाखान्तरविषयाणि ॥ २ कुशवटूनांदूर्वाकाण्डानांवामुखकल्पनाअग्रेणकार्याइतिश्राद्धखण्डहेमाद्रौद्वौदूमिश्रपद्धतौच ॥ दर्भवटौनिर्माणेचनदर्भसंख्यानियमः ॥ तदुक्तंछन्दोगपरिशिष्टेकात्यायनेन—यज्ञवास्तुनिमुष्ट्यांचस्तम्बेदर्भवटौतथा ॥ दर्भसंख्यानविहिताविष्टरास्तरणेषुच ॥ दर्भचटौइत्यपिपाठः ॥ परिशिष्टेतुब्रह्माविष्टरादौदर्भसंख्याविहितास्ति ॥ पञ्चाशतो भवेद्ब्रह्मा तदर्धेन तु विष्टरः ॥ अतश्च दर्भसंख्यायाः संभवासंभवाभ्यां व्यवस्थितोविकल्प

ॐतथा ॥ प्राप्नुतां भवन्तौ ॥ प्राप्नवाव ॥ यवानगृहीत्वा–गोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानां सपत्नीकानां अद्यकर्तव्यवास्तु-\
शान्तिकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धे भवद्भ्यां क्षणः क्रियताम् ॥ इतियवान्निक्षिप्य ॥ ॐतथा ॥ प्राप्नुतां भवन्तौ ॥ प्राप्नवाव ॥ यवान्गृहीत्वा–\
द्वितीयगोत्राणां नान्दीमुखानां मातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानां अद्यकर्तव्यवास्तुशान्तिकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धे भवद्भ्यां\
क्षणः क्रियताम्। इति यवान्निक्षिप्य ॥ ॐतथा ॥ प्राप्नुतां भवन्तौ ॥ प्राप्नवाव ॥ पाद्यदानम्–सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदं वः पाद्यं\
पादावनेजनं पादप्रक्षालनं वृद्धिः॥गोत्राःनान्दीमुखाःपितृपितामहप्रपितामहाःसपत्नीकाःइदंवः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः॥ द्वितीयगोत्राः\
नान्दीमुखाःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःइदंवःपाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ सङ्कल्पः—अद्यपूर्वोच्चरित॰शुभपुण्यतिथौ\
साङ्कल्पिकविधिनानान्दीश्राद्धंकरिष्ये ॥ आसनदानम्—सत्यवसुसंज्ञकाःविश्वेदेवाःनान्दीमुखाःइदं वःआसनम् ॥ गोत्राःनान्दीमुखाः पितृपि-\
तामहप्रपितामहाःसपत्नीकाःइदंवःआसनम् ॥ द्वितीयगोत्राःनान्दीमुखाःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःइदं वःआसनम् ॥ गन्धादि-\
दानम्—सत्यवसुसंज्ञकाःविश्वेदेवाःनान्दीमुखाःइदंवोगन्धाद्यर्चनंयथाविभागंस्वाहानमः॥ गोत्राःनान्दीमुखाःपितृपितामहप्रपितामहाःसपत्नीकाः\
इदंवोगन्धाद्यर्चनंयथाविभागंस्वाहानमः ॥ द्वितीयगोत्राःनान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः इदंवोगन्धाद्यर्चनंयथाविभागं\
स्वाहानमः ॥ भोजननिष्क्रयद्रव्यदानम्–सत्यवसुसंज्ञकाःविश्वेदेवाः नान्दीमुखाःयुग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतंकिञ्चिद्धिरण्यंदत्तंअमृत-

इति नारायणवृत्तौ ॥ ३ ब्रह्माण्डपुराणे—कुशस्थाने च दूर्वाःस्युर्मङ्गलानां च वृद्धये॥ स्मृतिकौस्तुभे—मङ्गलात्मकविवाहाद्यारम्भेक्रियमाणवृद्धिश्राद्धे कुशस्थानेदूर्वाविधिः॥\
यज्ञाद्यारम्भे तु क्रियमाणेअमूलऋजुदर्भविधिः ॥ इतिदूर्वायाऋजुदर्भैर्विकल्पः ॥ ४ क्षणोनाम व्यापाररहितास्थितिः ॥ क्षणशब्दो निर्व्यापारस्थित्यर्थोस्ति ॥ क्षणइति प्रथमान्तं\
कर्म ॥ भवद्भ्यामिति तृतीयान्तः कर्ता ॥ क्रियतामितिकर्मणिप्रत्ययः॥५॥ हेमाद्रौ–इष्टिश्राद्धेक्रतूदक्षौ सत्यौनान्दीमुखेवसू ॥ अत्रसत्यवस्वोःसमुदितयोरेव अग्नीषोमवद्देवतात्वं\
नदेवयोःसमुच्चयः॥ अतः नब्राह्मणद्वये प्रत्येकमेकैकस्यप्रयोग इतिस्पष्टम्॥१ निर्णयसिन्धौनान्दीश्राद्धप्रकरणे—दैवेक्षणः क्रियताम् इति द्वौ युगपन्निमन्त्र्य ॐतथेति विप्राभ्यां\
युगपदुक्ते प्राप्नुतां भवन्तौ प्राप्नवाव इति वैश्वदेववत् पित्र्ये च द्विवचनान्तेन विप्रद्वये प्रयोगं कुर्यात्॥

रूपेण वःस्वाहानमः ॥ गोत्राःनान्दीमुखाःपितृपितामहप्रपितामहाःसपत्नीकाःयुग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतंकिञ्चिद्धिरण्यंदत्तंअमृतरूपे-\
णवःस्वाहानमः। द्वितीयगोत्राःनान्दीमुखाःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःयुग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतंकिञ्चिद्धिरण्यंदत्तं\
अमृतरूपेणवःस्वाहानमः ॥ सक्षीरयवमुदकदानम्–सत्यवसुसंज्ञकाःविश्वेदेवाःनान्दीमुखाःप्रीयन्ताम्॥ गोत्राःनान्दीमुखाःपितृपितामहप्रपितामहाः\
सपत्नीकाःप्रीयन्ताम् ॥ द्वितीयगोत्राःनान्दीमुखाःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःप्रीयन्ताम्॥आशीर्ग्रहणम्—अघोराःपितरःसन्तु॥\
सन्त्वघोराः पितरः॥ गोत्रंनोवर्धताम् ॥ वर्धतांवोगोत्रम् ॥ दातारोनोभिवर्द्धन्ताम् ॥ अभिवर्द्धन्तांवोदातारः॥ वेदाश्चनोभिवर्द्धन्ताम् ॥ वर्द्धन्तांवो\
वेदाः ॥ सन्ततिर्नोभिवर्द्धताम् ॥ वर्द्धतांवःसन्ततिः ॥ श्रद्धाचनोमाव्यगमत् ॥माव्यगमद्वःश्रद्धा । बहुदेयंचनोस्तु ॥ अस्तुवोबहुदेयम् ॥ अन्नंचनो\
बहुभवेत् ॥ भवतुवोबह्वन्नम्॥ अतिथींश्चलभेमहि ॥ अतिथींश्चलभध्वम् ॥ याचितारश्चनः सन्तु ॥ सन्तुवोयाचितारः॥ एताआशिषः सत्याः सन्तु ॥\
सन्त्वेताःसत्याआशिषः ॥ दक्षिणादानम्—सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनान्दीमुखेभ्यःकृतस्यनान्दीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षा-\
मलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे॥ गोत्रेभ्यःनान्दीमुखेभ्यःपितृपितामहप्रपितामहेभ्यःसपत्नीकेभ्यःकृतस्यनान्दीश्राद्धस्यफलप्र-\
तिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणां दातुमहमुत्सृजे॥ द्वितीयगोत्रेभ्यः नान्दीमुखेभ्यःमातामहप्रमातामहवृद्धप्रमातामहेभ्यःस-\
पत्नीकेभ्यःकृतस्यनान्दीश्राद्धस्यफलप्रतिष्ठा।सिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे॥नान्दीश्राद्धंसम्पन्नम्॥सुसम्पन्नम्॥\
विसर्जनम्—ॐवाजेवाजेऽवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः। अस्यमध्वःपिबतमादयध्वन्तृप्तायातपथिभिर्देवयानैः॥ १८/९ ॥अनुव्रजनम्–\
ॐआमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे । आमागन्तांपितरामातराचामासोमोऽअमृतत्वेनगम्यात् ॥ १९/९ ॥ हस्ते जलमादाय–\
मयाचरितेऽस्मिन्साङ्कल्पिकनान्दीश्राद्धे न्यूनातिरिक्तोयोविधिः स उपविष्टब्राह्मणानां वचनाच्छ्रीनान्दीमुखप्रसादाच्च सर्वः परिपूर्णोऽस्तु ॥ अस्तु\
परिपूर्णः ॥ अनेन साङ्कल्पिकविधिना नान्दीश्राद्धेन नान्दीमुखदेवताः प्रीयन्ताम् ॥ इति साङ्कल्पिकविधिना नान्दीश्राद्धप्रयोगः ॥

## ॥ अथ आचार्यादिऋत्विग्वरणम् ॥

एकस्मिन्ताम्रपात्रेशरावेवा आपःक्षीरंकुशाग्राणिदधिचन्दनंअक्षताः दूर्वासर्षपाश्चेत्यष्टद्रव्याणिनिक्षिप्य आचारात्पूगीफलंचानि।क्षिप्यपात्रान्तरेणपि-
धायरक्तसूत्रेणसंवेष्ट्यसाचार्यविप्राःॐपुण्याहमितित्रिर्वदन्तःयजमानहस्तेदद्युःपत्नीहस्तेकलशंचदद्युःसपत्नीकोयजमानःस्वासनादुत्थायब्राह्मणा
न्प्रार्थयेत्—पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः। अनुगृह्णन्तु मामद्य वास्तुशान्त्याख्यकर्मणि ॥ स्वस्वकर्मरतानित्यं वेदशास्त्रार्थकोविदाः।
श्रोत्रियाःसत्यवाचश्च देवध्यानरताःसदा॥ यद्वाक्यामृतसंसिक्ता वृद्धिंयान्तिनरद्रुमाः। अङ्गीकुर्वन्तुमत्कर्म कल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्यु-
क्तामन्त्रार्थेस्थिरबुद्धयः। यत्कृपालोकनात्सर्वा ऋद्धयोवृद्धिमाप्नुयुः ॥ आयुरारोग्यपुत्रादिसुखश्रीप्राप्तयेमम। आपद्विघ्नविनाशाय शत्रुबुद्धिक्षया-
यच॥ आदित्याद्याग्रहाःसर्वे राहुकेतुपुरःसराः। ग्रहदेवाधिदेवैश्च नक्षत्राणांचदेवतैः ॥ इन्द्रादिभिश्चदिक्पालैर्ब्रह्मविष्णुमहेश्वरैः। वास्तुदुर्गागणे-
शैश्चक्षेत्रपालेनसंयुतैः॥ भौमान्तरिक्षदेवैश्च कुलदेव्याचमातृभिः। चतुर्भिश्चैववेदैश्च रुद्रेणसहितस्तथा॥ स्वागतंवोद्विजश्रेष्ठा मदनुग्रहकारकाः। अय-
मर्घइदंपाद्यं भवद्भिःप्रतिगृह्यताम्॥ चरणक्षालनाद्देवास्तुष्यन्तिशुद्धमानसाः।तज्जलेनचसंसिक्ताः पूर्णाःकामाभवन्तुमे॥ इमंवोऽर्घ्यंप्रयच्छामिगृह्ण
न्तुप्रीतमानसाः। पावयन्तुचमांनित्यं पूरयन्तुमनोरथान्॥ अन्यःकश्चिद्ब्राह्मणःवदति—अर्घोऽर्घोऽर्घःयजमानो वदेत्—प्रतिगृह्णन्ताम्। इत्युक्त्वा
ब्राह्मणहस्तेतदग्रेवाअर्घंस्थापयेत् ॥ ब्राह्मणावदेयुः—प्रतिगृह्णीमः॥ यजमानःहस्तेपूगीफलंगृहीत्वावदेत्—अमुकप्रवरान्वितअमुकगोत्रःशुक्लयजुर्वे-
दाम्नायवाजिमाध्यन्दिनीयशाखाध्यायीअमुकशर्मायजमानोऽहं अमुकप्रवरान्वितअमुकगोत्रं शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनं

---

१ केचन ब्रह्मणोवरणपूर्वकं आचार्यादीनां वरणमाचरन्ति तदयुक्तम् ॥ वसिष्ठः—यजमानः शुचिः स्नातः श्रद्धायुक्तो जितेन्द्रियः ॥ पादशौचार्घवस्त्राद्यैराचार्यादी-
आपः क्षीरं कुशाग्राणि दधि चन्दनम
न्समर्चयेत् ॥ इत्युक्तत्वात्आचार्यपूर्वकमेव ब्रह्मादिऋत्विजां वरणम् ॥ पादशौचार्घवस्त्राद्यैरित्युक्तत्वात् पादार्घकरणमप्यावश्यकम् ॥
क्षताः। दूर्वासिद्धार्थकाश्चेति ह्यष्टाङ्गो ह्यर्घउच्यते ॥ अथवा—दधि दुग्धं यवा दूर्वा गन्धाः सिद्धार्थसंयुताः। जलपुष्पसमायुक्ताः पादार्घो ह्येभिरष्टभिः ॥

अमुकशर्माणंब्राह्मणंअस्मिन्वास्तुशान्त्याख्येकर्मणिआचार्यत्वेनत्वामहंवृणेइत्युक्त्वापूगीफलंदद्यात्॥ यजमानेन दत्तं पूगीफलं गृहीत्वा वदेत्—
ॐवृतोऽस्मि॥ ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ ३०/१९ ॥ वृताय एतत्ते पाद्यं पादा-
वनेजनं पादप्रक्षालनं एषतेऽर्घः॥गन्धाक्षतपुष्पमालादिभिःसम्पूज्य हस्तेरक्तसूत्ररूपकङ्कणबन्धनम्—ॐयदाबध्नन्दाक्षायणाहिरण्यꣳशतानीका-
यसुमनस्यमानाः०॥ तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ५२/३४ ॥ यथाशक्तिसुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रासनोपवीतादि-
वरणसामग्रींदत्त्वावदेत्—आचार्यस्तु यथा स्वर्गेशक्रादीनांबृहस्पतिः। तथात्वंवास्तुयज्ञेऽस्मिन् आचार्योभवसुव्रत॥यावत्कर्मसमाप्येततावत्त्वंआचार्यो
भव ॥ आचार्योवदेत्—भवामि—ॐबृहस्पतेऽअतियदर्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहि-
चित्रम् ॥ ३/२६ ॥ ब्रह्मवरणम्—यजमानःपूगीफलंगृहीत्वावदेत्—अमुकप्रवरान्वितअमुकगोत्रःशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायी
अमुकशर्मायजमानोऽहंअमुकप्रवरान्वितअमुकगोत्रंशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनंअमुकशर्माणंब्राह्मणंअस्मिन्वास्तुशान्त्या
ख्येकर्मणिब्रह्मत्वेन त्वामहंवृणे इत्युक्त्वा पूगीफलं दद्यात्॥ पूगीफलंगृहीत्वावदेत्—ॐवृतोऽस्मि ॥ॐव्रतेनं०॥वृतायएतत्तेपाद्यंपादावनेजनंपाद-
प्रक्षालनंएषतेऽर्घः॥ गन्धाक्षतपुष्पमालादिभिः संपूज्य हस्ते कङ्कणबन्धनम्—ॐयदाबध्नन्दाक्षायणा०॥ यथाशक्तिसुवर्णहस्तमुद्रालङ्कारवस्त्रो-
पवस्त्रासनोपवीतादिवरणसामग्रींदत्त्वावदेत्—यथाचतुर्मुखोब्रह्मासर्वलोकपितामहः।तथा त्वंवास्तुयज्ञेऽस्मिन्ब्रह्माभवद्विजोत्तम॥यावत्कर्मसमाप्येत
तावत्त्वं ब्रह्मा भव ॥ भवामि ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्च-
विवः ॥ ३/१३ ॥ गाणपत्यवरणम्—यजमानः पूगीफलं गृहीत्वा वदेत्—अमुकप्रवरान्वितअमुकगोत्रः शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशा-
खाध्यायीअमुकशर्मायजमानोऽहंअमुकप्रवरान्वितअमुकगोत्रंशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनंअमुकशर्माणंब्राह्मणंअस्मिन्वा
स्तुशान्त्याख्ये कर्मणि गाणपत्यत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात् ॥ पूगीफलंगृहीत्वा वदेत् ॐवृतोऽस्मि ॥ॐव्रतेनं०॥ वृतायएतत्ते

पाद्यंपादावने जनंपादप्रक्षालनंएषतेऽर्घः ॥ गन्धाक्षतपुष्पमालादिभिः संपूज्य हस्ते कङ्कणबन्धनम् ॐयदाबध्नन्दाक्षायणा० ॥ यथाशक्तिसुवर्ण-
हस्तमुद्रालङ्कारवस्त्रोपवस्त्रासनोपवीतादिवरणसामग्रींदत्वावदेत्—वाञ्छितार्थफलावाप्त्यै पूजितोऽसि सुरासुरैः। निर्विघ्नंक्रतुसंसिध्यैत्वामहं गणपं
वृणे ॥ ॐगणानान्त्वा० ॥ सदस्यवरणम्—यजमानःपूगीफलंगृहीत्वावदेत्—अमुकप्रवरान्वित अमुकगोत्रःशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीय-
शाखाध्यायीअमुकशर्मायजमानोऽहंअमुकप्रवरान्वित अमुकगोत्रंशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनंअमुकशर्माणंब्राह्मणं अस्मि-
न्वास्तुशान्त्याख्ये कर्मणि सादस्यत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात्॥ ॐवृतोऽस्मि॥ ॐव्रतेनं०॥वृताय एतत्तेपाद्यंपादावनेजनंपादप्रक्षा-
लनंएषतेऽर्घः गन्धाक्षतपुष्पमालादिभिः संपूज्य हस्तेकङ्कणबन्धनम्—ॐयदाबध्नन्दाक्षायणा०॥ यथाशक्तिसुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रा-
सनोपवीतादिवरणसामग्रींदत्वावदेत्—कर्मणामुपदेष्टारं सर्वकर्मविदुत्तमम्। कर्मिणंवेदतत्त्वज्ञं सदस्यं त्वामहं वृणे ॥ ॐसदसस्पतिमद्भुतम्प्रिय-
मिन्द्रस्यकाम्यम्। सनिम्मेधामयासिषᳬस्वाहा ॥ $\frac{१३}{३२}$ ॥ ऋत्विग्वरणम्—यजमानःपूगीफलंगृहीत्वावदेत्—अमुकप्रवरान्वित अमुकगोत्रःशुक्लय-
जुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायी अमुकशर्मायजमानोऽहंअमुकप्रवरान्वित अमुकगोत्रंशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्या-
यिनंअमुकशर्माणंब्राह्मणंअस्मिन्वास्तुशान्त्याख्येकर्मणिऋत्विक्त्वेनत्वामहंवृणेइत्युक्त्वापूगीफलंदद्यात् ॐव्रतेनं०॥ वृताय एतत्ते पाद्यं पादावने-
जनंपादप्रक्षालनंएषतेऽर्घःगन्धाक्षतपुष्पमालादिभिःसंपूज्य हस्ते कङ्कणबन्धनम्—ॐयदाबध्नन्दाक्षायणा०॥ यथाशक्तिसुवर्णहस्तमुद्रालङ्कार-
वस्त्रोपवस्त्रासनोपवीतादिवरणसामग्रींदत्वावदेत्—यज्ञादिकर्मकार्येषु ऋत्विक्शक्रमखेयथा। तथात्रैववास्तुयागेऽस्मिन्ऋत्विक्त्वंमे मखेभव॥ ॐएता-
वद्रूपन्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ तदेतत्सर्वमाप्नोतियज्ञेसौत्रामणीसुते॥ $\frac{३१}{१९}$ ॥ एवं चतुरोऽष्टौ वा ऋत्विजोवृत्वा प्रार्थयेत्—ब्राह्मणाःसन्तुमे
शस्ताःपापात्पान्तुसमाहिताः। देवानांचैवदातारःशातारःसर्वदेहिनाम् ॥ जपयज्ञैस्तथाहोमैर्दानैश्चविविधैःपुनः। देवानांचऋषीणांचतृप्त्यर्थयाजकाः
कृताः॥ येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्। रक्षन्तु सततं ते मां वास्तुयज्ञेव्यवस्थिताः॥ब्राह्मणाजङ्गमंतीर्थं त्रिषुलोकेषु विश्रुतम्। येषां
वाक्योदकेनैव शुद्ध्यन्ति मलिनाजनाः॥ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः। सर्वकर्मरतानित्यं वेदशास्त्रार्थकोविदाः॥ श्रोत्रियाः सत्य-
वाचश्च वास्तुध्यानरताः सदा। यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः॥ अङ्गीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः। यथोक्तनियमैर्युक्ता मन्त्रार्थे
स्थिरबुद्धयः॥ यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः। वास्तुयागे मयापूज्याः सन्तुमे नियमान्विताः॥ अक्रोधनाः शौचपराः सततंब्रह्मचा-
रिणः। वास्तुध्यानरता नित्यं प्रसन्नमनसःसदा॥ अदुष्टभाषणाः सन्तु मासन्तु परनिन्दकाः। ममापि नियमाह्येते भवन्तु भवतामपि॥ ऋत्विजश्च
यथापूर्वं शक्रादीनां मखेऽभवन्। यूयंतथामेभवतऋत्विजोद्विजसत्तमाः॥ वास्तुयागस्यनिष्पत्त्यैभवन्तोऽभ्यर्थितामया। सुप्रसन्नैः प्रकर्तव्यंशान्तिकं
विधिपूर्वकम् ॥ आचाराद्यजमानहस्ते कङ्कणबन्धनम्——ॐयदाबध्नन्दाक्षायणा०॥यजमानपत्न्याः वामहस्ते कङ्कणबन्धनम्——ॐतम्पत्नी-
भिरनुगच्छेम देवाᳬ पुत्रैर्भ्रातृभिरुत वा हिरण्यैᳬ॥ नाकङ्गृभ्णानाᳬ सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचनेदिवः ॥ $\frac{५०}{१५}$ ॥ इति ऋत्विग्वरणम् ॥

॥ अथ शालाकर्मप्रयोगः ॥

यज्ञ-
शालाभ्यन्तरे प्रादेशमात्रे स्थण्डिले पञ्चभूसंस्काराः—मूलधृतैस्त्रिभिर्दर्भैर्दक्षिणत उदक्संस्थं त्रिः परिसमूह्य ॥ गोमयोदकेनोपलिप्य ॥ यज्ञ-
काष्ठेन स्रुवेण कुशैर्वा दक्षिणत उदक्संस्थं त्रिरुल्लिख्य॥ अनामिकाङ्गुष्ठाभ्यां यथाल्लिखिताभ्यो लेखाभ्यःपांसूनुद्धृत्यप्रतिरेखंन्युब्जमुष्टिनाप्राजा-
पत्यतीर्थेनोदकेनाभ्युक्ष्य॥ कांस्यादिपात्रेणाग्निमादाय तदुपरि स्थापयेत्—स्थाल्यामाज्यं निरुप्य अग्नावधिश्रित्य स्रुवंप्रतप्यदर्भैःसंमृज्य आज्यमु-
द्वास्य कुशतृणाभ्यामुत्पूय अवेक्ष्य आग्नेयकोणे स्तम्भावटे स्रुवेण जुहुयात्॥ ॐअच्युताय भौमायस्वाहा। इदमच्युतायभौमायनमम॥ स्तम्भो-
च्छ्रयणम्—इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम्॥ इहैव ध्रुवां निमिनोमि शालां क्षेमेतिष्ठतुघृतमुक्षमाणा॥अश्वावतीगोमतीसूनृ-
तावत्युच्छ्रयस्व महते सौभगाय ॥ आत्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः॥ आत्वा कुमारस्तरुण आवत्सो जगदैः सह॥ आत्वापरि-
स्रुतः कुम्भ आदध्नः कलशैरुप॥ क्षेमस्य पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सुवीर्यं॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव॥अभिनः पूर्यताᳬ

रयिरिदमनुश्रेयो वसानः॥स्तम्भमूले जलं निक्षिप्यस्तम्भायनमःसकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥नैर्ऋत्यकोणसमीपं गत्वास्तम्भा-
वटेस्रुवेणजुहुयात्—ॐअच्युताय भौमाय स्वाहा। इदमच्युताय भौमाय न मम॥ स्तम्भोच्छ्रयणम्—इमामुच्छ्रयामिभुवनस्यनाभिंवसोर्द्धारांप्रत-
रणींवसूनां॥ इहैव ध्रुवां निमिनोमि शालांक्षेमेतिष्ठतु घृतमुक्षमाणा॥ अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय॥ आत्वा शिशुराक्रन्द-
त्वागावो धेनवो वाश्यमानाः॥ आत्वा कुमारस्तरुण आवत्सो जगदैः सह॥ आत्वा परिस्रुतः कुम्भ आदध्नः कलशैरुप॥ क्षेमस्य पत्नी बृहती
सुवासा रयिं नो धेहि सुभगे सुवीर्यं॥ अश्वावद्गोमदूर्जस्वत्पर्णंवनस्पतेरिव॥ अभिनःपूर्यतां रयिरिदमनुश्रेयोवसानः॥ स्तम्भमूले जलं निक्षिप्य
स्तम्भायनमःसकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ वायव्यकोणसमीपं गत्वास्तम्भावटेस्रुवेणजुहुयात्—ॐअच्युतायभौमायस्वाहा।
इदमच्युताय भौमाय नमम॥ स्तम्भोच्छ्रयणम्—इमामुच्छ्रयामिभुवनस्यनाभिंवसोर्द्धारांप्रतरणींवसूनां॥ इहैवध्रुवांनिमिनोमिशालांक्षेमेतिष्ठतुघृत-
मुक्षमाणा॥ अश्वावतीगोमतीसूनृतावत्युच्छ्रयस्वमहतेसौभगाय॥ आत्वाशिशुराक्रन्दत्वागावोधेनवोवाश्यमानाः॥ आत्वाकुमारस्तरुणआवत्सो
जगदैःसह॥ आत्वापरिस्रुतःकुम्भआदध्नःकलशैरुप॥ क्षेमस्यपत्नीबृहतीसुवासारयिंनोधेहिसुभगेसुवीर्यं॥ अश्वावद्गोमदूर्जस्वत्पर्णवनस्पतेरिव॥
अभिनःपूर्यतां रयिरिदमनुश्रेयोवसानः॥ स्तम्भमूले जलं निक्षिप्यस्तम्भायनमःसकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥ ईशानकोण-
समीपं गत्वा स्तम्भावटे स्रुवेण जुहुयात्—ॐअच्युताय भौमाय स्वाहा। इदमच्युताय भौमाय न मम॥ स्तम्भोच्छ्रयणम्—इमामुच्छ्रयामिभुव-
नस्यनाभिंवसोर्द्धारां प्रतरणीं वसूनां॥ इहैवध्रुवांनिमिनोमि शालांक्षेमेतिष्ठतुघृतमुक्षमाणा॥ अश्वावतीगोमतीसूनृतावत्युच्छ्रयस्वमहते सौभगाय॥
आत्वाशिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः॥ आत्वा कुमारस्तरुण आवत्सोजगदैःसह॥ आत्वा परिस्रुतः कुम्भ आदध्नःकलशैरुप॥ क्षेमस्य
पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सुवीर्यं॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव॥ अभिनः पूर्यतां रयिरिदमनुश्रेयो वसानः॥
स्तम्भमूले जलं निक्षिप्य स्तम्भाय नमःसकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥



## ॥ अथ दिग्रक्षणम् ॥

साचार्यः सपत्नीको यजमानः अग्न्यायतनात्पश्चिमतः स्वासने प्राङ्मुख उपविश्य हस्ते जलमादाय—प्रारब्धस्य वास्तुशान्तिकर्मणोऽङ्गत्वेन दिग्र-
क्षणं पञ्चगव्यकरणं भूमिप्रोक्षणं भूमिप्रार्थनां भूमिकूर्मानन्तपूजनं च करिष्ये—स्ववामहस्ते गौरसर्षपान्गृहीत्वा दक्षिणहस्तेनाच्छाद्य—ॐकृणुष्व
पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ२ऽ इभेन॥ तृष्वीमनु प्रसितिन्द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥ ९/१३॥ तव भ्रमासऽ आशुया
पतन्त्यनुस्पृश धृषता शोशुचानः॥ तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृजविष्वगुल्काः॥ १०/१३॥ प्रति स्पशो विसृज तूर्णितमो भवा
पायुर्विशोऽ अस्याऽ अदब्धः॥ यो नो दूरेऽअघशंसो योऽअन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्॥ ११/१३॥ उदग्ने तिष्ठ प्रत्यातनुष्वन्यमित्राँ२ऽ ओषतात्ति-
ग्महेते॥ यो नोऽअरातिं समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम्॥ १२/१३॥ ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने॥
अवस्थिरातनुहियातुजूनाञ्जामिमजामिम्प्रमृणीहिशत्रून्॥ अग्नेष्ट्वा तेजसा सादयामि॥ १३/१३॥ अपसर्पन्तुतेभूतायेभूताभूमिसंस्थिताः। येभूताविघ्न-
कर्तारस्तेनश्यन्तु शिवाज्ञया। अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्। सर्वेषामवरोधेन वास्तुयागं समारभे॥यदत्र संस्थितंभूतंस्थानमाश्रित्य
सर्वतः। स्थानं त्यक्त्वा तु तत्सर्वंयत्रस्थंतत्रगच्छतु॥ भूतप्रेतपिशाचाद्याअपक्रामन्तु राक्षसाः। स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवन्त्विमाम्।
भूतानि राक्षसावापि येऽत्रतिष्ठन्ति केचन। तेसर्वेप्यपगच्छन्तुवास्तुयागङ्करोम्यहम्॥ इत्येतैर्मन्त्रैरीशानादिसर्वदिक्षुविकिरेत्॥ उदकस्पर्शः॥

### ॥ अथ पञ्चगव्यकरणं भूमिप्रोक्षणञ्च ॥

कांस्यपात्रे गोमूत्रं क्षिपेत्तत्रमन्त्रः—ॐ भूर्भुवः स्वः॥ तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि॥धियो यो नः प्रचोदयात्॥ ३/३६॥ मन्त्रान्ते
गोमूत्रं क्षिप्त्वा ततः गोमयं क्षिपेत्—ॐमा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः॥ मा नो वीरान्रुद्र भामिनोवधीर्ह-

विष्ष्मन्तु सदमिस्त्वा हवामहे ॥१६/१६॥ मन्त्रान्ते गोमयं क्षिप्त्वा ततः क्षीरं क्षिपेत्—ॐआप्यायस्व समेतुतेव्विश्वतः सोमवृष्ण्यम् ॥ भवावाजस्य
सङ्गथे ॥११२/१२॥ मन्त्रान्ते दुग्धं क्षिप्त्वा ततः दधि क्षिपेत्—ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूंषि
पितारिषत् ॥३२/२३॥ मन्त्रान्ते दधि क्षिप्त्वा ततः आज्यं क्षिपेत्—ॐतेजोऽसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि
॥३१/१॥ मन्त्रान्तेआज्यं क्षिप्त्वा ततः कुशोदकं क्षिपेत् ॐदेवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥१०/१॥ मन्त्रान्ते
कुशोदकं क्षिप्त्वा ॐ इति प्रणवेन यज्ञकाष्ठेनालोड्य प्रणवेनाभिमन्त्र्य कर्मभूमिं यज्ञसंभारान् सर्वगृहं च प्रोक्षेत्—ॐआपो हि ष्ठा मयोभुव-
स्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥१४/३६॥ योवः शिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः ॥१५/३६॥ तस्माऽअरङ्गमामवोयस्य
क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥ १६/३६ ॥ इत्येतैर्मन्त्रैः कर्मभूमिं यज्ञसम्भारान् सर्वगृहं च कुशैः सम्प्रोक्षयेत् ॥

अथ भूमिप्रार्थना—हस्तौ बध्वा भूमिं सम्प्रार्थयेत्—ॐस्योनापृथिविनो० ॥ ॐमहीद्यौः० ॥ इत्येताभ्यां ऋग्भ्यां सम्प्रार्थयेत्॥
ॐस्वस्तिनऽइन्द्रोवृद्धश्रवाः० ॥ ॐदेवा आयान्तु ॥ यातुधाना अपयान्तु ॥ विष्णो देवयजनं रक्षस्व इति पठित्वा भूमौ प्रादेशं कुर्यात् ॥

## ॥ अथभूमिकूर्मानन्तपूजनम् ॥

गृहमध्येत्रिमेखलंयोनिसहितंहस्तमितंचतुरस्रंकुण्डंविरच्यतदग्रेअक्षतपुञ्जेषुपूगीफलेषुवाभूमिकूर्मानन्तानांपूजनम्- भूरसीत्यस्यप्रस्तारपङ्क्तिऋषिः
अनुष्टुप्छन्दःभूमिर्देवताभूम्यावाहनेविनियोगः—ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवीं यच्छपृथिवीन्दृंह
पृथिवीम्माहिंसीः ॥१८/१३॥ ॐभूम्यैनमः भूमिं आवाहयामि ॥ यस्यकुर्मेत्यस्यप्रजापतिऋषिः अनुष्टुप्छन्दःकूर्मोदेवताकूर्मावाहनेविनियोगः—ॐयस्य
कुर्म्मोगृहेहविस्तमग्नेवर्द्धयात्वम् ॥ तस्मैदेवाऽअधिब्रुवन्नयञ्चब्रह्मणस्पतिः ॥५२/१७॥ ॐकूर्माय नमः कूर्मं आवाहयामि ॥ स्योनापृथिवीत्यस्यमे-
धातिथिऋषिः अनन्तोदेवतागायत्रीछन्दः अनन्तावाहनेविनियोगः—ॐस्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥१३/३६॥
ॐअनन्ताय नमः अनन्तं आवाहयामि ॥ ॐप्रतिष्ठापनम्—ॐमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ॥
विश्वेदेवासऽइहमादयन्तामोꣳ३म्प्रतिष्ठ ॥ १३/२ ॥ भूकूर्मानन्तदेवताःसुप्रतिष्ठिताःवरदाःभवत ॥ ॐभूकूर्मानन्तदेवताभ्यो नमः इत्यनेन पूजयेत् ॥

अथ वास्तुपीठदेवतापूजनम्[१]—सपत्नीको यजमानः कुण्डस्य नैर्ऋत्यकोणे कृतवास्तुपीठ[२]समीपेपश्चिमाभिमुखउपविश्यआचम्यप्राणा-

---

१ कमलाकरादि ऋक्शाखीयग्रन्थेषु रेखादेवतापूजनानन्तरं अग्निस्थापनं ततो ग्रहस्थापनं कृत्वा मुख्यदैवतवास्तुपूजनं स्वीकृतमस्ति—पंचरात्रग्रन्थे मुख्यदैवत-वास्तुपूजनं ततोऽग्निस्थापनं ततो ग्रहस्थापनमित्यादि क्रमश्चास्माभिः स्वीकृतः ॥ उक्तं च—संकल्पःस्वस्तिवाग्विप्रवरणं भूतनिःसृतिः । पञ्चगव्यैर्भूमिशुद्धिर्मुख्य-दैवतपूजनम् ॥ अग्निप्रतिष्ठासूर्यादिग्रहस्थापनपूजनम् । देवतान्वाहितिः पात्रासादनं हविषांकृतिः ॥ यथाक्रमंत्यागहोमाविति पौर्वाङ्गकक्रमः । पूजा स्विष्टं नवाहुत्यो बलिःपूर्णाहुतिस्तथा । पूर्णपात्रविमोकाग्न्यर्चनान्तेऽभिषेचनम् । मानस्तोकेति भूतिश्च देवपूजाविसर्जने । श्रेयोग्रहो दक्षिणादिदानं कर्मेश्वरार्पणम् ॥ क्रमोऽयमुत्तरा-ङ्गानां प्रायःस्मार्तेष्विति स्थितिः ॥ तथाच—सूत्रोदितं कर्म यथाविधिः स्यात्तथैव कुर्यात्स्वगुरूपदिष्टम् ॥ वेदोक्तमाशीर्वचनं विधेयमादौ स्वशाखी परतोऽन्यशाखी ॥१॥

२ हयशीर्षपञ्चरात्रे—एकाशीतिपदं वास्तु गृहकर्मणिशस्यते । चतुःषष्टिपदो वास्तुः प्रासादे देवभूभुजाम् ॥ सोमशम्भावपि—कुर्यात्कोष्ठचतुःषष्टिः प्रासादेवास्तुकर्माणि । गृहेऽपिवर्तयेद्वास्तुं किन्त्वेकाशीतिकोष्ठकैः ॥ महाकपिलपञ्चरात्रे—प्रासादार्थं चतुःषष्टिरेकाशीतिर्गृहेतथा ॥ अन्यत्रापि—एकाशीतिपदंकृत्वावास्तुश्चैवग्रहादिषु । चतुःषष्टिपदं वास्तुः प्रासादे ब्रह्मणास्मृतम् ॥ राजवल्लभे—ग्रामेभूपतिमन्दिरेचनगरेपूज्यश्चतुषष्टिकैरेकाशीतिपदैः समस्तभवने जीर्णेनवाब्ध्यंशकैः । प्रासादेतुशतांशकैस्तुसकले पूज्यस्तथामण्डपे कूपेषण्णवचन्द्रभागसहिते वाप्यां तडागेवने ॥ शान्तिवि०—दुर्गप्रतिष्ठाविषयेनिवेशेतथामहार्चासुचकोटिहोमे । मरौचराष्ट्रेष्वपिसिद्धलिङ्गेवास्तुः सहस्रेणपदैः प्रपूज्यः ॥ शान्तिकमलाकरादि ऋक्शाखीयग्रन्थेषु कुण्डात्पूर्वभागे चतुरङ्गुलोन्नतं हस्तमितंवास्तुपीठंकरणीयमित्युक्तं परंच नैर्ऋत्यामेव करणं तु बहुसम्मतम् ॥ उक्तं च—भूतप्रेतपिशाचानां राक्षसानां तु नैर्ऋते । निवासोराक्षसानां च तस्मात्पीठंच नैर्ऋते ॥ नैर्ऋतिंयःपरित्यज्य करोत्यन्यत्रदिक्षुचेत् । पीठेद्यावाहितादेवा नायान्ति न सुखप्रदाः ॥ नपूजानचनैवेद्यं परिगृह्णन्तितेयतः । तस्मात्सर्वप्रयत्नेनवास्तुपीठंतु नैर्ऋते ॥ वास्तुशास्त्रे—हस्तमात्रंद्विहस्तं वा पीठं कार्यंतुनैर्ऋते ॥

नायस्य सङ्कल्पः—अद्यपूर्वोच्चरितशुभपुण्यतिथौ प्रारब्धस्य वास्तुयागाख्यस्यकर्मणःसाङ्गतासिद्ध्येएकाशीतिपदे वास्तुपीठे शिख्यादिवास्तुम-
ण्डलदेवतावाहनप्रतिष्ठापूजनं करिष्ये ॥ वास्तुपीठस्याग्नेय्यां शङ्कुरोपणम्—विशन्तु भूतले नागा लोकपालाश्च सर्वतः । अस्मिन्गृहेऽवतिष्ठन्तु
ह्यायुर्बलकराः सदा ॥ नैर्ऋत्यांशङ्कुरोपणम्—विशन्तु भूतले नागा लोकपालाश्च सर्वतः । अस्मिन्गृहेऽवतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ वायव्यां
शङ्कुरोपणम्—विशन्तु भूतलेनागा लोकपालाश्च सर्वतः । अस्मिन्गृहेऽवतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ ऐशान्यां शङ्कुरोपणम्—विशन्तु भूतले नागा
लोकपालाश्च सर्वतः। अस्मिन्गृहेऽवतिष्ठन्तु ह्यायुर्बलकराःसदा॥एवंचतुर्पुकोणेपुशङ्कुरोपणंकृत्वाद्विगुणीकृतसूत्रेणसर्वेषांवेष्टनंकुर्यात्॥आग्नेय्यादि-
रोपणक्रमेण शङ्कूनांपार्श्वेमाषभक्तदध्योदनबलिदानम्— अग्निकोणशङ्कुसमीपे बलिं संस्थाप्य ॐअग्निभ्योप्यथसर्पेभ्योयेचान्ये तान्समाश्रिताः ।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ नैर्ऋत्यकोणशङ्कुसमीपे बलिं संस्थाप्य—ॐनैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः । तेभ्यो
बलिं प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ वायव्यकोणशङ्कुसमीपे बलिं संस्थाप्य—ॐनमोवैवायुरक्षोभ्यो ये चान्येतान्समाश्रिताः । बलिं तेभ्यः
प्रयच्छामि पुण्यमोदनमुत्तमम्॥ऐशानकोणशङ्कुसमीपेबलिं संस्थाप्य—ॐरुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतान्समाश्रिताः। बलिं तेभ्यःप्रयच्छामिगृह्णन्तु
सततोत्सुकाः ॥ शङ्कुदेवताभ्यो नमः बलिं समर्पयामि । शङ्कुदेवताभ्यो नमः इति नाममन्त्रेण यथामिलितोपचारैः पूजयेत् ॥

अथ रेखाकरणं पूजनञ्च—वास्तुपीठे वस्त्रं प्रसार्य कनकशलाकया रत्नेन रजतफलपुष्पाणामन्यतमेन वा पश्चिमामारभ्य प्रागन्ता

---

खण्डदीक्षितरुद्रपद्धतावपि—द्वादशाङ्गुलोच्चाहस्तविस्तृता द्विवप्रातत्रप्रथमोवप्रोद्व्यङ्गुलोच्चः द्वितीयस्त्र्यङ्गुलोच्चः तदुपरिसप्ताङ्गुलोच्चावास्तुवेदी ॥ अयमेवपक्षःकल्पद्रुमकारै-
रप्यङ्गीकृतः ॥ काशिदीक्षितरुद्रपद्धतावपि—ईशान्ये रुद्रपीठं स्यान्नैर्ऋत्ये वास्तुवेदिका । आग्नेय्यां मातृकापीठं उत्तरे स्नानवेदिका ॥ वैष्णवसिद्धान्ते च—गणेश-
पीठमाग्नेय्यां हस्तमात्रं तु कारयेत् । नैर्ऋत्यां वास्तुपीठं च तद्वत्कुर्याद्विचक्षणः ॥



उदक्संस्थाः समा द्व्यङ्गुलान्तरा गृहवास्तुत्वादेकाशीतिपदमण्डलार्थेदशरेखाः कुर्यात् ॥ तद्यथा—१ ॐशान्तायै नमः ॥ २ ॐयशोवत्यै नमः ॥
३ ॐकान्तायै नमः ॥ ४ ॐविशालायै नमः ॥ ५ ॐप्राणवाहिन्यै नमः ॥ ६ ॐसत्यै नमः ॥ ७ ॐसुमत्यै नमः ॥ ८ ॐनन्दायै नमः ॥
९ ॐसुभद्रायै नमः॥१० ॐसुरथायैनमः॥ ततः दक्षिणारम्भाउदगन्ताः प्राक्संस्था दशरेखाः कुर्यात्॥ तद्यथा—१ ॐहिरण्यायै नमः॥२ ॐसुव्रतायै
नमः॥३ ॐलक्ष्म्यै नमः ॥४ ॐविभूत्यै नमः ॥५ ॐविमलायै नमः ॥६ ॐप्रियायै नमः॥७ ॐजयायै नमः॥८ ज्वालायै नमः॥९ ॐविशो-
कायै नमः॥१० इडायै नमः ॥ ॐमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोँ३
म्प्रतिष्ठ ॥ $\frac{१३}{२}$ ॥भो रेखादेवताः सुप्रतिष्ठिता वरदा भवत इति प्रतिष्ठाप्य ॐरेखादेवताभ्यो नमः इति नाममन्त्रेण यथामिलितोपचारैः पूजयेत्॥

॥ वास्तुमण्डलमध्येमण्डूकादिपीठदेवतावाहनम् ॥

१ ॐमण्डूकाय नमः २ ॐमूलप्रकृत्यै नमः ३ ॐआधारशक्त्यै नमः ४ ॐकूर्माय नमः ५ ॐअनन्ताय नमः ६ ॐपृथिव्यै नमः
७ ॐश्वेतद्वीपाय नमः ८ ॐकल्पवृक्षाय नमः ९ ॐरत्नमण्डपाय नमः १० ॐसिंहासनाय नमः इतिमध्ये ॥ प्राच्याम्—१ ॐधर्माय नमः ॥
दक्षिणस्याम्—२ ॐज्ञानाय नमः ॥ प्रतीच्याम्—३ ॐवैराग्याय नमः ॥ उत्तरस्याम्—४ ॐऐश्वर्याय नमः ॥ आग्नेय्याम्—१ ॐअधर्माय
नमः ॥ नैर्ऋत्याम्—२ ॐअज्ञानाय नमः ॥ वायव्याम्—३ ॐअवैराग्याय नमः ॥ ईशान्याम्—४ ॐअनैश्वर्याय नमः ॥ पुनः मध्ये—
१ ॐआत्मने नमः ॥ २ ॐअन्तरात्मने नमः॥ ३ ॐज्ञानात्मने नमः ॥ ४ ॐपरमात्मने नमः ॥ ५ ॐअग्निमण्डलाय नमः ॥ ६ ॐसोममण्डलाय
नमः ॥ ७ ॐसूर्यमण्डलाय नमः ॥ ८ ॐसं सत्त्वाय नमः ॥ ९ ॐरं रजसे नमः ॥ १० ॐतं तमसे नमः ॥ ११ ॐसर्वशक्तिकमलासनाय
नमः ॥ ॐमनोजूति०॥ॐमण्डूकादिपीठदेवताः सुप्रतिष्ठिताः वरदाः भवत॥ॐमण्डूकादिपीठदेवताभ्यो नमः इति नाममन्त्रेण पूजयेत् ॥

॥ अथ वास्तुमण्डलदेवतास्थापनप्रतिष्ठापूजनम् ॥

१ तमीशानमित्यस्य गौतमऋषिः जगतीछन्दः शिखीदेवता शिख्यावाहने विनियोगः ॥ ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धि-यञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ १८/२५ ॥ ऐशानकोणपदे वास्तोः शिरसि-ॐभूर्भुवः स्वः शिखिने नमः शिखिनं आवाहयामि स्थापयामि ॥ भो शिखिन् इहागच्छ इहतिष्ठ ॥

१ मात्स्ये—गृहे प्रासादादौ च शिख्यादिक्रम एव विहितः ॥ उक्तं च-प्रासादादौ गृहे चैव शिख्यादिक्रमईरितः ॥ वास्तोश्चतुरस्रं शरीरं देवा आक्रम्यस्थिता इति तद्देवतापदे च तत्तद्देवानामावाहनम् ॥ अथ नाममन्त्रेण दशरेखात्मके एकाशीतिपदे गृहवास्तुपीठे शिख्यादिवास्तुदेवतावाहनम्—

१ ऐशानकोणपदेवास्तोःशिरसि-ॐशिखिनेनमःशिखिनंआ०स्थापयामि ॥
२ तद्दक्षिणैकपदे दक्षिणनेत्रे ॐपर्जन्याय नमः पर्जन्यं आवा० स्थापयामि ॥
३ तद्दक्षिणपदद्वये दक्षिणश्रोत्रे-ॐजयन्ताय नमः जयन्तं आ० स्था० ॥
४ तद्दक्षिणपदद्वये दक्षिणांसे-ॐकुलिशायुधायनमःकुलिशायुधं आ०स्था०॥
५ तद्दक्षिणपदद्वये दक्षिणबाहौ—ॐसूर्याय नमः सूर्यं आ० स्थापयामि ॥
६ तद्दक्षिणपदद्वये दक्षिणप्रबाहौ—ॐसत्याय नमः सत्यं आ० स्था० ॥
७ तद्दक्षिणपदद्वये दक्षिणकूर्परे—ॐ भृशाय नमः भृशं आ० स्थापयामि॥
८ तद्दक्षिणैकपदे दक्षिणप्रबाहौ-ॐआकाशाय नमःआकाशंआ०स्था०॥
९ तद्दक्षिणाग्नेयकोणपदे दक्षिणप्रबाहौ—ॐवायवेनमः वायुं आ० स्था०॥
१० तत्पश्चिमैकपदे दक्षिणमणिबन्धे-ॐपूष्णे नमः पूषणं आ० स्था० ॥
११ तत्पश्चिमपदद्वये दक्षिणपार्श्वे-ॐवितथाय नमः वितथं आ० स्था० ॥
१२ तत्पश्चिमपदद्वये दक्षिणपार्श्वे-ॐ गृहक्षताय नमः गृहक्षतं आ०स्था०
१३ तत्पश्चिमपदद्वये दक्षिणोरुभागे-ॐयमायनमःयमंआ०स्था०॥उदकस्पर्शः
१४ तत्पश्चिमपदद्वये दक्षिणजानौ-ॐगन्धर्वाय नमः गन्धर्वं आ० स्था० ॥
१५ तत्पश्चिमपदद्वये दक्षिणजङ्घायाम्-ॐभृङ्गराजायनमःभृङ्गराजंआ०स्था०।
१६ पश्चिमोपरिस्थितैकपदे दक्षिणस्फिचि-ॐमृगाय नमः मृगं आ० स्था० ॥
१७ तत्पश्चिमेनैर्ऋत्यकोणपदे-ॐपितृभ्यो नमः पितॄन् आ०स्था०॥उदक०॥
१८ तदुत्तरैकपदे वामस्फिचि-ॐदौवारिकाय नमः दौवारिकं आ० स्था० ॥
१९ तदुत्तरपदद्वयेवामजङ्घायाम्-ॐसुग्रीवाय नमः सुग्रीवं आ० स्थापयामि ॥
२० तदुत्तरपदद्वये वामजानौ-ॐपुष्पदन्ताय नमः पुष्पदन्तं आ० स्था० ॥

२ महाँ२ऽइन्द्रइति भारद्वाजऋषिःत्रिष्टुप्छन्दः पर्जन्यो देवता। पर्जन्यावाहने विनियोगः॥ ॐमहाँ२ऽ इन्द्रो वज्रऽ ओजसा पर्जन्यो वृष्टिमाँ२ऽ इव। स्तोमैर्वत्सस्य वावृधे ॥ उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥ ४०/७ ॥ तद्दक्षिणैकपदे दक्षिणनेत्रे-ॐभूर्भुवः स्वः पर्जन्याय नमः पर्जन्यं आवाहयामि स्थापयामि ॥ भोपर्जन्य इहागच्छ इह तिष्ठ ॥

२१ तदुत्तरपदद्वये वामोरौ-ॐवरुणाय नमः वरुणं आवाह० स्थापयामि ॥
२२ तदुत्तरपदद्वये वामपार्श्वे-ॐअसुरायनमःअसुरंआवाहयामिस्था०उदकस्प०
२३ तदुत्तरपदद्वये वामपार्श्वे-ॐशोषाय नमः शोषं आवाहयामि स्था० ॥
२४ तदुत्तरोपरिस्थितैकपदे वाममणिबन्धे-ॐपापाय नमः पापं आ० स्था० ॥
२५ तदुत्तरवायव्यकोणपदे वामबाहौ-ॐरोगाय नमः रोगं आ० स्था० ॥
२६ तत्प्रागेकपदे वामप्रबाहौ-ॐअहये नमः अहिं आवाहयामि स्थापयामि॥
२७ तत्प्राक्पदद्वये वामकूर्परे-ॐमुख्याय नमः मुख्यं आवाहयामि स्था० ॥
२८ तत्प्राक्पदद्वये वामबाहौ-ॐभल्लाटाय नमः भल्लाटं आवाहयामि स्था० ॥
२९ तत्प्राक्पदद्वये वामबाहौ-ॐसोमाय नमः सोमं आवाहयामि स्थापयामि ॥
३० तत्प्राक्पदद्वयेवामांसे-ॐसर्पाय नमः सर्पं आवाहयामि स्थापयामि ॥
३१ तत्प्राक्पदद्वये वामश्रोत्रे ॐअदित्यै नमः अदितिं आवाहयामि स्था० ॥
३२ तत्प्रागुपरिस्थितैकपदे वामनेत्रे-ॐदित्यै नमः दितिं आ० स्थापयामि ॥
३३ तद्दक्षिणेशिखिपदाधः कोणपदेमुखे-ॐआपाय नमः आपं आ० स्था०॥
३४ आग्नेयवायुपदाधःकोणपदे दक्षिणहस्ते-ॐसावित्रायनमःसावित्रं आ०स्था०।
३५ नैर्ऋत्यपितृपदाधःकोणपदे-ॐजयाय नमः जयं आ० स्थापयामि ॥
३६ वायव्यरोगपदाधः कोणपदे-ॐरुद्राय नमः रुद्रं आवाहयामि स्था० ॥
३७ मध्येनवपदात्पूर्वपदत्रये दक्षिणस्तने-ॐअर्यम्णे नमःअर्यमणं आ०स्था०॥
३८ तद्दक्षिणाग्नेयकोणैकपदे दक्षिणहस्ते-ॐ सवित्रे नमः सवितारं आ०स्था०॥
३९ तत्पश्चिमपदत्रये जठरदक्षिणे-ॐविवस्वतेनमः विवस्वन्तं आ० स्था० ॥
४० तत्पश्चिमनैर्ऋत्यकोणैकपदे वृषणयोः-ॐविबुधा० विबुधाधिपं आ०स्था०॥
४१ तदुत्तरपदत्रये जठरवामभागे—ॐमित्राय नमः मित्रं आ० स्थापयामि ॥
४२ तदुत्तरवायव्यकोणैकपदे वामहस्ते-ॐराजयक्ष्मणेनमः राजय०आ०स्था०॥
४३ तत्प्राक्पदत्रये वामस्तने-ॐपृथ्वीधराय नमः पृथ्वीधरं आ० स्था० ॥
४४ तत्प्राक्ईशानकोणैकपदे उरसि-ॐआपवत्सायनमः आपवत्सं आ०स्था०॥
४५ मध्येनवपदेषु ब्रह्मभ्योर्मध्ये—ॐब्रह्मणेनमः ब्रह्माणं आ० स्थापयामि ॥

॥ इतिपञ्चचत्वारिंशत्मण्डलदेवतास्थापनम् ॥

॥ अथ मण्डलाद्बहिः श्वेतपरिधौ देवतास्थापनम् ॥

४६ ईशान्याम्-ॐचरक्यै नमः चरकीं आवाहयामि स्थापयामि ॥

३ उदुत्यमितिप्रस्कण्वऋषिः गायत्रीछन्दः जयन्तो देवता । जयन्तावाहने विनियोगः ॥ ॐउदु त्यञ्जातवेदसं देवं वहन्ति केतवः ॥ दृशेविश्वायसूर्यम् ॥ ३१/३३ ॥ तद्दक्षिणपदद्वयेदक्षिणश्रोत्रे–ॐभूर्भुवःस्वःजयन्तायनमः जयन्तं आवाहयामि स्था०॥भोजयन्त इहागच्छ इहतिष्ठ ॥

४७ आग्नेय्याम्–ॐविदार्यै नमः विदारीं आवाहयामि स्थापयामि ॥
४८ नैर्ऋत्याम्–ॐपूतनायै नमः पूतनां आवाहयामि स्थापयामि ॥
४९ वायव्याम्–ॐपापराक्षस्यै नमः पापराक्षसीं आवाहयामि स्थापयामि ॥
५० मण्डलाद्बहिः पूर्वे–ॐ स्कन्दाय नमः स्कन्दं आवाहयामि स्थापयामि ॥
५१ दक्षिणे–ॐअर्यम्णे नमः अर्यमणं आवाहयामि स्थापयामि ॥
५२ पश्चिमे–ॐजृम्भकाय नमः जृम्भकं आवाहयामि स्थापयामि ॥
५३ उत्तरे–ॐपिलिपिच्छाय नमः पिलिपिच्छं आवाहयामि स्थापयामि ॥

॥ मण्डलाद्बहिः द्वितीयरक्तपरिधौ देवतास्थापनम् ॥

५४ पूर्वे–ॐइन्द्राय नमः इन्द्रं आवाहयामि स्थापयामि ॥
५५ आग्नेय्याम्–ॐअग्नये नमः अग्निं आवाहयामि स्थापयामि ॥
५६ दक्षिणस्याम्–ॐयमाय नमः यमं आवाहयामि स्थापयामि ॥
५७ नैर्ऋत्याम्–ॐनिर्ऋतये नमः निर्ऋतिं आवाहयामि स्थापयामि ॥
५८ पश्चिमे–ॐवरुणाय नमः वरुणं आवाहयामि स्थापयामि ॥
५९ वायव्याम्–ॐवायवे नमः वायुं आवाहयामि स्थापयामि ॥
६० उत्तरे–ॐकुबेराय नमः कुबेरं आवाहयामि स्थापयामि ॥
६१ ईशान्याम्–ॐईश्वराय नमः ईश्वरं आवाहयामि स्थापयामि ॥
६२ पूर्वेशानयोर्मध्ये–ॐब्रह्मणे नमः ब्रह्माणं आवाहयामि स्थापयामि ॥
६३ निर्ऋतिपश्चिमयोर्मध्ये–ॐअनन्तायनमःअनन्तं आवाहयामि स्थापयामि ॥
६४ पूर्वेइन्द्रादुत्तरतः–ॐउग्रसेनाय नमः उग्रसेनं आवाहयामि स्थापयामि ॥
६५ दक्षिणेयमादुत्तरतः–ॐडामराय नमः डामरं आवाहयामि स्थापयामि ॥
६६ पश्चिमेवरुणादुत्तरतः–ॐमहाकालाय नमः महाकालं आवाहयामि स्था०॥
६७ उत्तरेसोमादुत्तरतः–ॐपिलिपित्साय नमः पिलिपित्सं आवाहयामि स्था० ॥
६८ तृतीयकृष्णपरिधौ देवतास्थापनम्–पूर्वेॐहेतुकायनमः हेतुकंआ०स्था०॥
६९ आग्नेय्याम्–ॐत्रिपुरान्तकायनमः त्रिपुरान्तकं आवाहयामि स्थापयामि ॥
७० दक्षिणे–ॐअग्निवैतालाय नमः अग्निवैतालं आवाहयामि स्थापयामि ॥
७१ नैर्ऋत्याम्–ॐअसिवैतालाय नमः असिवैतालं आवाहयामि स्थापयामि ॥
७२ पश्चिमे–ॐकालाय नमः कालं आवाहयामि स्थापयामि ॥
७३ वायव्याम्–ॐकरालायनमः करालं आवाहयामि स्थापयामि ॥
७४ उत्तरे–ॐएकपादाय नमः एकपादं आवाहयामि स्थापयामि ॥
७५ ईशान्याम्–ॐभीमरूपाय नमः भीमरूपं आवाहयामि स्थापयामि ॥
७६ पूर्वेशानयोर्मध्ये–ॐखेचराय नमः खेचरं आवाहयामि स्थापयामि ॥
७७ निर्ऋतिपश्चिमयोर्मध्ये–ॐतलवासिने नमः तलवासिनं आ० स्था० ॥

४ इन्द्रआसान्नेतेति अप्रतिरथऋषिः त्रिष्टुप्छन्दः कुलिशायुधो देवता । कुलिशायुधावाहने विनियोगः ॥ ॐइन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञः पुरऽ एतु सोमः ॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतोयन्त्वग्रम् ॥ ४०/१७ ॥ तद्दक्षिणपदद्वये दक्षिणांसे–ॐभूर्भुवः स्वः कुलिशायुधाय नमः कुलिशायुधं आवाहयामि स्थापयामि ॥ भो कुलिशायुध इहागच्छ इह तिष्ठ ॥

५ सूर्यरश्मिरिति अप्रतिरथऋषिः त्रिष्टुप्छन्दः सूर्योदेवता सूर्यावाहने विनियोगः—ॐसूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२ऽ अजस्रम् ॥ तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥ ५८/१७ ॥ तद्दक्षिणपदद्वये दक्षिणबाहौ–ॐभूर्भुवः स्वः सूर्याय नमः सूर्यं आवाहयामि स्थापयामि ॥ भो सूर्य इहागच्छ इह तिष्ठ ॥

६ व्रतेनदीक्षामितिभरद्वाजऋषिः अनुष्टुप्छन्दः सत्योदेवतासत्यावाहने विनियोगः—ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ ३०/१९ ॥ तद्दक्षिणपदद्वयेदक्षिणप्रबाहौ ॐभूर्भुवःस्वःसत्यायनमःसत्यं आ०स्था०भोसत्यइहा०इह० ॥

७ भायैदार्वाहारमिति मेधातिथिऋषिः यजुश्छन्दः भृशो देवता । भृशावाहने विनियोगः ॥ ॐभायै दार्वाहारं प्रभायाऽ अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारन्देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारः सर्वेभ्यो लोकेभ्यऽ उपसेक्तारमवऽऋत्यै वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय रजयित्रीम् ॥ १२/३० ॥ तद्दक्षिणपदद्वये दक्षिणकूर्परे ॐभूर्भुवः स्वः भृशाय नमः भृशं आवाहयामि स्थापयामि भो भृश इहागच्छ इह तिष्ठ ॥

८ हꣳसःशुचिषदिति वामदेवऋषिः जगतीछन्दः आकाशो देवता । आकाशावाहने विनियोगः ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽ ऋतजाऽ अद्रिजाऽ ऋतं बृहत् ॥ २४/१० ॥ तद्दक्षिणैकपदे दक्षिणप्रबाहौ ॐभूर्भुवः स्वः आकाशाय नमः आकाशं आवाहयामि स्थापयामि ॥ भो आकाश इहागच्छ इह तिष्ठ ॥

९ अप्स्वग्नइति विरूपाक्षऋषिः गायत्रीछन्दः वायुर्देवता । वाय्वावाहने विनियोगः ॥ ॐअप्स्वग्नेसधिष्टव सौषधीरनु रुध्यसे ॥ गर्भे सञ्जायसे पुनः ॥ ३६/१२ ॥ तद्दक्षिणाग्नेयकोणपदे दक्षिणप्रबाहौ—ॐभूर्भुवः स्वः वायवे नमः वायुं आ० स्था०॥भो वायो इहागच्छ इह तिष्ठ॥

१० पूषापञ्चाक्षरेणेतिप्रजापति ऋषिः यजुश्छन्दः पूषादेवता । पूषावाहने विनियोगः ॥ ॐपूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउज्जेषं सविताषडक्षरेणषडृतूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेणसप्तग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥ ३२/९ ॥ तत्पश्चिमैकपदे दक्षिणमणिबन्धे—ॐभूर्भुवः स्वः पूष्णे नमः पूषणं आवाहयामि स्थापयामि ॥ भोपूषन्निहागच्छ इह तिष्ठ ॥

११ सवितामथमेहन्निति परमेष्ठीऋषिः गायत्रीछन्दः वितथो देवता ॥ वितथावाहने विनियोगः ॥ ॐसविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पञ्चमऽ ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे ॥ मित्रो नवमे वरुणो दशमऽ इन्द्रऽएकादशे विश्वेदेवा द्वादशे ॥ ६/३९ ॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वे ॐभूर्भुवः स्वः वितथाय नमः वितथं आवाहयामि स्थापयामि॥ भो वितथ इहागच्छ इह तिष्ठ ॥

१२ गृहामेतिबृहस्पतिऋषिः त्रिष्टुप्छन्दः गृहक्षतो देवता । गृहक्षतावाहने विनियोगः॥ॐगृहा मा बिभीत मा वेपध्वमूर्ज्जम्बिभ्रतऽ एमसि॥ ऊर्ज्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥ ४१/३ ॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वे ॐभूर्भुवः स्वः गृहक्षताय नमः गृहक्षतं आवाहयामि स्थापयामि ॥ भो गृहक्षत इहागच्छ इह तिष्ठ ॥

१३ असियमइति भार्गवोजमदग्निर्दीर्घतमा ऋषयः त्रिष्टुप्छन्दः यमो देवता । यमावाहने विनियोगः ॥ ॐअसि यमोऽ अस्यादित्योऽ अर्वन्नसि त्रितो गुह्येन व्रतेन ॥ असि सोमेन समया विपृक्तऽ आहुस्ते त्रीणि दिवि बन्धनानि ॥ १४/२९ ॥ तत्पश्चिमपदद्वये दक्षिणोरुभागे ॐभूर्भुवः स्वः यमाय नमः यमं आवाहयामि स्थापयामि ॥ भोयम इहागच्छ इह तिष्ठ ॥ उदकस्पर्शः ॥

१४ गन्धर्वस्त्वेतिप्रजापतिर्ऋषिः गायत्रीछन्दः गन्धर्वो देवता । गन्धर्वावाहने विनियोगः ॥ ॐगन्धर्वस्त्वाविश्वावसुः परिदधातुविश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः॥इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः॥मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः ॥३/२॥ तत्पश्चिमे पदद्वये दक्षिणजानौ—ॐभूर्भुवः स्वः गन्धर्वाय नमः गन्धर्वं आवाहयामि स्थापयामि ॥ भो गन्धर्व इहागच्छ इहतिष्ठ ॥

१५ कस्त्वा युनक्तीति प्रजापतिर्ऋषिः यजुश्छन्दः भृङ्गराजो देवता । भृङ्गराजावाहने विनियोगः॥ ॐकस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ॥ कर्मणे वां वेषाय वाम् ॥ ६/१ ॥ तत्पश्चिमपदद्वये दक्षिणजङ्घायाम् ॐभूर्भुवः स्वः भृङ्गराजाय नमः भृङ्गराजं आवाहयामि स्थापयामि ॥ भो भृङ्गराज इहागच्छ इहतिष्ठ ॥

१६ चन्द्रमामनस इति नारायणऋषिः अनुष्टुप्छन्दः मृगो देवता । मृगावाहने विनियोगः ॥ ॐचन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत।श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥१२/३१॥पश्चिमोपरिस्थितैकपदेदक्षिणस्फिचि—ॐभूर्भु०मृगा०मृगं आ०स्था०भोमृग इहा०इह तिष्ठ॥

१७ पितृभ्यःस्वधेतिप्रजापत्यश्विनौसरस्वत्येन्द्राऋषयः सर्वाणियजूंषि छन्दांसि पितरोदेवताः । पित्रावाहने विनियोगः ॥ ॐपितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमःप्रपितामहेभ्यःस्वधायिभ्यः स्वधानमः ॥ अक्षन्पितरोऽमीमदन्तपितरोतीतृपन्तापितरःपितरःशुन्धध्वम्॥३६/१९॥तत्पश्चिमेनैर्ऋत्यकोणपदे ॐभू०पितृभ्योनमःपितॄन् आ०स्था०॥भोपितरःइहागच्छतइहतिष्ठत॥उदकस्पर्शः॥

१८ आब्रह्मन्नितिप्रजापतिर्ऋषिःयजुश्छन्दः दौवारिकोदेवता दौवारिकावाहने विनियोगः ॥ ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योऽतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरो

जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां य्योगक्षेमो नः कल्पताम् ॥ २२/२२ ॥ तदुत्तरैकपदेवामस्फिचि–
ॐभूर्भुवः स्वः दौवारिकाय नमः दौवारिकं आवाहयामि स्थापयामि ॥ भो दौवारिक इहागच्छ इह तिष्ठ ॥
ॐसुसमिद्धायशोचिषेघृतन्तीव्रञ्जुहोतन ॥
१९ सुसमिद्धेति आङ्गिरसऋषिः गायत्रीछन्दः सुग्रीवोदेवता । सुग्रीवावाहने विनियोगः॥
अग्नयेजातवेदसे॥ १/३ ॥ तदुत्तरपदद्वयेवामजङ्घायां ॐभूर्भुवः स्वः सुग्रीवायनमः सुग्रीवंआवाहयामि स्थापयामि॥ भो सुग्रीव इहागच्छ इहतिष्ठ ॥
ॐनक्षत्रेभ्यः स्वाहानक्षत्रियेभ्यः
२० नक्षत्रेभ्य इति विरूपाक्षऋषिः अनुष्टुप्छन्दः पुष्पदन्तो देवता । पुष्पदन्तावाहने विनियोगः ॥
स्वाहाहोरात्रेभ्यःस्वाहार्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याᳪस्वाहा
चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा दित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा
मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ २८/२२ ॥ तदुत्तरपदद्वयेवामजानौ–
ॐभूर्भुवःस्वः पुष्पदन्ताय नमः पुष्पदन्तं आवाहयामि स्थापयामि ॥ भो पुष्पदन्त इहागच्छ इहतिष्ठ ॥
ॐवरुणस्योत्तम्भनमसि वरुणस्य
२१ वरुणस्योत्तम्भनमिति गौतमऋषिः यजुश्छन्दः वरुणो देवता । वरुणावाहने विनियोगः ॥
स्कम्भसर्ज्जनीस्थो वरुणस्यऽ ऋतसदन्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ॥ ३६/४ ॥ तदुत्तरपदद्वये वामोरौ–ॐभूर्भुवः
स्वः वरुणाय नमः वरुणं आवाहयामि स्थापयामि ॥ भो वरुण इहागच्छ इह तिष्ठ ॥
ॐये रूपाणि प्रतिमुञ्चमानाऽ असुराः सन्तः
२२ येरूपाणीति प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः असुरो देवता । असुरावाहने विनियोगः ॥
स्वधयाचरन्ति ॥ परापुरोनिपुरो ये भरन्त्यग्निष्ट्वाँल्लोकात्प्रणुदात्यस्मात् ॥ ३०/२ ॥ तदुत्तरपदद्वयेवामपार्श्वे–ॐभूर्भुवः स्वः असुराय नमः असुरं
आवाहयामि स्थापयामि ॥ भो असुर इहागच्छ इह तिष्ठ ॥ उदकस्पर्शः ॥

ॐअसवे स्वाहा वसवे स्वाहा विभुवेस्वाहा
२३ असवे स्वाहेति विरूपाक्षऋषिः अनुष्टुप्छन्दः शोषोदेवता शोषावाहने विनियोगः ॥
विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सᳪसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा
मलिम्लुचायस्वाहादिवापतयतेस्वाहा॥ ३०/२२ ॥तदुत्तरपदद्वये वामपार्श्वे–ॐभूर्भुवःस्वः शोषाय नमः शोषं आ० स्था० ॥ भो शोष इहागच्छ इहतिष्ठ॥
ॐअग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः ॥
२४ अग्नेयुक्ष्वाहीति भरद्वाजऋषिः गायत्रीछन्दः पापो देवता पापावाहने विनियोगः॥
अरं वहन्ति मन्यवे ॥ ३६/१३ ॥ तदुत्तरोपरिस्थितैकपदे वाममणिबन्धे–ॐभूर्भुवः स्वः पापाय नमः पापं आ० स्था०॥ भो पाप इहागच्छ इह तिष्ठ ॥
ॐशिरो मे श्रीर्यशो मुखन्त्विषिः केशाश्च
२५ शिरोमे इति प्रजापतिर्ऋषिः अनुष्टुप्छन्दः रोगो देवता रोगावाहने विनियोगः ।
श्मश्रूणि ॥ राजा मे प्राणोऽ अमृतᳬ सम्राट्चक्षुर्विराट् श्रोत्रम् ॥ ५/२० ॥ तदुत्तरवायव्यकोणपदे वामबाहौ–ॐभूर्भुवः स्वः रोगाय नमः रोगं
आवाहयामि स्थापयामि ॥ भो रोग इहागच्छ इह तिष्ठ ॥
ॐनमोस्तु सर्पेभ्यो ये के च पृथिवी-
२६ नमोस्तुसर्पेभ्य इति प्रजापतिर्ऋषिः अनुष्टुप्छन्दः अहिर्देवता अह्यावाहने विनियोगः ॥
मनु ॥ येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्योनमः॥ ६/१३ ॥तत्प्रागेकपदे वामप्रबाहौ ॐभूर्भुवःस्वःअहयेनमःअहिं आ०स्था०भो अहे इहा०इह तिष्ठ॥
ॐइषे त्वोर्जे त्वा वायव स्थ देवो वः सविता
२७ इषेत्वेति प्रजापतिर्ऋषिः यजुश्छन्दः मुख्यो देवता मुख्यावाहने विनियोगः ॥
प्रार्पयतु श्रेष्ठतमाय कर्म्मणऽ आप्यायध्वमघ्न्याऽ इन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशᳪसो ध्रुवाऽअस्मिन्गोपतौ
स्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥ १/१ ॥ तत्प्राक्पदद्वये वामकूर्परे ॐभूर्भुवःस्वःमुख्याय नमःमुख्यं आ० स्थापयामि ॥ भोमुख्य इहागच्छ इहतिष्ठ ॥
ॐघृताच्यसि जुहूर्नाम्ना सेदम्प्रियेण
२८ घृताच्यसीति प्रजापतिर्ऋषिः यजुश्छन्दः भल्लाटो देवता । भल्लाटावाहने विनियोगः ॥
धाम्ना प्रियᳪसदऽ आसीद घृताच्यस्युपभृन्नाम्नासेदम्प्रियेणधाम्नाप्रियᳪसदऽआसीदघृताच्यसिध्रुवानाम्ना सेदम्प्रियेण धाम्ना प्रियᳪस-

दृऽआसींदप्रियेण धाम्नां प्रियृ सदृऽ आसींद ॥ ध्रुवाऽअंसदभृतस्यय़ोनौतांविष्णोपाहिपाहियज्ञम्पाहियज्ञपतिं पाहि मां यज्ञन्यम् ॥ ६/२ ॥
दृऽआसीदाप्रियेण धाम्नां प्रियृ सदृऽ आसींद ॥ भो भल्लाट इहागच्छ इह तिष्ठ ॥
तत्प्राक्पदद्वये वामबाहौ ॐभूर्भुवः स्वः भल्लाटाय नमः भल्लाटं आवाहयामि स्थापयामि ॥ भो भल्लाट इहागच्छ इह तिष्ठ ॥

तत्प्राक्पदद्वये वामबाहौ ॐभूर्भुवः स्वः भल्लाटाय नमः भल्लाटं आवाहयामि स्थापयामि ॥ ॐव्वयृसोमव्व्रतेतवमनस्तनू पुविब्भ्रतृ ॥

२९ वयृसोमेतिबन्धुर्ऋषिः गायत्रीछन्दः सोमोदेवता सोमावाहने विनियोगः ॥ ॐव्वयृसोमव्व्रतेतवमनस्तनू पुविब्भ्रतृ ॥ प्रजावन्तृसचेमहि ॥ ५६/३ ॥ तत्प्राक्पदद्वये वामबाहौ—ॐभूर्भुवःस्वः सोमाय नमः सोमं आवाहयामि स्थापयामि भो सोम इहागच्छ इह तिष्ठ ॥

३० विष्णोर्नुकमिति दीर्घतमा ऋषिः त्रिष्टुप्छन्दः सर्पोदेवता सर्पावाहने विनियोगः ॥ ॐविष्णोर्नुकं वीर्य्याणि प्रवोचंय? पार्थिवानि विमुमे रजांऽसि ॥ योऽअस्कंभायदुत्तरृ सुधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ १८/५ ॥ तत्प्राक्पदद्वये वामांसे—ॐभूर्भुवः स्वः सर्पाय नमः सर्पं आवाहयामि स्थापयामि भो सर्प इहागच्छ इह तिष्ठ ॥

३१ अदितिर्द्यौरितिगौतमऋषिः त्रिष्टुप्छन्दःअदितिर्देवता अदित्यावाहने विनियोगः ॥ ॐअदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्र? ॥ विश्वेदेवाऽ अदितिृ पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ २३/२५ ॥ तत्प्राक्पदद्वये वामश्रोत्रे ॐअदित्यै नमः आदितिं आवाहयामि स्थापयामि भो अदिते इहागच्छ इह तिष्ठ ॥

३२ ये देवा इति प्रजापतिर्ऋषिः अनुष्टुप्छन्दः दितिर्देवता दित्यावाहने विनियोगः॥ ॐये देवा देवेष्वधि देवत्त्वमायन्ये ब्रह्मणृ पुरऽ एतारोऽ अस्य । येभ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्याऽ अधि स्नुषु ॥ १४/१७ ॥ तत्प्रागुपरिस्थितैकपदे वामनेत्रे—ॐदित्यै नमः दितिं आवाहयामि स्थापयामि ॥ भो दिते इहागच्छ इह तिष्ठ ॥

३३ आपोहिष्ठेति सिन्धुद्वीपऋषिः गायत्रीछन्दः आपो देवता आपावाहने विनियोगः ॥ ॐआपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ५०/११ ॥ तद्दक्षिणे शिखिपदाधः कोणपदे मुखे—ॐआपाय नमः आपं आवाहयामि स्थापयामि ॥ भोआप इहागच्छ इह तिष्ठ॥

३४ वसोः पवित्रमिति परमेष्ठीप्रजापतिर्ऋषिः अनुष्टुप्छन्दः सावित्रो देवता सावित्रावाहने विनियोगः॥ ॐवसोृ पवित्रमसि शतधारं वसोृ पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोृ पवित्रेण शतधारेण सुप्वा कामधुक्षृ ॥ ३/१ ॥ आग्नेयवायुपदाधः कोणपदे दक्षिणहस्ते—ॐसावित्राय नमः सावित्रं आवाहयामि स्थापयामि॥ भो सावित्र इहागच्छ इह तिष्ठ ॥

३५ यदक्रन्द इति भार्गवो जमदग्निर्दीर्घतमाऋषयः त्रिष्टुप्छन्दः जयो देवता जयावाहने विनियोगः ॥ ॐयदक्रन्दृ प्रथमञ्जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यम्महिं जातन्तेऽ अर्वन् ॥ १२/२९ ॥ नैर्ऋत्यपितृपदाधः कोणपदे ॐजयाय नमः जयं आवाहयामि स्थापयामि ॥ भो जय इहागच्छ इह तिष्ठ ॥

३६ यातेरुद्रेति परमेष्ठी ऋषिः अनुष्टुप्छन्दः रुद्रो देवता रुद्रावाहने विनियोगः॥ ॐया ते रुद्र शिवा तनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमया गिरिशन्ताभिचाकशीहि॥ २/१६ ॥वायव्यरोगपदाधःकोणपदे—ॐरुद्रायनमः रुद्रं आवाहयामि स्थापयामि॥ भो रुद्र इ०इ०॥

३७ अर्यमणमिति प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः अर्यमादेवता अर्यमावाहने विनियोगः ॥ ॐअर्यमणम्बृहस्पतिमिन्द्रन्दानाय चोदय ॥ वाचं विष्णुृ सरस्वतीृ सवितारञ्च वाजिनृ स्वाहा ॥ २७/९ ॥ मध्ये नवपदात्पूर्वं पदत्रये दक्षिणस्तने—ॐअर्यम्णे नमः अर्यमणं आवाहयामि स्थापयामि ॥ भो अर्यमन् इहागच्छ इह तिष्ठ ॥

३८ उदुत्त्यमितिप्रस्कण्वऋषिः गायत्रीछन्दः सवितादेवता सवित्रावाहने विनियोगः॥ ॐउदुत्यञ्जातवेदसन्देवंवहन्तिकेतव÷ ॥ दृशे विश्वाय सूर्य्यम् ॥ ३१/३३ ॥ तद्दक्षिणाग्नेयकोणैकपदे दक्षिणहस्ते—ॐसवित्रे नमः सवितारं आ० स्था०॥ भो सवितः इहागच्छ इह तिष्ठ ॥

३९ असियम इति भार्गवो जमदग्निर्दीर्घतमाऋषयः त्रिष्टुप्छन्दः विवस्वान्देवता विवस्वदावाहने विनियोगः॥ ॐअसि यमोऽ अस्यादि-

त्योऽ अब्बन्नसिं त्रितो गुह्येन व्व्रतेन ॥ असि सोमेन समया विपृक्तऽ आहुस्ते त्रीणि दिवि बन्धनानि॥ १४/२९ ॥तत्पश्चिमपदत्रये जठरदक्षिणे-
ॐविवस्वते नमः विवस्वन्तं आवाहयामि स्थापयामि ॥ भो विवस्वन् इहागच्छ इह तिष्ठ ॥
४० सबोधिसूरिरिति सोमाहुतिर्ऋषिः उष्णिक्छन्दः विबुधाधिपतिर्देवता विबुधाधिपत्यावाहने विनियोगः ॥ ॐ स बोधि सूरिर्म्म-
घवा वसुपते वसुदावन् ॥ युयोध्यस्मद्द्वेषांᳬसि विश्वकर्म्मणे स्वाहा ॥ ४३/१२ ॥ तत्पश्चिमनैर्ऋत्यकोणैकपदे वृषणयोः-ॐ विबुधाधिपाय नमः
विबुधाधिपं आवाहयामि स्थापयामि ॥ भो विबुधाधिप इहागच्छ इह तिष्ठ ॥
४१ मित्रस्येति दध्यङ्ङाथर्वणऋषिः यजुश्छन्दः मित्रो देवता मित्रावाहने विनियोगः ॥ ॐ मित्रस्य चर्षणीधृतोवो देवस्य सानसि ॥
द्युम्नश्चित्रश्रवस्तमम् ॥ ६२/११ ॥ तदुत्तरपदत्रये जठरवामभागे-ॐमित्राय नमः मित्रं आवाहयामि स्थापयामि ॥ भो मित्र इहागच्छ इह तिष्ठ॥
४२ नाशयित्रीति आथर्वणभिषक्ऋषिः अनुष्टुप्छन्दः राजयक्ष्मादेवता राजयक्ष्मावाहने विनियोगः ॥ ॐनाशयित्री बलास-
स्यार्शसऽ उपचितामसि ॥ अथो शतस्य यक्ष्माणाम्पाकारोरसि नाशनी॥ ९७/१२ ॥तदुत्तरवायव्यकोणैकपदे वामहस्ते-ॐराजयक्ष्मणे नमः राज-
यक्ष्माणं आवाहयामि स्थापयामि ॥ भो राजयक्ष्मन् इहागच्छ इह तिष्ठ ॥
४३ यद्ग्राम इति प्रजापतिर्ऋषिः अनुष्टुप्छन्दः पृथ्वीधरो देवता पृथ्वीधरावाहने विनियोगः ॥ ॐयद्ग्रामे यदरण्ये यत्सभायां
यदिन्द्रिये ॥ यदेनश्चकृमा वयमिदन्तदवयजामहे स्वाहा ॥ ४५/३ ॥ तत्प्राक्पदत्रये वामस्तने-ॐपृथ्वीधराय नमः पृथ्वीधरं आवाहयामि
स्थापयामि ॥ भो पृथ्वीधर इहागच्छ इह तिष्ठ ॥
४४ इमम्म इति शुनःशेपऋषिः गायत्रीछन्दः आपवत्सो देवता आपवत्सावाहने विनियोगः॥ॐइमम्मे वरुण श्रुधी हवमद्या च मृडय॥
त्वामवस्युरा चके ॥ १/२१ ॥ तत्प्राक् ईशानकोणैकपदे उरसि-ॐआपवत्साय नमः आपवत्सं आ० स्था० ॥ भो आपवत्स इहागच्छ इह तिष्ठ॥



४५ ब्रह्मजज्ञानमिति प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः ब्रह्मादेवता ब्रह्मावाहने विनियोगः ॥ ॐब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः
सुरुचो वेनऽ आवः ॥ स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ३/१३ ॥ मध्ये नवपदेषु ब्रह्माभ्योर्मध्ये-ॐब्रह्मणे
नमः ब्रह्माणं आवाहयामि स्थापयामि ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ इति पञ्चचत्वारिंशन्मण्डलदेवतास्थापनम् ॥

॥ अथ मण्डलाद्बहिः श्वेतपरिधौ ईशानादिविदिक्षु देवतास्थापनम् ॥

४६ इन्धानास्त्वेति अवत्सारऋषिः पङ्क्तिश्छन्दः चरकी देवता चरक्यावाहने विनियोगः ॥ ॐइन्धानास्त्वा शतᳬ हिमा द्युमन्तᳬ समि-
धीमहि ॥ वयस्वन्तो वयस्कृतᳬ सहस्वन्तः सहस्कृतम् ॥ अग्ने सपत्नदम्भनमदब्धासोऽ अदाभ्यम् ॥ चित्रावसो स्वस्ति ते पारमशीय॥ १८/३ ॥
मण्डलाद्बहिः ईशानकोणे-ॐचरक्यै नमः चरकीं आवाहयामि स्थापयामि ॥ भो चरकि इहागच्छ इह तिष्ठ ॥
४७ असुन्वन्तमितिविवस्वानृषिः त्रिष्टुप्छन्दः विदारी देवता विदार्यावाहने विनियोगः ॥ ॐअसुन्वन्तमयजमानमिच्छ स्तेन-
स्येत्यामन्विहि तस्करस्य ॥अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ मण्डलाद्बहिः आग्नेयकोणे-ॐविदार्यै नमः
विदारीं आवाहयामि स्थापयामि ॥ भो विदारि इहागच्छ इह तिष्ठ ॥
४८ कयानश्चित्रइति वामदेवऋषिः गायत्रीछन्दः पूतनादेवता पूतनावाहने विनियोगः ॥ ॐकया नश्चित्रऽ आभुवदूती सदावृधः
सखा ॥ कया शचिष्ठया वृता ॥ ४/३६ ॥ मण्डलाद्बहिः नैर्ऋत्यकोणे-ॐपूतनायै नमः पूतनां आ० स्थापयामि ॥ भो पूतने इहागच्छ इह तिष्ठ॥
४९ इन्द्रऽआसामिति अप्रातिरथऋषिः त्रिष्टुप्छन्दः पापराक्षसी देवता पापराक्षस्यावाहने विनियोगः ॥ ॐइन्द्रऽ आसान्नेता बृह-
स्पतिर्दक्षिणा यज्ञः पुरऽ एतु सोमः ॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥ ४०/१७ ॥ मण्डलाद्बहिः वायव्यकोणे-ॐपापरा-
क्षस्यै नमः पापराक्षसीं आवाहयामि स्थापयामि ॥ भो पापराक्षसि इहागच्छ इह तिष्ठ ॥

॥ अथ मण्डलाद्बहिः श्वेतपरिधौ पूर्वादिदिक्षु देवतास्थापनम् ॥

५० त्वन्नोऽअग्नइति वामदेवऋषिः त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहने विनियोगः ॥ ॐत्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽ अवं यासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ ३/२१ ॥ मण्डलाद्बहिः पूर्वे—ॐस्कन्दाय नमः स्कन्दं आवाहयामि स्थापयामि ॥ भो स्कन्द इहागच्छ इह तिष्ठ ॥

५१ उदग्र सूर इति वसिष्ठऋषिः निच्यृद्गायत्रीछन्दः अर्यमा देवता अर्यमावाहने विनियोगः ॥ ॐउदुग्र सूरऽ उदितेनागा मित्रोऽ अर्यमा ॥ सुवाति सविता भगः ॥ २०/३३ ॥ मण्डलाद्बहिः दक्षिणे—ॐअर्यम्णे नमः अर्यमणं आ० स्था०॥ भो अर्यमन् इहागच्छ इह तिष्ठ॥

५२ कयानश्चित्र इति वामदेवऋषिः गायत्रीछन्दः जृम्भको देवता जृम्भकावाहने विनियोगः ॥ ॐकया नश्चित्रऽ आभुवदूती सदावृधः सखा ॥ कया शचिष्ठया वृता ॥ ४/३६ ॥ मण्डलाद्बहिः पश्चिमे—ॐजृम्भकाय नमः जृम्भकं आ०स्था० । भो जृम्भक इहा०इह तिष्ठ ॥

५३ रक्षोहणमिति वसिष्ठऋषिः यजुश्छन्दः पिलिपिच्छो देवता पिलिपिच्छावाहने विनियोगः॥ ॐरक्षोहणं वलगहनं वैष्णवी-मिदमहन्तं वलगमुत्किरामि यम्मे निष्ट्यो यममात्यो निचखानेदमहन्तं वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ २३/५ ॥ मण्डलाद्बहिः उत्तरे—ॐपिलिपिच्छाय नमः पिलिपिच्छं आवाहयामि स्थापयामि ॥ भो पिलिपिच्छ इहागच्छ इह तिष्ठ ॥

॥ अथ मण्डलाद्बहिः द्वितीयरक्तपरिधौ इन्द्रादिदेवतास्थापनम् ॥

५४ त्रातारमितिगर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रावाहने विनियोगः॥ ॐत्रातारमिन्द्रमवितारमिन्द्रः हवे हवे सुहवः शूरमिन्द्रम्॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रः स्वस्ति नो मघवा धात्विन्द्रः ॥ ५०/२० ॥ मण्डलाद्बहिः पूर्वे—ॐइन्द्राय नमः इन्द्रं आ० स्था० ॥ भो इन्द्र इहा० इह० ॥

५५ त्वन्नोअग्नइति हिरण्यस्तूप आङ्गिरसऋषिः जगतीछन्दः अग्निर्देवता अग्न्यावाहने विनियोगः ॥ ॐत्वन्नोऽ अग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषः रक्षमाणस्तव व्रते ॥ १३/३४ ॥ मण्डलाद्बहिः आग्नेय्याम्—ॐअग्नये नमः अग्निं आवाहयामि स्थापयामि ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥

५६ यमायेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमो देवता यमावाहने विनियोगः॥ ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ९/३८ ॥ मण्डलाद्बहिः दक्षिणे—ॐयमाय नमः यमं आवा० स्थापयामि ॥ भो यम इहागच्छ इह तिष्ठ॥

५७ असुन्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋत्यावाहने विनियोगः ॥ ॐअसुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ मण्डलाद्बहिः नैर्ऋत्याम्—ॐनिर्ऋतये नमः निर्ऋतिं आवाहयामि स्थापयामि ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥

५८ तत्त्वायामीतिशुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः ॥ ॐतत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽ आयुः प्रमोषीः ॥ २/२१ ॥ मण्डलाद्बहिः पश्चिमे—ॐवरुणाय नमः वरुणं आवाहयामि स्थापयामि ॥ भो वरुण इहागच्छ इह तिष्ठ ॥

५९ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वाय्वावाहने विनियोगः ॥ ॐआ नो नियुद्भिः शतिनी-भिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ॥ वायोऽ अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः॥ २८/२७ ॥ मण्डलाद्बहिः वायव्याम्—ॐवायवे नमः वायुं आवाहयामि स्थापयामि ॥ भो वायो इहागच्छ इह तिष्ठ ॥

६० वयꣳसोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमो देवता सोमावाहने विनियोगः॥ॐवयꣳ सोम व्व्रते तव मनस्तनूषु बिभ्रतꣳ ॥ प्रजावन्तꣳ सचेमहि ॥ ५६/३ ॥ मण्डलाद्बहिः उत्तरे—ॐसोमाय नमः सोमं आवाहयामि स्थापयामि ॥ भो सोम इहागच्छ इह तिष्ठ ॥

६१ तमीशानमित्यस्य गौतमऋषिः जगतीछन्दः ईशानो देवता ईशानावाहने विनियोगः ॥ ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धि-यञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धꣳ स्वस्तये ॥ १८/२५ ॥ मण्डलाद्बहिः ईशान्याम्—ॐईशानाय नमः ईशानं आवाहयामि स्थापयामि ॥ भो इशान इहागच्छ इह तिष्ठ ॥

६२ अस्मेरुद्रामेहनेत्यस्य प्रगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः ॥ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाꣳ ॥ यः शꣳसते स्तुवते धायि पज्रऽ इन्द्रज्येष्ठाऽ अस्माँ२ अवन्तु देवाः ॥ ५०/३३ ॥ मण्डलाद्बहिः ईशानेन्द्रयोर्मध्ये—ॐब्रह्मणे नमः ब्रह्माणं आवाहयामि स्थापयामि ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥

६३ स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तो देवता अनन्तावाहने विनियोगः ॥ ॐस्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नꣳ शर्म्म सप्रथाꣳ ॥ १३/३६ ॥ मण्डलाद्बहिः निर्ऋतिवरुणयोर्मध्ये—ॐअनन्ताय नमः अनन्तं आवाहयामि स्थापयामि॥ भो अनन्त इहागच्छ इह तिष्ठ ॥

६४ उग्रइत्यस्यप्रजापतिर्ऋषिःगायत्रीछन्दःउग्रसेनोदेवता उग्रसेनावाहनेविनियोगः ॥ ॐउग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचविक्षिपꣳ स्वाहा ॥ ७/३९ ॥ द्वितीयरक्तपरिधौपूर्वेइन्द्रादुत्तरतः ॐउग्रसेनाय नमः उग्रसेनमावाहयामि स्था०॥ भो उग्रसेन इहा०इह०॥

६५ यातइत्यस्य परमेष्ठीऋषिः आर्षीस्वराडनुष्टुप्छन्दःडामरोदेवताडामरावाहने विनियोगः ॥ ॐयातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २/१६ ॥ द्वितीयरक्तपरिधौ यमादुत्तरतःॐडामरायनमःडामरमावाह०स्था०॥ भोडामरइ० इह०॥

६६ उग्रँल्लोहितेनेत्यस्यप्रजापतिर्ऋषिःनिच्यृद्ब्राह्मीत्रिष्टुप्छन्दः महाकालोदेवता महाकालावाहने विनियोगः॥ उग्रँल्लोहितेनमित्रꣳसौव्रत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाध्यान्प्रमुदा॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तꣳपार्श्व्यम्महादेवस्ययकृच्छर्वस्यवनिष्ठुः पशुपतेꣳ पुरीतत् ॥ ८/३९ ॥ द्वितीयरक्तपरिधौपश्चिमेवरुणादुत्तरतः—ॐमहाकालाय नमः महाकालमावाहयामि स्थापयामि ॥ भो महाकाल इहागच्छ इह तिष्ठ ॥

६७ कास्विदित्यस्य प्रजापतिर्ऋषिः आर्चीत्रिष्टुप्छन्दः पिलिपित्सो देवता पिलिपित्सावाहने विनियोगः॥ ॐका स्विदासीत्पूर्वचित्तिꣳ किꣳस्विदास्विद् बृहद्वयः ॥ का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥ ११/२३ ॥ द्वितीयरक्तपरिधौ सोमादुत्तरतः— ॐपिलिपित्साय नमः पिलिपित्समावाहयामि स्थापयामि ॥ भो पिलिपित्स इहागच्छ इह तिष्ठ ॥

॥ मण्डलाद्बहिः तृतीयकृष्णपरिधौ देवतास्थापनम् ॥

६८ हेमन्तेनेत्यस्यस्वस्त्यात्रेयऋषिःभुरिगार्ष्यनुष्टुप्छन्दःहेतुकोदेवताहेतुकावाहने विनियोगः॥ हेमन्तेनऽऋतुनादेवास्त्रिणवेमरुतस्तुताः॥ बलेनशक्वरीꣳसहोहविरिन्द्रेवयोदधुꣳ ॥ २७/२१ ॥ तृतीयकृष्णपरिधौपूर्वे—ॐहेतुकायनमः हेतुकमावाहयामि स्थापयामि । भोहेतुकइहागच्छ इहतिष्ठ॥

१ अत्रानुस्वारस्थानीꣳकारः ह्रस्वात्परोऽपिह्रस्वएवयाज्ञवल्क्य ५१ शिक्षायाम्—अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते । ह्रस्वं तं तु विजानीयात्सꣳस्थेति निदर्शनम् ॥ उदाहरणन्तु संहितायां ऊनविंशतमाध्यायगत ऊनत्रिंशत्तमेइडाभिर्भक्षानाप्नोतीतिमन्त्रेद्रष्टव्यम् ॥ २ विश्वकर्मप्रकाशपञ्चमाध्याये—नैर्ऋत्यामासिवैताल असुन्वन्तेहेतुकःपूर्वदिक्कृष्णोहेमन्तेनऋतुनातथा । त्रिपुरारिःकृष्णवर्णस्त्र्यम्बकेत्वग्निकोणके॥ अग्निर्वैतालको याम्ये कृष्णोऽग्निन्दूतमित्यपि। एकपादः पीतवर्णः कुविदङ्गेतिचोत्तरे । कालाख्यः पश्चिमे कृष्णो वरुणस्योत्तम्भनं तथा ॥ करालो रक्तवर्णस्तु वातोवा वायुकोणके ॥ नैर्ऋत्यपश्चिमामध्ये तलवासीति पीतकः ॥ ईशानपूर्वयोर्मध्ये खेचरश्चैव पीतकः । गन्धर्वस्त्वेति मन्त्रेण पूज्यमानोऽन्तरिक्षके ॥ भीमरूपस्तथेशाने यमायत्वेति रक्तकः ॥ महीद्यौरितिमन्त्रेण पूजनीयो विधानतः ॥ च श्वेतकः ।

६९ त्र्यम्बकमित्यस्य वसिष्ठऋषिः अनुष्टुप्छन्दः त्रिपुरान्तको देवता त्रिपुरान्तकावाहने विनियोगः॥ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ॥ ६०/३ ॥ तृतीयकृष्णपरिधौ आग्नेय्याम्—ॐत्रिपुरान्तकाय नमः त्रिपुरान्तकमावाहयामि स्थापयामि ॥ भो त्रिपुरान्तक इहागच्छ इह तिष्ठ ॥

७० अग्निमित्यस्य विश्वरूपऋषिः गायत्रीछन्दः अग्निवैतालो देवता अग्निवैतालावाहने विनियोगः॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२ऽआसादयादिह ॥ १७/२२ ॥ तृतीयकृष्णपरिधौदक्षिणे—ॐअग्निवैतालायनमःअग्निवैतालमावाहयामि स्था०॥भो अग्निवैतालइ०इह०॥

७१ असुन्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः असिवैतालो देवता असिवैतालावाहने विनियोगः ॥ ॐअसुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ तृतीयकृष्णपरिधौ नैर्ऋत्यां ॐअसिवैतालाय नमः आसिवैतालमावाहयामि स्थापयामि ॥ भो असिवैताल इहागच्छ इह तिष्ठ ॥

७२ वरुणस्येत्यस्य वत्सऋषिः विराड्ब्राह्मी बृहतीछन्दः कालो देवता कालावाहने विनियोगः॥ ॐवरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽ ऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ॥ ३६/४ ॥ तृतीयकृष्णपरिधौ पश्चिमे—ॐकालाय नमः कालं आवाहयामि स्थापयामि ॥ भो काल इहागच्छ इह तिष्ठ ॥

७३ वातोवेत्यस्य बृहस्पतिर्ऋषिः भुरिगार्ष्युष्णिक्छन्दः करालो देवता करालावाहने विनियोगः॥ ॐवातो वा मनो वा गन्धर्वाः सप्तविꣳशतिः ॥ तेऽ अग्रेश्वमयुञ्जँस्तेऽ अस्मिञ्जवमादधुः ॥ ९/७ ॥ तृतीयकृष्णपरिधौ वायव्याम्—ॐकरालाय नमः करालमावाहयामि स्थापयामि ॥ भो कराल इहागच्छ इह तिष्ठ ॥

७४ कुविदङ्गेत्यस्यकाक्षीवन्तसुकीर्तिर्ऋषिः निच्यृद्ब्राह्मीत्रिष्टुप्छन्दः एकपादो देवता एकपादावाहने विनियोगः॥ ॐकुविदङ्ग यवमन्तोयवंश्चिद्यथादान्त्यनुपूर्वं वियूय ॥ इहेहैषाङ्कृणुहिभोजनानिये बर्हिषोनमऽउक्तिं यजन्ति ॥ उपयामगृहीतोस्यश्विभ्यान्त्वा सरस्वत्यैत्वेन्द्रायत्वासुत्राम्णे ॥ ३२/१० ॥ तृतीयकृष्णपरिधौ उत्तरे—ॐएकपादाय नमः एकपादमावाहयामि स्थापयामि ॥ भो एकपाद इहागच्छ इह तिष्ठ ॥

७५ यमायेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः भीमरूपो देवता भीमरूपावाहने विनियोगः ॥ ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ९/३८ ॥ तृतीयकृष्णपरिधौ ऐशान्याम्—ॐभीमरूपाय नमः भीमरूपमावाहयामि स्थापयामि ॥ भो भीमरूप इहागच्छ इह तिष्ठ ॥

७६ गन्धर्व इत्यस्य प्रजापतिर्ऋषिः याजुषी गायत्रीछन्दः खेचरो देवता खेचरावाहने विनियोगः॥ ॐगन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः॥ इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः ॥ मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः ॥ ३/३ ॥ तृतीयकृष्णपरिधौ पूर्वैशान्योर्मध्ये—ॐखेचराय नमः खेचरमावाहयामि स्थापयामि ॥ भो खेचर इहागच्छ इह तिष्ठ ॥

७७ महीद्यौरित्यस्य मेधातिथिर्ऋषिः आर्षीगायत्रीछन्दः तलवासी देवता तलवास्यावाहने विनियोगः ॥ ॐमही द्यौः पृथिवी च नऽ इमं यज्ञम्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥ ३२/८ ॥ तृतीयकृष्णपरिधौ पश्चिमानैर्ऋत्योर्मध्ये—ॐतलवासिने नमः तलवासिनमावाहयामि स्थापयामि ॥ भो तलवासिन् इहागच्छ इह तिष्ठ ॥

प्रतिष्ठापनम्—ॐमनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु ॥ विश्वेदेवासऽ इह मादयन्तामोꣳम्प्रतिष्ठ ॥ १३/२ ॥ आवाहितशिख्यादिवास्तुमण्डलदेवताः सुप्रतिष्ठिताः वरदाः भवत ॥

## वास्तुमण्डलमध्ये ब्रह्मोत्तरे कलशस्थापनम् ॥

भूमिं स्पृष्ट्वा—ॐमहीद्यौः पृथिवीचनऽइमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ ३२/८ ॥ तत्र यवप्रक्षेपः ॐओषधयः समवदन्त० ॥ धान्यप्रक्षेपः—ॐधान्यमसिधिनुहि० ॥ सर्वौषधिप्रक्षेपः—ॐयाओषधीः० ॥ दूर्वाप्रक्षेपः—ॐकाण्डात्काण्डात्प्र० ॥ पञ्चपल्लवप्रक्षेपः—ॐअश्वत्थेवो० ॥ सप्तमृत्प्रक्षेपः—ॐस्योनापृथिवि० ॥ फलप्रक्षेपः—ॐयाःफलिनीर्या० ॥ पञ्चरत्नप्रक्षेपः—ॐपरिवाजपतिःकु० ॥ हिरण्यप्रक्षेपः—ॐहिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ ॐआपोहिष्ठा० ॥ गन्धप्रक्षेपः—ॐत्वाङ्गन्धर्वा० ॥ सम० ॥ रक्तसूत्रेण वस्त्रेण च वेष्टयेत्—ॐयुवासुवासाः परि० ॥ पूर्णपात्रमुपरिन्यसेत्—ॐपूर्णादर्विपरापत० ॥ वरुणमावाहयेत्—तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः ॥ ॐतत्त्वायामि० ॥ ॐभूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि स्थापयामि ॥ प्रतिष्ठापनम्—ॐमनोजूतिर्जुषतामाज्यस्य० ॥ ॐवरुण सुप्रतिष्ठितो वरदो भव ॥ ॐभूर्भुवः स्वः वरुणाय नमः इत्यनेन पञ्चोपचारैः सम्पूज्य तत्त्वायामीति पुष्पाञ्जलिं समर्प्य अनेन पूजनेन वरुणः प्रीयताम् ॥ कलशाभिमन्त्रणपूर्वकदेवतावाहनम् ॥ अनामिकया कलशं स्पृष्ट्वा—सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥ कलशस्यमुखेविष्णुः कण्ठेरुद्रःसमाश्रितः । मूलेतत्रस्थितोब्रह्मामध्येमातृगणाः स्मृताः ॥ कुक्षौतु० ॥ अङ्गैश्च० ॥ आयान्तु० ॥ ततः गायत्र्यादिभ्यो नमः इत्यनेन पञ्चोपचारैरभ्यर्च्य कलशं प्रार्थयेत्—देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये० ॥ शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः । आदित्यावसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ इति प्रार्थयेत् ॥ ततः वास्तोष्पतिध्रुवमूर्त्योस्तथाचान्यदेवमूर्तीनां सम्भवे सर्वासामेकतन्त्रेण अग्न्युत्तारणं प्राणप्रतिष्ठां च कुर्यात् ॥



## अथ अग्न्युत्तारणम् ॥

देशकालौस्मृत्वाआसां स्वर्णमयवास्तुध्रुवादिमूर्तीनां अङ्गप्रत्यङ्गसन्धिषु विघट्टनच्छेदनअग्नितपनताडनावघातादिदोषपरिहारार्थं अग्न्युत्तारणं देवताधिष्ठानत्वयोग्यतासिद्ध्यर्थं प्राणप्रतिष्ठाञ्च करिष्ये ॥ मूर्तीर्घृतेनाभ्यज्यपात्रे निधाय तदुपरिदुग्धमिश्रितजलधारां पातयेत् ॥ समुद्रस्यत्वा हिमस्यत्वा इति द्वयोः मेधातिथिर्ऋषिः गायत्री छन्दः अग्निर्देवता ॥ उपज्मन्निति मेधातिथिर्ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता ॥ अपामिदमित्यस्य मेधातिथिर्ऋषिः बृहतीछन्दः अग्निर्देवता ॥ अग्नेपावकेति वसूयुर्ऋषिःगायत्रीछन्दःअग्निर्देवता ॥ सनः पावकेति मेधातिथिर्ऋषिः निचृद्गायत्रीछन्दः अग्निर्देवता ॥ पावकयेति भरद्वाजऋषिः जगतीछन्दः अग्निर्देवता ॥ नमस्तइत्यस्य लोपामुद्राऋषिः बृहतीछन्दः अग्निर्देवता ॥ नृषदेवेडिति लोपामुद्राऋषिः दैवीबृहती छन्दः अग्निर्देवता ॥ येदेवेति द्वयोः लोपामुद्राऋषिः जगतीछन्दः अग्निर्देवता ॥ प्राणदाइत्यस्य प्रजापतिर्ऋषिः बृहती वा पङ्क्तिश्छन्दः अग्निर्देवता ॥ सर्वेषामग्न्युत्तारणे विनियोगः ॥

ॐसमुद्रस्य त्वावकयाग्ने परिव्ययामसि ॥ पावकोऽ अस्मभ्यं शिवो भव ॥ ४/१७ ॥ हिमस्य त्वा जरायुणाग्नेपरिव्ययामसि ॥ पावकोऽअस्मभ्यं शिवो भव ॥ ५/१७ ॥ उपज्मन्नुप वेतसेवतर नदीष्वा ॥ अग्ने पित्तमपामसि मण्डूकिताभिरागहिसेमन्नोयज्ञम्पावकवर्णः शिवङ्कृधि ॥ ६/१७ ॥ अपामिदन्न्ययनः समुद्रस्य निवेशनम् ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽ अस्मभ्यं शिवो भव ॥ ७/१७ ॥ अग्ने पावक रोचिषा मन्द्रयादेव जिह्वया ॥ आदेवान्वक्षि यक्षि च ॥ ८/१७ ॥ स नः पावक दीदिवोग्ने देवाँ२ इहावह ॥ उपयज्ञः हविश्चनः ॥ ९/१७ ॥ पावकयायश्चितयन्त्याकृपाक्षामन्रुरुचऽउपसा न भानुना ॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणे न ततृषाणोऽ अजरः ॥ १०/१७ ॥ नमस्ते हरसे शोचिषे नमस्तेऽ अस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यं शिवो भव ॥ ११/१७ ॥ नृषदे वेडप्सुषदे वेड्बर्हिषदेवेड्वनसदेवेट् स्वर्विदे वेट् ॥ १२/१७ ॥ येदेवादेवानाँयज्ञियायज्ञियानाः संवत्सरीणमुपभागमासते ॥ अहुतादो हविषो यज्ञेऽ अस्मिन्स्वयं पिबन्तु मधुनो घृतस्य ॥ १३/१७ ॥ ये देवा देवेष्वधिदेवत्वमायन्ये ब्रह्मणः

पुरऽ एतारो अस्य ॥ येभ्यो नऽ ऋते पर्वते धाम किञ्चन न ते दिवो न पृथिव्याऽ अधि स्नुषु ॥ $\frac{१४}{१७}$ ॥ प्राणदाऽ अपानदा व्यानदा
वर्चोदा वरिवोदाः ॥ अन्याँस्तेऽ अस्मत्तपन्तु हेतयः पावकोऽ अस्मभ्यꣳ शिवो भव ॥ $\frac{१५}{१७}$ ॥ इत्यग्न्युत्तारणम् ॥

अथ प्राणप्रतिष्ठाप्रयोगः ॥

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुःसामानि छन्दांसि । पराप्राणशक्तिर्देवता । आं बीजं । ह्रीं शक्तिः । क्रों कीलकम् । आसु वास्तुध्रुवादिस्वर्णप्रतिमासु प्राणप्रतिष्ठापने विनियोगः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां वास्तुध्रुवादिमूर्तीनां प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां वास्तुध्रुवादिमूर्तीनां जीवा इह स्थिताः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां स्वर्णमयवास्तुध्रुवादिमूर्तीनां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ प्रणवस्य पञ्चदशावृत्तीः कुर्यात् ॥

प्रतिष्ठापनम्—ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु ॥ विश्वे देवासऽ इह मादयन्तामोꣳ प्रतिष्ठ ॥ $\frac{१३}{२}$ ॥ ब्राह्मणम्—ॐ मनो जूतिर्जुषतामाज्यस्येति । मनसा वाऽ इदꣳ सर्वमाप्तन्तन्मनसैवैतत्सर्वमाप्नोति बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधात्विति यच्छिन्नं तत्संदधाति विश्वेदेवासऽ इह मादयन्तामिति सर्वं वै विश्वेदेवाः सर्वेणैवैतत्सन्दधाति स यदि कामयेत ब्रूयात्प्रतिष्ठेति यद्युकामयेतापि नाद्रियेत ॥ शतपथब्राह्मणकाण्ड १ अध्याय ७ प्रपाठक ६ ब्राह्मण २ कण्डिका २२ ॥ ॐ एष वै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति ॥ वास्तोष्पतिध्रुवादिदेवताः सुप्रतिष्ठिता वरदा भवत ॥ गन्धादिपञ्चोपचारान्दत्वा षोडशसंस्कारसिद्ध्यै षोडशप्रणवावृत्तीः कृत्वा आसां स्वर्णमयवास्तुध्रुवादिमूर्तीनां षोडशसंस्काराः सम्पद्यन्ताम् ॥

नेत्रोन्मीलनम्—ॐ वृत्रस्यासि कनीनकश्चक्षुर्दाऽ असि चक्षुर्मे देहि ॥ $\frac{३}{४}$ ॥ इति प्राणप्रतिष्ठाप्रयोगः ॥



अथ वास्तुदेवतापूजनप्रयोगः ॥

ततोऽन्यताम्रपात्रे वास्तुमूर्तिं ध्रुवमूर्तिं च संस्थाप्य ध्यानादारभ्य स्नानान्तमुपचारसमर्पणं तत्रैव पात्रे विधेयम् ॥

ध्यानम्—ॐ आसीत्पूर्वं महादैत्यो वास्तुर्यज्ञापहारकः । स देवैर्बहुकालेन युद्धे हत्वा महीतले ॥ निपात्य बहुभिर्देवैर्निबद्धश्चतुरस्रकः । पदीकृत्य ईशाने मस्तकं न्यस्य नैर्ऋत्ये पादसम्पुटम् ॥ जानुनी कूर्परीकृत्य बाहुयुग्मं तथैव च । वायुप्राच्योस्ततो जानुं हृदये चाञ्जलिस्तथा ॥ च तस्योर्ध्वं स्वयं मुक्ताः सुराः स्थिताः ॥ ॐ भूर्भुवः स्वः शिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः ध्यायामि ॥

आवाहनम्—वास्तोष्पत इति मैत्रावरुणिर्वसिष्ठऋषिः त्रिष्टुप्छन्दः वास्तोष्पतिर्देवता ध्रुवासीत्यस्यौतथ्योदीर्घतमाऋषिः निचृद्गायत्रीछन्दः ध्रुवोदेवतासध्रुववास्तोष्पत्यावाहने विनियोगः ॥ ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः ॥ यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥ ॐ ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥ $\frac{२८}{५}$ ॥ ॐ नमो भगवते वास्तुपुरुषाय महाबलपराक्रमाय सर्वदेवाधिवासाश्रितशरीराय ब्रह्मपुत्राय सकलब्रह्माण्डधारिणे भूभारार्पितमस्तकाय पुरपट्टनप्रासादगृहवापीसरःकूपादिसन्निवेशसान्निध्यकराय सर्वसिद्धिप्रदाय प्रसन्नवदनाय विश्वम्भराय परमपुरुषाय शक्रवरदाय वास्तो नमस्ते नमस्ते ॥ ॐ एह्येहि भगवन्वास्तो यज्ञेऽस्मिन्सर्वसिद्धये ॥ जानुनी कूर्परासक्तादिशि वातहुताशयोः ॥ आगच्छ भगवन्वास्तो सर्वदेवैरधिष्ठितः । भगवन्कुरु कल्याणं यज्ञेऽस्मिन्सन्निधो भव ॥ ॐ भूर्भुवः स्वः शिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः शिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषमावाहयामि ॥

आसनम्—ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमन्तमभितिष्ठामि यो मा कश्चाभिदासति ॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं कल्पितं भक्त्या मया दत्तं प्रगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः आसनं समर्पयामि ॥

पाद्यम्—अँएतावानस्य महिमातो ज्यायाँश्च पूरुषः।।पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि।।३/३१।।गङ्गादिसलिलाधारतीर्थमन्त्रा-
भिमन्त्रितम्। दूरयात्राश्रमहरं पाद्यं वः प्रतिगृह्यताम् ॥ अँभूर्भुवः स्वः शिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः पाद्यं समर्पयामि ॥
अर्घ्यम्—अँधामन्ते विश्वम्भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि ॥ अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तन्तऽऊर्म्मिम् ॥१९/१७॥
सुगन्धपुष्पसिद्धार्थफलदूर्वादिभिर्युतम्।इदमर्घ्यंमयादत्तंभक्त्यातत्प्रतिगृह्यताम्॥अँशिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषायनमः अ०स०॥
आचमनीयम्—अँइमम्मे वरुण श्रुधी हवमद्या च मृडय ॥ त्वामवस्युरा चके ॥२/१॥ कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां हि भो देवाः सौरभेयं मयार्पितम् ॥ अँशिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः आचमनीयं समर्पयामि ॥
पञ्चामृतस्नानम्—अँघृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः।।ऊर्ज्जस्वती पयसा पिन्वमानास्मान्सीते पयसाभ्याववृत्स्व
॥ ७०/१२ ॥ पयो दधि घृतं चैव मधुशर्करयान्वितम् । पञ्चामृतं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ अँशिख्यादिमण्डलदेवतासहितसध्रुववास्तु-
पुरुषाय नमः पञ्चामृतस्नानं समर्पयामि ॥ पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥
गन्धोदकस्नानम्—अँगन्धर्वस्त्वा०॥३॥मलयाचलसम्भूतंचन्दनागरुवासितम्। गन्धोदकन्तुदेवेशस्नानार्थं प्रतिगृह्यताम्॥अँशिख्यादि-
मण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः गन्धोदकस्नानं समर्पयामि॥गन्धोदकस्नानान्तेशुद्धोदकस्नानंसम०॥शुद्धोदकस्नानान्तेआ०स०॥
उद्वर्तनस्नानम्—अँअंशुनाते० ॥२७/२०॥ नानासुगन्धिद्रव्यञ्च चन्दनं कुङ्कुमान्वितम् । उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥
अँशिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः उद्वर्तनस्नानं समर्पयामि ॥ उद्वर्तनस्नानान्तेउष्णोदकस्नानंसमर्पयामि ॥ उष्णोदकस्ना-
नान्तेशुद्धोदकस्नानं समर्पयामि॥शुद्धोदकस्नानान्तेआचमनीयंसमर्पयामि ॥ सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्प्य ॥ निर्माल्यमुत्तरेविसृजेत॥
अभिषेकः—अँवास्तोष्पतेप्रतिजा०॥अँध्रुवासि०॥२८/५॥अँशिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषायनमःअभिषेकस्नानं समर्प०॥



स्नानम्—अँशुद्धवालः०॥३/२४॥गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैःस्नापयामि महाभक्त्या प्रीयताञ्च सुरेश्वर ॥ अँशिख्यादिमण्डल-
देवतासहितसध्रुववास्तुपुरुषायनमःस्नानंसम०।स्नानान्तेआ०स०॥मूर्तीर्वस्त्रेणप्रमृज्यमण्डलस्थितकलशोपरिपूर्णपात्रेगन्धलेपनपूर्वकं स्थापयेत् ।
वस्त्रम्—अँसुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः।।वासोऽअग्ने विश्वरूपꣳसंव्ययस्वविभावसो।।४०/११॥ सर्वभूषाधिकेशुद्धेलोकलज्जानि-
वारणे।मयोपपादितेदिव्ये गृह्येतां वाससी त्वया।।अँशिख्यादिसहितसध्रुववास्तुपुरुषायनमःवस्त्रोपवस्त्रेसमर्पयामि।।वस्त्रान्तेआचमनीयंसमर्पयामि।।
उपवीतम्—अँयुञ्जोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः।।आवो०।।८/४।।कार्पासतन्तुभिर्युक्तंब्रह्ममन्त्राभिमन्त्रितम्। ब्रह्मसूत्रं
मया दत्तं प्रीत्या त्वं प्रतिगृह्यताम् ।। अँशिख्यादिसहितसध्रुववास्तुपुरुषायनमः उपवीतं समर्पयामि।। उपवीतान्ते आचमनीयं समर्पयामि ॥
गन्धम्—अँत्वाङ्गन्धर्वाऽ अखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ।।९८/१२।। श्रीखण्डञ्चन्दनं
दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥ अँशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः गन्धं समर्पयामि ॥
अक्षताः—अँअक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ।। अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी।।५१/३।। अक्षताश्च शुभाः श्रेष्ठाः
कुङ्कुमाक्ताः सुशोभनाः । मया निवेदिता भक्त्या प्रीत्यथ प्रतिगृह्यताम् ॥ अँशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः अक्षतान् समर्पयामि।।
पुष्पाणि—अँओषधयः प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः ।। अयंवो गर्भऽऋत्वियः प्रत्नꣳसधस्थमासदत् ।।४८/११।। माल्यादीनि सुग-
न्धीनि नानावर्णयुतानि च । ऋतूद्भवानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ अँशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः पुष्पाणि समर्पयामि।।
सौभाग्यद्रव्याणि—अँअहिरिवभोगैः पर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः।। हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमाꣳसम्परिपातुविश्वतः
॥५१/२९॥हरिद्राकुङ्कुमंचैवसिन्दूरादिसमन्वितम्। नानापरिमलद्रव्यंगृहाणपरमेश्वर।।अँशिख्यादिसहितसध्रुववास्तुपुरुषायनमःसौभाग्यद्रव्याणि स०।

आभूषणानि—ॐस्वुर्णंघुर्म्मः स्वाहा स्वुर्णार्कः स्वाहा स्वुर्णंशुक्रः स्वाहास्वुर्णंज्योतिः स्वाहा स्वुर्णंसूर्य्यः स्वाहा॥ ५०/१८ ॥नानाविधानि
दिव्यानि नानारत्नोज्वलानि च । देहालङ्करणार्थाय भूषणान्यर्पयाम्यहम् ॥ ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः आभूषणानि सम०॥
धूपः—ॐवसंवस्त्वा धूपयन्तु गायुत्रेणुछन्दसाङ्गिरुस्वद्रुद्रास्त्वाधूपयन्तु त्रैष्टुभेन च्छन्दसाङ्गिरुस्वदादित्यास्त्वाधूपयन्तु० ॥ ६०/११ ॥
वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ ॐशिख्यादिसहितसध्रुववास्तुपुरुषायनमः धूपमाघ्रापयामि॥
दीपः—ॐचुन्द्रमाऽअुप्स्वुन्तरासुपुर्णोधावतेदिवि ॥ रुयिम्पिशङ्गम्बहुलम्पुरुस्पृहुङ्हरिरेतिक्रनिक्रदत् ॥ ९०/३३ ॥ साज्यं च वर्तिसंयुक्तं
वह्निना योजितं मया । भक्त्या दीपं प्रयच्छामि प्रीत्यर्थं प्रतिगृह्यताम् ॥ ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः दीपं दर्शयामि ॥
नैवेद्यम्—ॐअन्नंपतेन्नस्य० ॥ ८३/११ ॥ शर्कराखण्डखाद्यादिदधिक्षीरघृतादिभिः ।आहारैर्भक्ष्यभोज्यैश्च नैवेद्यं प्रतिगृह्यताम्॥देवताग्रेगोमयेन
जलेन वा चतुष्कोणं मण्डलंकृत्वातदुपरिनैवेद्यपात्रंनिधायतत्रतुलसीपत्रंनिक्षिप्य गायत्रीमन्त्रेण सम्प्रोक्ष्य धेनुमुद्रां प्रदर्श्य ग्रासमुद्रयातर्जनीम-
ध्यमाङ्गुष्ठैः—ॐप्राणाय स्वाहा । मध्यमानामिकाङ्गुष्ठैः—ॐअपानाय स्वाहा । कनिष्ठिकानामिकाङ्गुष्ठैः—ॐव्यानाय स्वाहा । कनिष्ठातजन्यङ्गुष्ठैः—
ॐउदानायस्वाहा।साङ्गुष्ठाभिः सर्वाङ्गुलिभिः—ॐसमानायस्वाहा।ॐशिख्यादिसहितसध्रुववास्तुपुरुषायनमः।नैवेद्यं निवेदयामि पूर्वापोशनंसम०॥
नैवेद्यमध्येपानीयम्—एलोशीरलवङ्गादिकर्पूरपरिवासितम् ।प्राशनार्थं कृतं तोयं गृहाण परमेश्वर ॥ ॐशिख्यादिसहितसध्रुववास्तु-
पुरुषाय नमः नैवेद्यमध्ये पानीयं समर्पयामि ॥ उत्तरापोशनं समर्पयामि ॥ मुखप्रक्षालनं समर्पयामि ॥ करोद्वर्तनार्थे गन्धं समर्पयामि ॥
फलम्—ॐयाः फुलिनीर्य्याऽ अंफुलाऽ अंपुष्पा याश्चं पुष्पिणीः ॥ बृहुस्पतिप्प्रसूतास्ता नो मुञ्चुन्त्वङ्हसः ॥ ८९/१२ ॥ इदं फलं
मया भक्त्या स्थापितं पुरतस्तु वः । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः फलं समर्पयामि॥

मुखवासार्थेताम्बूलम्—ॐउुतस्मास्युद्रवतस्तुरण्युतः पुर्णन्नवेरनुवातिप्रगुर्द्धिनः॥श्येनस्येवुध्रजतोऽअङ्कसम्परिदधिक्राव्णः सुहोर्जातरि-
त्रतुःस्वाहा॥ १५/९ ॥नागवल्लीदलंदिव्यंपूगीफलसमन्वितम्।एलालवङ्गादियुतंताम्बूलंप्रतिगृह्यताम्॥ॐशिख्यादिसहितसध्रुववास्तुपु०ताम्बूलं०स०।
दक्षिणा—ॐयद्दुत्तं यत्परादानुं यत्पूर्त्तं याश्चु दक्षिणाः ॥ तदुग्निर्वैश्वकर्म्मुणः स्वुर्द्देवेषु नो दधत् ॥ ६४/१८ ॥ हिरण्यगर्भगर्भस्थं
हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः सुवर्णपुष्पदक्षिणां समर्पयामि ॥
नीराजनम्—ज्वालामालिन्यैनमःगन्धाक्षतपुष्पाणिसमर्पयामि॥ॐआरात्रिपार्थिवुङ्रजः पितुरंप्प्रायिधामभिः॥ दिवः सदांसिबृहती
वितिष्ठसुऽआत्वेषंवर्ततेतमः॥ ३२/३४ ॥कदलीगर्भसम्भूतंकर्पूरञ्चप्रदीपितम्।आरार्त्तिक्यमहं कुर्वे पश्य मेवरदोभव।चन्द्रादित्यौच धरणीविद्युदग्निस्त-
थैवच । त्वमेवसर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम्॥ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः नीराजनं समर्पयामि॥ पुष्पेण देववन्दनम्॥
मन्त्रपुष्पाञ्जलिः—ॐवास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशो अनमीवोभवानः॥यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे॥पा०गृ०॥शिख्या-
दिवास्तुपीठस्थदेवताभ्योनमोस्तुवः।पुष्पाञ्जलिं प्रयच्छामि कर्मणःफलसिद्धये॥ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमःमन्त्रपुष्पाञ्जलिं स०॥
प्रदक्षिणा—ॐसुप्तास्यासन्परिधयुस्त्रिः सुप्तसुमिधः कृताः ॥ देवायद्युज्ञन्तन्वानाऽअबंध्नुन्पुरुषम्पुशुम् ॥ १५/३१ पदेपदेयापरिपूजकेभ्यः
सद्योऽश्वमेधादिफलंददाति॥ तांसर्वपापक्षयहेतुभूतांप्रदक्षिणांतेपरितःकरोमि॥ ॐशिख्यादिसहितसध्रुववास्तुपुरुषायनमःप्रदक्षिणां समर्पयामि॥
विशेषार्घ्यम्—अर्घ्यपात्रे जलं प्रपूर्य गन्धाक्षतपुष्पहिरण्यसहितं नारिकेलं धृत्वा-वास्तोष्पते महादेव रक्ष त्रैलोक्यरक्षक । भक्ता-
नामभयङ्कर्ता त्राता भव भवार्णवात् ॥ वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद । अनेन सफलार्घ्येण फलदोऽस्तु सदा मम ॥ ॐशि
ख्यादिसहितसध्रुववास्तुपुरुषाय नमः विशेषार्घ्यं समर्पयामि ॥
प्रार्थनापूर्वकनमस्कारः—देवेश वास्तुपुरुष सर्वविघ्नविनाशक । शान्तिं कुरु सुखं देहि सर्वकामान्प्रयच्छ मे ॥ ॐशिख्यादिसहित-
सध्रुववास्तुपुरुषाय नमः प्रार्थनापूर्वकं नमस्करोमि ॥

राजोपचाराः—छत्रं च चामरं चैव व्यजनं दर्पणं तथा । पादुकादि च सर्वाणि गृह्यतां परमेश्वर ॥ ॐशिख्यादिसहितसध्रुववास्तुपुरुषाय नमः राजोपचारान्समर्पयामि ॥ ( अभावे कल्पयामि ॥ )

अर्पणम्—अनेन यथाज्ञानेन यथामिलितोपचारद्रव्यैः ध्यानावाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणामन्त्रपुष्परूपैः षोडशोपचारैः अन्योपचारैश्च कृतपूजनेन शिख्यादिसहितसध्रुववास्तुपुरुषः प्रीयताम् ॥

॥ मण्डलस्य ईशानदिग्भागे वास्तुदेवतानां पायसबलिदानम् ॥

वास्तोष्पतये बलिदानम्—पत्रावल्यां पायसबलिं संस्थाप्य—ॐएह्येहिभगवन्वास्तो सपरिवार इमं मयोपनीतं बलिंगृहाणममगृहमच्छिद्रं कुरुकुरुसकलदुष्टेभ्योमां रक्ष रक्ष स्वाहा॥इतिबलिंदत्वाप्रार्थयेत्-यथामेरुगिरेः शृंगंदेवानामालयःसदा।तथा शिख्यादिभिःसाकंममगृहे स्थिरोभव॥

ध्रुवायबलिदानम्—तस्यामेवपत्रावल्यां बलिं संस्थाप्य—ॐएह्येहि भगवन्ध्रुव सपरिवार इमं पायसबलिं गृहाण मम गृहमच्छिद्रं कुरु-कुरु सकलदुष्टेभ्यो मां रक्ष रक्ष स्वाहा ॥ इति बलिं दत्वा प्रार्थयेत्—ॐयज्ञभागं प्रतीक्षस्व पूजां चैव बलिं मम । नमो नमस्ते देवेश मम स्वस्तिकरो भव ॥ तत्रैव मण्डलस्यऐशान्यां एकस्यां पत्रावल्यां शिख्यादिभ्यो बलिं दद्यात्—

| | | |
|---|---|---|
| १ ॐशिखिने नमः पायसबलिं समर्पयामि | ४ ॐकुलिशायुधायनमःपायसबलिंसमर्पयामि | ७ ॐभृशाय नमः पायसबलिं समर्पयामि ॥ |
| २ ॐपर्जन्याय नमः पायसबलिं समर्पयामि | ५ ॐसूर्याय नमः पायसबलिं समर्पयामि | ८ ॐआकाशाय नमःपायसबलिं समर्पयामि॥ |
| ३ ॐजयन्ताय नमः पायसबलिं समर्पयामि | ६ ॐसत्याय नमः पायसबलिं समर्पयामि | ९ ॐवायवे नमः पायसबलिं समर्पयामि ॥ |

१ उक्ताभावे सर्वेषां पायसेनैव बलिदानं तदुक्तंमात्स्ये—पायसेनैव कर्तव्यं यथोक्तवस्त्वसम्भवे ॥ २ नाममन्त्राश्चतुर्थ्यन्ता नमोन्ताः प्रणवादिकाः । बलिकर्मणि वै शस्ता होमे स्वाहाधिकाः स्मृताः ॥ गारुडे—प्रणवादि नमोन्तं च चतुर्थ्यन्तं च सत्तम देवतायाः स्वकं नाम नाममन्त्रः प्रकीर्तितः ॥

| | | |
|---|---|---|
| १० ॐपूष्णे नमः पायसबलिं समर्पयामि | २५ ॐरोगाय नमः पायसबलिं समर्पयामि | ४० ॐविबुधाधिपायनमः पायसबलिं समर्प० |
| ११ ॐवितथाय नमः पायसबलिं समर्पयामि | २६ ॐअहये नमः पायसबलिं समर्पयामि | ४१ ॐमित्राय नमः पायसबलिं समर्पयामि |
| १२ ॐगृहक्षताय नमः पायसबलिं समर्पयामि | २७ ॐमुख्याय नमः पायसबलिं समर्पयामि | ४२ ॐराजयक्ष्मणेनमःपायसबलिंसमर्पयामि |
| १३ ॐयमाय नमः पायसबलिं समर्पयामि | २८ ॐभल्लाटाय नमः पायसबलिं समर्पयामि | ४३ ॐपृथ्वीधरायनमःपायसबलिंसमर्पयामि |
| १४ ॐगन्धर्वाय नमः पायसबलिं समर्पयामि | २९ ॐसोमाय नमः पायसबलिं समर्पयामि | ४४ ॐआपवत्सायनमःपायसबलिंसमर्पयामि |
| १५ ॐभृङ्गराजायनमःपायसबलिंसमर्पयामि | ३० ॐसर्पाय नमः पायसबलिं समर्पयामि | ४५ ॐब्रह्मणे नमः पायसबलिं समर्पयामि |
| १६ ॐमृगाय नमः पायसबलिं समर्पयामि | ३१ ॐअदित्यै नमः पायसबलिं समर्पयामि | ४६ ॐचरक्यै नमः पायसबलिं समर्पयामि |
| १७ ॐपितृभ्यो नमः पायसबलिं समर्पयामि | ३२ ॐदित्यै नमः पायसबलिं समर्पयामि | ४७ ॐविदार्यै नमः पायसबलिं समर्पयामि |
| १८ ॐदौवारिकायनमःपायसबलिंसमर्पयामि | ३३ ॐआपाय नमः पायसबलिं समर्पयामि | ४८ ॐपूतनायै नमः पायसबलिं समर्पयामि |
| १९ ॐसुग्रीवाय नमः पायसबलिं समर्पयामि | ३४ ॐसावित्राय नमः पायसबलिं समर्पयामि | ४९ ॐपापराक्षस्यैनमः पायसबलिंसमर्पयामि |
| २० ॐपुष्पदन्तायनमःपायसबलिंसमर्पयामि | ३५ ॐजयाय नमः पायसबलिं समर्पयामि | ५० ॐस्कन्दाय नमः पायसबलिं समर्पयामि |
| २१ ॐवरुणाय नमः पायसबलिं समर्पयामि | ३६ ॐरुद्राय नमः पायसबलिं समर्पयामि | ५१ ॐअर्यम्णे नमः पायसबलिं समर्पयामि |
| २२ ॐअसुराय नमः पायसबलिं समर्पयामि | ३७ ॐअर्यम्णे नमः पायसबलिं समर्पयामि | ५२ ॐजृम्भकाय नमः पायसबलिं समर्पयामि |
| २३ ॐशोषाय नमः पायसबलिं समर्पयामि | ३८ ॐसवित्रे नमः पायसबलिं समर्पयामि | ५३ ॐपिलिपिच्छायनमःपायसबलिं समर्प० |
| २४ ॐपापाय नमः पायसबलिं समर्पयामि | ३९ ॐविवस्वते नमः पायसबलिं समर्पयामि | ५४ ॐइन्द्राय नमः पायसबलिं समर्पयामि |

| | | |
|---|---|---|
| ५५ ॐअग्नये नमः पायसबलिं समर्पयामि | ६३ अनन्ताय नमः पायसबलिं समर्पयामि | ७१ ॐअसितवैतालायनमः पायसबलिंसमर्प० |
| ५६ ॐयमाय नमः पायसबलिं समर्पयामि | ६४ उग्रसेनाय नमः पायसबलिं समर्पयामि | ७२ ॐकालाय नमः पायसबलिं समर्पयामि |
| ५७ ॐनिर्ऋतये नमः पायसबाल समर्पयामि | ६५ ॐडामराय नमः पायसबलिं समर्पयामि | ७३ ॐकरालाय नमः पायसबलिं समर्पयामि |
| ५८ ॐवरुणाय नमः पायसबलिं समर्पयामि | ६६ ॐमहाकालायनमःपायसबलिंसमर्पयामि | ७४ ॐएकपादायनमः पायसबलिंसमर्पयामि |
| ५९ ॐवायवे नमः पायसबलिं समर्पयामि | ६७ ॐपिलिपित्सायनमः पायसबलिं समर्प० | ७५ ॐभीमरूपायनमः पायसबलिंसमर्पयामि |
| ६० ॐकुबेराय नमः पायसबलिं समर्पयामि | ६८ ॐहेतुकाय नमः पायसबलिं समर्पयामि | ७६ ॐखेचराय नमः पायसबलिं समर्पयामि |
| ६१ ॐईश्वराय नमः पायसबलिं समर्पयामि | ६९ ॐत्रिपुरान्तकायनमःपायसबलिंसमर्प० | ७७ ॐतलवासिनेनमः पायसबलिंसमर्पयामि |
| ६२ ॐब्रह्मणे नमः पायसबलिं समर्पयामि | ७० ॐअग्निवैतालायनमः पायसबलिंसमर्प० | |

हस्ते जलमादाय—अनेन पायसबलिप्रदानान्तपूजनेन शिख्यादिसहितसध्रुववास्तुपुरुषः प्रीयतां न मम ॥

॥ अथकुण्डपूजनपञ्चभूसंस्कारपूर्वकं अग्निप्रतिष्ठापनम् ॥

आचार्यः कुण्डपश्चिमतः उपविशेत् ॥ यजमानं स्वदक्षिणे ब्रह्मणः पश्चिमतः उपवेश्य आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य पुनर्जलमादाय-तदङ्गतया आचरितस्य सग्रहमखशालाकर्मपूर्वकवास्तुशान्त्याख्ये कर्मणि पञ्चभूसंस्कारपूर्वकमग्निप्रतिष्ठापनं करिष्ये ॥ विहितं सम्मार्जनादिमेखलायोनिकण्ठनाभ्यादिदेवतास्थापनपूजनमहं करिष्ये ॥

कुण्डावाहनम्—अग्न्यायतनं सम्मृज्य कुशोदकेन कुण्डं सम्प्रोक्ष्य अञ्जलौ पुष्पाण्यादाय कुण्डं स्पृष्ट्वा आवाहयेत्–ॐआवाहयामि तत्कुण्डं विश्वकर्मविनिर्मितम् । शरीरं यच्च ते दिव्यमग्न्यधिष्ठानमद्भुतम् ॥ पुष्पाणि कुण्डोपरि निक्षिपेत् ॥

कुण्डप्रार्थना हस्तौ बद्ध्वा—ये च कुण्डे स्थिता देवाः कुण्डाङ्गे याश्च देवताः । ऋद्धिं यच्छन्तु ते सर्वे यज्ञसिद्धिं मुदान्विताः ॥ हे कुण्ड तव निर्माणं रचितं विश्वकर्मणा । अस्माकं वाञ्छितां सिद्धिं यज्ञसिद्धिं ददस्व मे ॥

कुण्डमध्ये विश्वकर्मपूजनम्—विश्वकर्मन् इति मन्त्रस्य विश्वकर्माभौवनऋषिः त्रिष्टुप्छन्दःविश्वकर्मादेवताविश्वकर्मावाहनेविनियोगः ॐविश्वकर्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥ उपयामगृहीतोसीन्द्राय त्वा विश्वकर्म्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥ ४६/८ ॥ ॐविश्वकर्मणे नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ इति सम्पूज्य प्रार्थयेत–ब्रह्मवक्त्रं भुजैः क्षत्रं ऊरू वैश्यश्च जायत । पादौ तस्य स्थिताः शूद्रा विश्वकर्मात्मने नमः ॥ अज्ञानाज्ज्ञानतो वापि दोषाः स्युः खननोद्भवाः । नाशयन्त्वहितान्सर्वान्विश्वकर्मन्नमोऽस्तु ते ॥

कुण्डे पञ्चभूसंस्काराः—त्रिभिर्दर्भाग्रैः पश्चिमतः आरभ्य प्रागन्तं उदक्संस्थं त्रिः परिसमूहनम्—यद्देवा इत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः अग्निर्देवता यदीत्यस्यप्रजापतिऋषिः अनुष्टुप्छन्दः वायुर्देवता परिसमूहने विनियोगः–ॐयद्देवादेवहेडनन्देवासश्चकृमावयम्॥अग्निर्म्मा तस्मादेनसोविश्वान्मुञ्चत्वꣳहसः॥ १५/२० ॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमावयम्॥वायुर्म्मातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः॥ १५/२० ॥ यदि जाग्रद्यदि स्वप्नऽएनाꣳसिचकृमावयम्॥सूर्य्योमातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः॥ १६/२० ॥इति परिसमुह्य तान्कुशान् ईशान्यां पूर्वतोवापरित्यजेत्

गोमयोदकेन उपलेपनम्–मानस्तोक इति परमेष्ठी ऋषिः जगती छन्दः एको रुद्रो देवता गोमयोदकेनोपलिम्पने विनियोगः–मानस्तोकेतनयेमानऽआयुषिमानो गोषुमानोऽ अश्वेषु रीरिषः।मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्वाहवामहे ॥ १६/१६ ॥ इत्यनेनोपलिम्पयेत्॥

उल्लेखनम्—सदसस्पतिमित्यस्य स्वयम्भूऋषिः भुरिगार्षी गायत्रीछन्दः मन्त्रोक्ता देवता उद्धरणे विनियोगः–सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्म्यम् ॥ सनिम्मेधामयासिषꣳ स्वाहा ॥ १३/३२ ॥ अङ्गुष्ठानामिकाभ्यां अङ्गुष्ठात् अनामिकापर्यन्तं पांसुं नीत्वा प्राञ्चमुद्धरेत् ॥

अभ्युक्षणम्—देवस्यत्वेति प्रजापत्यश्विसरस्वत्येन्द्राऋषयः धृतिछन्दः लिङ्गोक्ता देवता उदकेनाभ्युक्षणे विनियोगः–ॐदेवस्यत्वा

सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥अश्विनोर्भैषज्येनतेजसे ब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येनवीर्य्यायान्नाद्यायाभिषि-
ञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेऽभिषिञ्चामि ॥५/२०॥ इत्यनेनमतिरेखंन्युब्जमुष्टिना प्राजापत्यतीर्थेन उदकेनाभ्युक्षणम्॥इतिपञ्चभूसंस्काराः ॥

॥ सदैवतमेखलापूजनप्रयोगः ॥

इदंविष्णुरितिमेधातिथिऋषिः गायत्रीछन्दः विष्णुर्देवता उपरिमेखलायां श्वेतवर्णालङ्कृतायां विष्ण्वावाहने विनियोगः—ॐइदंविष्णु-
र्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पा८ंसुरेस्वाहा॥१५/५॥विष्णो यज्ञपते देव दुष्टदैत्यनिषूदन।विभो यज्ञस्यरक्षार्थं कुण्डे सन्निहितो भव॥
उपरिमेखलायां श्वेतवर्णालङ्कृतायां ॐभूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गन्धाक्षतपुष्पाणिसमर्पयामि॥
मेखलापूजनम्—प्रथमायै विष्णुदैवत्यै सात्विकायै श्वेतवर्णालङ्कृतायै मेखलायै नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

ब्रह्मजज्ञानमिति मन्त्रस्य प्रजापतिऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता मध्यमेखलायां रक्तरागरञ्जितायां ब्रह्मावाहने विनियोगः—
ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥३/१३॥ हंसपृष्ठसमारूढ
देवदेवगणावृत । रक्षार्थं मम यज्ञस्य कुण्डेस्मिन्सन्निधो भव॥मध्यमेखलायांरक्तरागरञ्जितायां ॐभूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि
स्थापयामि ॥ सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥इति ब्रह्माणं सम्पूज्य गन्धाक्षतपुष्पाण्यादाय मेखलापूजनम्—द्वितीयायै मध्य-
मेखलायै ब्रह्मदैवत्यै राजस्यै रक्तरागरञ्जितायै मेखलायै नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

रुद्राइत्यस्य सिन्धुद्वीपऋषिः अनुष्टुप्छन्दः रुद्रो देवता अधोमेखलायां कृष्णरागरञ्जितायां रुद्रावाहने विनियोगः—ॐरुद्राः सꣳसृज्य
पृथिवीम्बृहज्ज्योतिः समीधिरे।तेषाम्भानुरजस्रऽइच्छुक्रो देवेषु रोचते॥५४/११॥गङ्गाधरमहादेव वृषारूढ महेश्वर।आगच्छ भगवन्रुद्र कुण्डेऽस्मिन्स-
न्निधोभव॥अधोमेखलायांकृष्णरागरञ्जितायांॐभूर्भुवःस्वःरुद्रायनमःरुद्रमावाहयामिस्थापयामि॥सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥

मेखलापूजनम्—तृतीयायै रुद्रदैवत्यै तामस्यै कृष्णरागरञ्जितायै अधोमेखलायै नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणिसमर्पयामि ॥

अथ सदैवतयोनिपूजनम्—पृथुकराङ्गुलं लिङ्गं योनिमध्ये संस्थाप्य तस्य पार्श्वयोः कुम्भिकुम्भवन्मृत्पिण्डद्वयं निधाय रक्तवस्त्रेण
संवेष्ट्य तत्र गौरीम्पूजयेत् ॥

योन्यां गौरीपूजनम्·अम्बइत्यस्यभूरिगार्चीऋषिःपङ्क्तिश्छन्दःगौरी देवता योन्यांगौर्यावाहनेवि०-ॐअम्बेऽ अम्बिकेम्बालिके न मा
नयति कश्चन॥ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥१८/२३॥ हिमाद्रितनये देवि शङ्करप्राणवल्लभे।लम्बोदरस्य जननि योन्यामत्र
स्थिरा भव ॥ ॐभूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि स्थापयामि॥ गौर्यै नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

योनिपूजनम्—क्षत्रस्ययोनिरितिविवस्वानृषिःद्विपदागायत्रीछन्दः योनिर्देवता योन्यावाहनेविनियोगः॥ ॐक्षत्रस्ययोनिरसि क्षत्रस्य
नाभिरसि॥मा त्वा हिꣳसीन्मा मा हिꣳसीः॥१/२०॥ आगच्छ देविकल्याणिजगदुत्पत्तिहेतुके ॥ मनोभवयुतेरम्येयोन्यांसन्निहिता भव॥ जग-
दुत्पत्तिहेतुकायै मनोभवयुतायै योन्यैनमः योनिमावाहयामि स्थापयामि॥ ॐयोन्यै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥

योनिप्रार्थना—सेवन्ते महतीं योनिं देवर्षिसिद्धमानवाः ॥ चतुरशीतिलक्षाणि पन्नगाद्याः सरीसृपाः॥ पशवः पक्षिणः सर्वे संसरन्ति
यतो भुवि । योनिरित्येव विख्याता जगदुत्पत्तिहेतुका ॥ मनोभवयुता देवी रतिसौख्यप्रदायिनी । मोहयित्र्यै सुराणां च जगद्धात्र्यै
नमो नमः ॥ योने त्वं विश्वरूपाऽसि प्रकृतिर्विश्वधारिणी । कामस्था कामरूपा च विश्वयोन्यै नमो नमः ॥

१ क्रियासारे—योनिमध्ये गतं लिङ्गं तुङ्गं पृथुकराङ्गुलम्। मृत्पिण्डद्वितयं तस्याः पार्श्वयोः कुम्भिकुम्भवत् ॥ योन्याः पश्चिमतो नालमायामे चतुरङ्गुलम्।त्रिद्व्येकाङ्गुलविस्तारं
क्रमान्न्यूनाग्रमिष्यति ॥ २ विष्ण्वर्चनकल्पलतायां योन्यां गौरीस्थाने लक्ष्मीपूजनमुक्तं तथा दक्षिणोत्तरगोलार्धयोः सूर्यचन्द्रयोः पूजनमुक्तं तद्यथा—योन्यां लक्ष्मीपूजनम्—
श्रीश्चेतिनारायणऋषिः त्रिष्टुप्छन्दः आदित्यो देवता लक्ष्म्यावाहनेविनियोगः ॐश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाण
सर्वलोकम्मऽइषाण॥२२/३१॥समुद्रमथनाज्जाते जगदानन्दकारिके।हरिप्रिये च माङ्गल्ये योन्यां सन्निहिताभव॥ॐरक्तवर्णालङ्कृतायां योन्यां लक्ष्म्यै नमः लक्ष्मीमावा०स्थाप०॥

सदैवतकण्ठपूजनम् ॥ कण्ठे रुद्रपूजनम्—नीलग्रीवा इति परमेष्ठिप्रजापतिर्ऋषिः अनुष्टुप्छन्दः रुद्रो देवता कण्ठे रुद्रावाहने विनियोगः ॥ ॐनीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ॥ कुण्डस्य कण्ठदेशोऽयं नीलजीमूतसन्निभः। अस्मिन्नावाहये रुद्रं शितिकण्ठं कपालिनम्। एह्येहि भगवन्रुद्र शितिकण्ठ कपालभृत् । ॐभूर्भुवः स्वः कण्ठे रुद्राय नमः रुद्रमावाहयामि ॥ स्थापयामि रुद्राय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

कण्ठपूजनम्—जीवनंसर्वजन्तूनांस्वर्गादिस्थानमुत्तमम् । उत्तमाङ्गस्यचाधारंकण्ठमावाहयाम्यहम्॥ॐभू०कण्ठायनमःकण्ठमा०स्था०॥ कण्ठायनमःसर्वोपचारार्थेगन्धाक्षतपुष्पाणिस०॥प्रार्थना—कण्ठ मङ्गलरूपेणसर्वकुण्डेप्रतिष्ठितः । परितोमेखलास्त्वत्तोरचिताविश्वकर्मणा॥

नाभिपूजनम्—नाभिर्म्मइति प्रजापतिर्ऋषिः महापङ्क्तिश्छन्दः नाभिर्देवता नाभ्यावाहने विनियोगः॥ ॐनाभिर्म्मे चित्तं विज्ञानम्पायुर्म्मेपचितिर्भसत् ॥ आनन्दनन्दावाण्डौ मे भगꣳ सौभाग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोऽस्मि विशि राजा प्रतिष्ठितः॥ ॥ पद्माकाराऽथवा कुण्डसदृशाकृतिबिभ्रती । आधारः सर्वकुण्डानां नाभिमावाहयामिताम्॥ॐभूर्भुवःस्वः नाभ्यै नमः नाभिमावाहयामि स्थापयामि ॥ नाभ्यै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

---

ॐलक्ष्म्यै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणिस०॥प्रार्थना—ॐहस्तद्वयेन मुकुले धारयन्तीं सुलीलया।हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तये॥ योन्यां सूर्यपूजनम्—आकृष्णेनेति हिरण्यस्तूपऋषिः त्रिष्टुप्छन्दः सूर्योदेवता सूर्यावाहने विनियोगः॥ॐआकृष्णेन०॥ ॥दिवाकरसहस्रांशो सुरासुरनमस्कृत।लोकनाथ विश्वनेत्र योन्यां सन्निहितो भव॥ रक्तवर्णालङ्कृतायां योन्यां दक्षिणेभागे—ॐसूर्याय नमः सूर्यमावा० स्था०॥ ॐसूर्यायनमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि । सूर्यप्रार्थना—ॐपद्महस्त रथारूढ पद्मासन सुमङ्गल । क्षमाङ्कुरु दयालो त्वं ग्रहराज नमोऽस्तु ते॥योन्यां सोमपूजनम्—इमन्देवाइति वरुणऋषिः यजुश्छन्दः सोमो देवता सोमावाहने वि०॥ ॐइमन्देवा०॥ ॥ हिमरश्मे निशानाथ तारकाभिः समन्वित। आह्लादप्रद देवेश योन्यां सन्निहितो भव॥ रक्तवर्णालङ्कृतायां योन्या वामभागे—ॐसोमाय नमः सोममावाहयामि स्थापयामि ॥ ॐसोमाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ सोमप्रार्थना—ॐअत्रिपुत्र निशानाथ द्विजराज सुधाकर । सोम त्वं सौम्यभावेन ग्रहपीडां निराकुरु ॥



नाभिप्रार्थना—नाभे त्वं कुण्डमध्ये तु देवैः सह प्रतिष्ठिता ॥ अतस्त्वां पूजयामीह शुभदा सिद्धिदा भव ॥

कुण्डमध्ये नैर्ऋत्यकोणे वास्तुपूजनम्—वास्तोष्पत इत्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वास्तोष्पतिर्देवता वास्तोष्पत्यावाहने विनियोगः॥ॐवास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः॥यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे॥पा०गृ०॥ आवाहयामि देवेशं वास्तुदेवं महाबलम् । देवदेवं गणाध्यक्षं पातालतलवासिनम् ॥ ॐभूर्भुवः स्वः कुण्डमध्ये नैर्ऋत्यकोणे वास्तुपुरुषाय नमः वास्तुपुरुषमावाहयामि स्थापयामि ॥ वास्तुपुरुषाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

बलिदानम्—कुण्डपुरतः बलिं संस्थाप्य—ॐवास्तुपुरुषाय नमः अमुं बलिं समर्पयामि ॥

प्रार्थना—यस्य देहे स्थिता क्षोणी ब्रह्माण्डं विश्वमङ्गलम्॥ व्यापिनं भीमरूपं च सुरूपं विश्वरूपिणम्॥ पितामहसुतं मुख्यं वन्दे वास्तोष्पतिं प्रभुम् ॥ वास्तुपुरुष देवेश सर्वविघ्नहरो भव । शान्तिं कुरु सुखं देहि सर्वान्कामान्प्रयच्छ मे ॥ इति कुण्डपूजनम् ॥

अग्निप्रतिष्ठापनम्—सुवासिन्या श्रोत्रियागारात् अरणिसम्भवात् सूर्यकान्तसम्भवात् स्वगृहाद्वा समृद्धं निर्धूमं कांस्येनाप्सम्भवे

---

१ प्रयोगरत्ने सङ्ग्रहे च—उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहादिजः । उत्तमोऽरणिजन्योऽग्निर्मध्यमः सूर्यकान्तजः ॥ प्रदीप्तबहुलाङ्गारक्षमं तन्तुहविर्भुजम् । लेखासु च प्रतिष्ठाप्येत्यनेन प्रतिपाद्यते ॥ शारदातिलकेपि—सूर्यकान्तादिसम्भूतं यद्वा श्रोत्रियगेहजम् । आनीय चाग्निं पात्रेण क्रव्यादांशं परित्यजेत् ॥ सूर्यकान्तादरणितः श्रोत्रियागारतोपि वा । पात्रेण पिहिते पात्रे वह्निमेवानयेत्ततः । अस्त्रेणादाय तत्पात्रं वर्मणोद्घाटयेत्तु तम्। अस्त्रमन्त्रेण नैर्ऋत्ये क्रव्यादांशं ततस्त्यजेत्॥ त्याज्याग्निमाह देवलः—चाण्डालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः॥ २ शुभं पात्रन्तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः। तस्याभावे शरावेण नवेनापि दृढेन च ॥ अत्रिः—सौवर्णं राजतं ताम्रं तदभावे तु मृण्मयम् । पात्रान्तरेण पिहितमग्निप्रणयने स्मृतम्॥ गोभिलः—पात्रान्तरेण पिहिते ताम्रपात्रादिके शुभे । अग्निप्रणयनं कुर्याच्छरावे तादृशेपि वा ॥ वर्ज्यपात्राणि—शरावे भिन्नपात्रे वा कपाले त्वायसेपि वा । नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहम् ॥ अत्र शरावनिषेधकं वचनं कुलालचक्रघटितविषयकं पुराणशरावपरं वा इति स्मृतिसारे ॥ अत्र गदाधरः—कुलालचक्रघटितं मृण्मयं पात्रमासुरम्। तदेव हस्तघटितं स्थाल्यादि दैवपैतृकम् ॥ गोभिली-

स्वहस्तघटितमृण्मयेन वा सजातीयपात्रयुग्मेन संपुटीकृतमाहृतमग्निं कुण्डस्य स्थण्डिलस्य वाऽऽग्नेय्यां दिशि आचार्यो निदध्यात् ॥

क्रव्यादांशहरणम्—क्रव्यादमग्निमित्यस्य दमनऋषिः त्रिष्टुप्छन्दः अग्निर्देवता पूर्वार्धस्य क्रव्यादांशनिरसने उत्तरार्धस्य च पुरतः देवांशस्थापने विनियोगः ॥ ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ॥ ॐ फट् इत्यस्त्रेण पात्रमादाय हुं इति वर्मणोद्घाट्य ॐ फट् इत्यस्त्रेण क्रव्यादांशं नैर्ऋत्यां क्षिप्त्वा-इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ इत्यनेन देवांशं पुरतः स्थापयेत् ॥

हस्तयोरग्निग्रहणम्—मयि गृह्णामीत्यस्य प्रजापतिर्ऋषिः उष्णिक्छन्दः अग्निर्देवता हस्ताभ्यामग्निपात्रग्रहणे विनि० ॥ ॐ मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ मामु देवताः सचन्ताम् ॥ इति मन्त्रेण कुण्डाद्बहिः स्थापितमग्निपात्रं आचार्यः गृह्णीयात् ॥

अग्निस्थापनम्—अग्निर्मूर्द्धेति विरूपाक्षऋषिः गायत्रीछन्दः अग्निर्देवता ॐकारस्य परब्रह्मऋषिः गायत्रीछन्दः परमात्मा देवता तिसृणां व्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्या देवताः कुण्डे अग्निस्थापने विनियोगः ॥ ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ॥ अपाꣳ रेताꣳसि जिन्वति ॥ ॐ भूर्भुवः स्वरोम् ॥ इति आग्नेयकोणमार्गेण योनिमार्गेण वा कुण्डे वरदनामानमग्निमुपसमादधे ॥

यपरिशिष्टे—कपालैर्भिन्नपात्रैर्वा न त्वामैर्गोमयेन वा । अग्निप्रणयनं कार्यं यजमानभयावहम् ॥ अल्पप्रणीतो विच्छिन्नोऽसमिद्धश्चापरिष्कृतः । त्वरया पुनरानीतो यजमानभयावहः ॥ तस्माच्छुभेन पात्रेण अविच्छिन्नाकृशं बहु । अग्निप्रणयनं कुर्याद्यजमानसुखावहम् ॥ १ सम्पुटेनाग्निमानीय स्थाप्याग्नेर्दिशि कुण्डतः । आमक्रव्यभुजौ तस्मात्त्यक्त्वा कुण्डे विनिक्षिपेत् ॥ शारदायाम्—आनीयास्त्रेण नैर्ऋत्ये क्रव्यादांशं परित्यजेत् ॥ श्रोत्रियलक्षणमाह देवलः—एकशाखां सकल्पां च षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥ तथा च—जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥ २ कर्मविशेषे अग्निनामानि—पावको लौकिके ह्यग्निः प्रथमः सम्प्रकीर्तितः । अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥ ततः पुंसवने ज्ञेयः पवमानस्तथैव च ।



अग्न्याहरणपात्रे साक्षतोदकं निषिच्य समाचारात्तत्र किञ्चिद्धिरण्यमाभूषणं वा निक्षिप्य तत्सुवासिन्यै दापयेत् ॥

आवाहनादिसप्तमुद्राप्रदर्शनम्—१ ॐ आवाहितो भव ॥ २ ॐ स्थापितो भव ॥ ३ ॐ सन्निहितो भव ॥ ४ ॐ सन्निरुद्धो भव ॥ ५ ॐ अवगुण्ठितो भव ॥ ६ अस्त्रेण—ॐ संरक्षितो भव ॥ ७ धेनुमुद्रया—ॐ अमृतीकृतो भव ॥

सीमन्ते मङ्गलो नाम प्रबलो जातकर्मणि । नाम्नि वै पार्थिवो ह्यग्निः प्राशने तु शुचिः स्मृतः । सभ्यनामा तु चूडायां व्रतादेशे समुद्भवः ॥ गोदाने सूर्यनामास्याद्वैश्वानरो विसर्गके । विवाहे योजको नाम चतुर्थ्यां शिखिनामकः । आवसथ्ये द्विजो ज्ञेयो वैश्वदेवे तु पावकः । प्रायश्चित्ते तु विट् चैव पाकयज्ञेषु पावकः ॥ देवानां हव्यवाहश्च पितॄणां कव्यवाहनः । शान्तिके वरदः प्रोक्तः पौष्टिके बलवर्द्धनः । पूर्णाहुत्यां मृडो नाम क्रोधाग्निश्चाभिचारके । वश्यार्थे कामदो नाम वनदाहे तु दूषकः ॥ कुक्षौ तु जाठरो ज्ञेयः क्रव्यादो मृतदाहके । वृषोत्सर्गेऽध्वरो नाम शुचये ब्राह्मणः स्मृतः ॥ समुद्रे वाडवो ह्यग्निः क्षये संवर्तकस्तथा । ब्रह्मा वै गार्हपत्ये स्याद्दक्षिणाग्नावथेश्वरः ॥ विष्णुराहवनीये स्यादग्निहोत्रे त्रयोऽग्नयः । लक्षहोमेऽभीष्टदः स्यात् कोटिहोमे महाशनः ॥ ग्रहहोमे विशेषः स्कान्दे—आदित्ये कपिलो नाम सोमे पिङ्गल उच्यते । धूमकेतुस्तथा भौमे जाठरोऽग्निर्बुधे स्मृतः ॥ गुरौ चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहुकेत्वोर्हुताशनः ॥ ज्ञात्वैवमग्निनामानि गृह्यकर्म समाचरेत् । अविदित्वा तु यो ह्यग्निं होमयेदविचक्षणः ॥ न हुतं न च संस्कारो न तु यज्ञफलं भवेत् ॥ वायवीयसंहितायाम्—वह्निबीजं समुच्चार्य त्वादधीताग्निमासने । योनिमार्गेण वै तद्वदात्मनः सम्मुखे न वा ॥ (योनिमार्गेण मेखलोपरिस्थितरन्ध्रेणेत्यर्थः) १ कुशकण्डिकाभाष्ये—अग्न्यानयनपात्रे तु प्रक्षिपेदक्षतोदकम् । यद्येवं नैव कुर्वीत यजमानभयावहम् ॥ अन्यच्च—अग्न्यानयनपात्रन्तु आर्द्रं कृत्वा समुद्वहेत् । अकृते भ्रष्टहोमः स्यादायस्तत्र न पूर्यते ॥ कल्पवल्ल्यामपि—आनीतपात्रयोरेव प्लावनं तत्क्षणे भवेत् । नोचेत्कर्तुर्मनस्तापः स्यात्सन्तापस्तयोरपि ॥ प्रयोगपारिजाते—अग्निसंस्थापनं कुर्यात्प्राग्यतः संयतेन्द्रियः । स्नापयतो वरुणः कान्तिं जुह्वतोग्निः श्रियं हरेत् ॥ भुञ्जतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतम् ॥ ( व्याहृत्युच्चारणं कृत्वा तूष्णीमग्निं स्थापयेदित्यविरोधः ) २ आवाहनं स्थापनञ्च सन्निधानं निरुन्धनम् । ततोऽवगुण्ठनं चास्त्रं धेनुमुद्राप्रदर्शनम् ॥ हस्ताभ्यामञ्जलिं कृत्वाऽनामिकामूलपर्वयोः । अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी मता ॥ अधोमुखी त्वियं चेत्स्यात्स्थापिनीति निगद्यते । उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात्सन्निधापिनी ॥ अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधिनी मता ॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी । अवगुण्ठनमुद्रेयमभितो भ्रामिता सती ॥ हस्तद्वयेन परस्परतालं अस्त्रमुद्रा ॥ अन्योन्याभिमुखा श्लिष्टा कनिष्ठानामिका पुनः ॥ तथैव तर्जनी मध्या धेनुमुद्रेयमीरिता ॥

सन्धुक्षणम्–त्वाङ्कृतोसीति प्रजापतिर्ऋषिः जगतीछन्दः अग्निर्देवता सन्धुक्षणे विनियोगः॥ॐत्वाङ्कृतोसि विश्वेभ्यऽ इन्द्रियेभ्यो दिव्येभ्युऽ पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवांऽशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भङ्गेन हतो सौ फट् प्राणाय त्वा व्यानाय त्वा ॥३॥ इति मन्त्रेण सन्धुक्षणम् ॥ ( सन्धुक्षणं नाम प्रोक्षितेन्धनप्रक्षेपः ) वेणुधमन्या प्रबोध्य ध्यायेत् ॥

अग्निध्यानम्–चत्वारिशृङ्गेति वामदेवऋषिः त्रिष्टुप्छन्दः अग्निर्देवता अग्निध्याने विनियोगः ॥ हस्ते पुष्पाण्यादाय–ॐचत्वारिशृङ्गा त्रयोऽ अस्य पादा द्वे शीर्षे सप्तहस्तासोऽ अस्य॥त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ऽआविवेश॥$\frac{1}{1}$॥रुद्रतेजःसमुद्भूतं द्विमूर्धानं

१ धर्मसूत्रे–नाप्रोक्षितमिन्धनमग्नावादध्यात्॥ २ विश्वामित्रकल्पे–न पाणिना न शूर्पेण न चामेध्यादिनापि वा । मुखेनोपधमेदग्निं मुखादग्निरजायत ॥ पट्टकेन भवेद्व्याधिः शूर्पेण धननाशनम् । पाणिना मृत्युमाप्नोति कर्मसिद्धिर्मुखेन तु ॥ आपस्तंबः–न कुर्यादग्निधमनं कदाचिद्व्यजनादिना ॥ मुखेनैव धमेदग्निं धमन्यावेणुजातया ॥ उपरितन-श्लोकद्वये मुखेनाग्निधमनं यदुक्तं तद्वेणुधमनीमन्तराकृत्वैवेति बोध्यम् आस्यबिन्दूना पतनशङ्काभयात् केचन केवलं मुखेनैवाग्निधमनं मन्यन्ते तदलीकम् एतद्विषयेप्रमाणा-न्यधोलिखितान्यूह्यानि देवलः–जुहुतश्चाथ पर्णेन पाणिशूर्पास्यदारुभिः।न कुर्यादग्निधमनं तथा च व्यजनादिना ॥ पर्णेनैव भवेद्व्याधिः शूर्पेण धननाशनम्।पाणिना मृत्यु-माप्नोति पटेन विफलं भवेत्॥ व्यजनेनातिदुःखाय आस्येनायुःक्षयो भवेत्। वस्त्रेण स्त्रीविनाशः स्याद्दारुणा कान्तिनाशनम्। धमनीमन्तराकृत्वा तृणं वा काष्ठमेव वा । मुखेनोपधमेदग्निमुखादग्निरजायत।वेणोरग्निप्रसूतित्वाद्वेणुरग्नेश्च पातनः।तस्माद्वेणुधमन्यैव धमेदग्निं विचक्षणः॥ श्रुतिरपि–तेजो वै वेणुस्तेजः प्रवर्ग्यस्तेजसैव तेजः समर्द्धयति॥

३ गोभिलः—होष्यन्नग्नेर्विजानीयात्स्वरूपं श्रुतिनोदितम् । अजानता कृतं कर्म तदल्पफलमिष्यते ॥ वसिष्ठकल्पे–अग्निरूपमयो वक्ष्ये सिद्धयर्थं सर्वकर्मणाम् । यतस्तस्मिन्नविज्ञाते होमो भवति निष्फलः॥ स्मरेदग्निं द्विजो होष्यन्रक्तं गोवृषरूपिणम्॥विततोर्ध्वाननं मध्येवृहत्कर्णसुलोचनम्॥चतुःशृङ्गं त्रिपादं च द्विशीर्षं सप्तहस्तकम्। द्विपुच्छं च त्रिधाबद्धं चतुर्नेत्रं त्रयीमयम्॥शृङ्गाश्चत्वार उद्दिष्टा या ऊर्ध्वसमिधश्च ताः।वैदिकं तान्त्रिकं वह्नेः पादाः परिधयस्त्रयः॥ऋगाद्याश्च त्रयो वेदाः पुरुषार्थास्तदीक्षणाः।



द्विनासिकम्। षण्णेत्रञ्च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम्॥याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम्।स्रुवं स्रुचञ्च शक्तिञ्च अक्षमालाञ्च दक्षिणे॥तोमरं व्यजनञ्चैव घृतपात्रन्तु वामके।बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम्।याम्यानने चतुर्जिह्वं त्रिजिह्वंचोत्तरेमुखे।द्वादशकोटि-मूर्त्याख्यंद्विपञ्चाशत्कलायुतम्।आत्माभिमुखमासीनंध्यायेऽहंतुहुताशनम्॥गोत्रमग्नेस्तु शाण्डिल्यंशाण्डिल्यासितदेवलाः।त्रयोऽमी प्रवरा माता त्वरणी वरुणःपिता॥पुष्पाणि कुण्डोपरिक्षिप्त्वा ज्वालिनीमुद्राप्रदर्शनम्-ॐचितिपिङ्गलहनहनदहदहपचपच सर्वाज्ञां ज्ञापय स्वाहा॥

अग्न्यावाहनम्–आवोदेवास इत्यस्य प्रजापतिर्ऋषिः दैवी अनुष्टुप्छन्दः आशीर्देवता अग्न्यावाहने विनियोगः॥ ॐआ वो देवासऽ ईमहे वामम्प्रयत्यध्वरे ॥ आ वो देवासऽ आशिषो यज्ञियासो हवामहे ॥४॥ रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् । स्वाहास्वधाव-षट्कारैरङ्कितं मेषवाहनम् । वरदं वरदाख्यं वै वह्निमावाहयाम्यहम् । त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते ॥ आगच्छ भगवन्नग्ने कुण्डेऽस्मिन्सन्निधो भव ॥ ॐभूर्भुवः स्वः वैश्वानर शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेति त्रिप्रवर भूमिमातः वरुणपितः पश्चिमचरण पूर्वशिरस्कन्ध ऊर्ध्वपाद पातालदृष्टिगोचर मेषध्वज प्राङ्मुख अग्ने त्वं स्वागतो भव ॥

प्रतिष्ठापनम्–मनोजूतिरित्यस्य आङ्गिरसोबृहस्पतिर्ऋषिःयजुश्छन्दःविश्वेदेवादेवता अग्निप्रतिष्ठापनेवि०॥ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्ता०॥$\frac{13}{2}$॥ॐभूर्भुवःस्वःवरदनामाग्नेसुप्रतिष्ठितोवरदोभव ।

छन्दांसि सप्तहस्तानि पुच्छौ पक्षौ सितासितौ ॥ रोमाण्यूरूणि तस्याहुश्चातुर्मास्यानि बन्धनम् । संवत्सरोऽनुयाजाख्याः समित्कर्म सुगद्यते ॥ तदापञ्चदिनान्येव समिधः प्राहुरुत्तमाः । तच्च सर्वात्मनो वह्नेरात्मत्वेन निगद्यते ॥ शारदातिलके–वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः । शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु ॥ एतच्च तान्त्रिके होमे नियतमिति रत्नमालायाम् ॥ १ ज्वालिनीमुद्रालक्षणं मुद्राप्रकाशे–मणिबन्धयुतौ कृत्वा प्रसृताङ्गुलिकौ करौ । कनिष्ठाङ्गुष्ठयुगले मिलित्वान्तःप्रसारिते । ज्वालिनी नाम मुद्रेयं वैश्वानरप्रियंकरी ॥ २ चिराच्छिष्टपठितमिदं वह्नेर्भूमिमातृत्वं वरुणपितृत्वं च न विद्मः तस्मात्तज्ज्ञैर्मूलं मृग्यम् ॥

अग्नेः स्वात्माभिमुखकरणम्–एषोहदेवेति स्वयंभूर्ब्रह्मऋषिः त्रिष्टुप्छन्दः अग्निर्देवता स्वात्माभिमुखाग्निकरणे विनियोगः ॥ ॐएषो ह॑ दे॒वः प्र॒दिशो॒नु सर्वा॒ पूर्वो॑ ह जा॒तः स उ॒ गर्भे॑ अ॒न्तः ॥ स ए॒व जा॒तः स ज॑नि॒ष्यमा॑णः प्र॒त्यङ्जना॑स्तिष्ठति स॒र्वतो॑मुखः ॥ ४/२ ॥ ॐभूर्भुवः स्वः वरदनामाग्ने मम सम्मुखो भव ॥

पूजनम्–ॐभूर्भुवः स्वः वरदनामाग्नये नमः इति नाममन्त्रेण षोडशोपचारैः बहिः कुण्डनैऋत्यकोणे [१] मध्ये वा अग्निं सम्पूज्य प्रार्थयेत् ॥ कृतसम्पुटकरः—अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् । हिरण्यवर्णममलं समृद्धं विश्वतोमुखम् ॥

१ अग्नये गन्धादिकं बहिरेवदेयमिति कल्पद्रुमकाराः अन्ये तु मध्ये पूजनमिच्छन्ति । विष्णुधर्मोत्तरे–मध्येपि गन्धपुष्पादीन् दद्यादग्नेर्न संशयः । बहिर्नैवेद्यमात्रन्तु दातव्यमिति निश्चितम् ॥ गौडास्त्वत्र सप्तजिह्वा आवाह्य पूजयन्ति ॥ अग्निजिह्वा नामानि–काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरुचिस्तथा च चलायमाना इति सप्तजिह्वाः॥एताश्चोक्ता विशेषेण ज्ञातव्या ब्राह्मणेन तु । याभिर्हव्यं समश्नाति हुतं सम्यग्द्विजोत्तमैः॥ आहूय चैव होतव्यो यो यत्र विहितो विधिः।अविदित्वा तु यो ह्यग्निं होमयेदविचक्षणः॥ न हुतं न च संस्कारो न तु यज्ञफलं भवेत्।अन्यत्र सप्तजिह्वैककरणमुक्तम्–जिह्वैककरणं प्रोक्तं सप्तानामेकया ऋचा। समुद्रादूर्मिरनया होतव्यं कर्मसिद्धये ॥ जिह्वास्थानानि वसिष्ठकल्पे–कुण्डस्य पूर्वदिग्भागे काली जिह्वा प्रकीर्तिता । आग्नेये तु करालयाख्या दक्षिणे तु मनोजवा ॥ सुलोहिता नैर्ऋते च धूम्रवर्णा तु वारुणे । स्फुलिङ्गिनी तु वायव्ये सौम्ये विश्वरुचिस्तथा॥ काल्यां कराल्यां वा कुर्याच्छान्तिकं पौष्टिकं तथा । मनोजवायां जिह्वायामभिचारोऽभिधीयते ॥ सुलोहितायां जिह्वायां विदुरुच्चाटनं बुधाः । सर्वार्थसिद्धिकां विश्वरुचिं मन्त्रविदो विदुः ॥ अपरे वसुधारेति जिह्वां पूर्वोदितां जगुः । उपजिह्वेति सा प्रोक्ता लक्ष्मीस्तत्र प्रतिष्ठिता ॥ कुण्डस्य मध्यमं पार्श्वमग्नेरास्यं प्रकीर्तितम्। तस्मिन्सर्वाणि कार्याणि साधनीयानि नित्यशः ॥ सङ्ग्रहे विशेषः–विवाहे वारुणी जिह्वा मध्यमा यज्ञकर्मसु।उत्तरा चोपनयने दक्षिणा पितृकर्मसु॥प्राचीना सर्वकार्येषु ह्याग्नेयी सर्वकर्मसु । ऐशानी चोग्रकार्येषु बुद्ध्येत्तद्धोमलक्षणम्॥अन्यच्च–यत्र काष्ठस्तत्रकर्णौ धूमस्तत्र च नासिका।काष्ठमल्पं ज्वलं नेत्रं ज्वलनं मूर्ध्नि विन्यसेत्। प्रज्वाल्य वह्निं जिह्वायां होमं कुर्यादतन्द्रितः । अग्नौ कर्णाहुतिं कुर्याद् दुर्भिक्षव्याधिपीडनम् ॥ नासिकायां मनोदुःखं चक्षुषो ग्रामनाशनम्।मूर्ध्निस्थानेऽशुभं कुर्याद्राजाराष्ट्रं विनश्यति॥तस्मात्सर्वप्रयत्नेन जिह्वायां होममाचरेत् । संग्रहे–शुभदा दक्षिणावर्ता ह्यशुभा वामभागतः॥घृतभारसहस्राणि काष्ठभारायुतानि च॥एवं च क्रियते होमे ध्यानहीने न सिद्ध्यति।शान्तिकेवरद एव अन्यग्रन्थेषु शतमङ्गलाद्यभिधानानि भ्रान्तिमूलकानि॥



॥ अथ ग्रहमण्डलदेवतावाहनस्थापनप्रतिष्ठापूजनप्रयोगः ॥

कुण्डस्य स्थण्डिलस्य वा रुद्रदिग्भागे ग्रहवेद्युपरि [१] श्वेतवस्त्रं प्रसार्य यथोक्तं ग्रहमण्डलं विरच्य तत्र सूर्यादीन् स्थापयेत् ॥

सपत्नीको यजमानः ग्रहपीठपश्चिमभागे पूर्वाभिमुख उपविश्य पूजासम्भारान्स्वनिकटे संस्थाप्य हस्ते जलमादाय–पूर्वोच्चरितशुभपुण्यतिथौ प्रारीप्सितस्य वास्तुशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ग्रहमण्डलदेवतावाहनस्थापनप्रतिष्ठापूजनानि करिष्ये ॥

१ आकृष्णेनेत्यस्यहिरण्यस्तूपआङ्गिरसऋषिःत्रिष्टुप्छन्दःसूर्योदेवतासूर्यावाहनेविनियोगः–ॐआकृ॒ष्णे॒न॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑च।हि॒र॒ण्यये॑न सवि॒ता रथे॒ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न्॥४/३॥ प्राङ्मुखं सूर्यं पीठमध्ये वर्तुले द्वादशाङ्गुले मण्डले–ॐभूर्भुवः स्वः सूर्याय नमः सूर्यमावाहयामि स्थापयामि॥ कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य इहागच्छ इह तिष्ठ ॥

२ इमन्देवाइत्यस्यवरुणऋषिःअत्यष्टीछन्दःसोमोदेवतासोमावाहनेवि०॥ॐइ॒मन्दे॑वाऽअसप॒त्नᳬसु॑वध्वम्मह॒ते क्ष॒त्राय॑ मह॒ते ज्यैष्ठ्या॑य मह॒ते जान॑राज्या॒येन्द्र॑स्येन्द्रि॒याय॑ । इ॒मम॒मुष्य॑ पु॒त्रम॒मुष्यै॑ पु॒त्रम॒स्यै वि॒श ऽए॒ष वो॑ऽमी॒ राजा॒ सोमो॒ऽस्माकं॑ ब्राह्म॒णाना॒ᳬ राजा॑॥९/४०॥ प्रत्यङ्मुखं सोममाग्नेय्यांचतुर्विंशत्यङ्गुलेमण्डले-ॐभूर्भुवःस्वः सोमायनमःसोममावा०स्था० ॥ यमुनातीरोद्भवआत्रेयसगोत्रशुक्लवर्णभोसोमइ० इ०

१ ग्रहवेदीमानम्—कुण्डरत्नावल्याम्–कोटिलक्षायुते होमे द्विसार्धकरसंमिता। वर्जयित्वा रुद्रहोममीशान्यां ग्रहवेदिका ॥१५२॥करोर्धदोर्वोच्छ्रय एकहस्ता तता च तस्याश्चिरगुणांरगुलोच्चौ । वप्रौ तृतीयो यदि चेद् द्वितीयतुल्यस्ततास्ते च यमाङ्गुलाभ्याम् ॥ १५३ ॥ टीका–कोटिहोमे द्विहस्ता लक्षहोमे सार्धहस्ता अयुतहोमे करसम्मिता । अन्यत्र अयुतादिग्रहहोमातिरिक्त एकहस्तैव । रुद्रहोमं वर्जयित्वा ग्रहवेदीशान्यां स्यात् । रुद्रपद्धतौ तत्र रुद्रवेद्युक्तत्वात् । तदुक्तम् ग्रहपीठमालायाम्–श्लोकः–गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम्।वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रायसंमिताम्॥संस्थापनाय देवानां चतुरस्रामुदक्प्लवाम्। लक्षहोमग्रहमखे वितस्तित्रयसंमिताम्॥ कोटिहोमग्रहमखेतांवितस्तिचतुष्टयाम्॥करः एकहस्तअर्धदोर्वा अर्धहस्तो वा वेदेरुच्छ्रय उच्चता।सा वेदिरकहस्ता तता च विस्तृताच कार्या। तस्याः परितः द्व्यङ्गुलत्र्यङ्गुलोच्चौ द्वौ वप्रौ कार्यौ । यदि तृतीयोपि कर्तव्यस्तदा द्वितीयतुल्यः कार्यः । ते त्रयोपि द्व्यङ्गुलाभ्यां विस्तृताः कार्या । मात्स्ये–वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रायसंमिताम् । तथा तत्रैव । द्व्यङ्गुलेनोच्छ्रितोवप्रः प्रथमः समुदाहृतः। त्र्यङ्गुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि । द्व्यङ्गुलश्चैव विस्तारः सर्वेषां कथ्यते बुधैः ॥ ग्रन्थान्तरे—कुण्डस्य रुद्रदिग्भागे द्विहस्तं पीठमाचरेत् । किञ्चिन्मध्योन्नतं कुर्यादुच्छ्राये द्वादशाङ्गुलम् ॥ त्रिंशाङ्गुलं प्रकर्त्तव्यमन्तरं कुण्डपीठयोः ॥ इति द्विहस्तं ( अङ्गुल ३३–७–५ ) ग्रहपीठमुक्तम् ।

३ अग्निर्मूर्द्धेत्यस्य विरूपाक्षऋषिः गायत्रीछन्दः भौमो देवता भौमावाहने विनियोगः—ॐअग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽ अयम्॥ अपाᳬरेताᳬसि जिन्वति॥१२/३॥दक्षिणाभिमुखं भौमं दक्षिणस्यां दिशि त्रिकोणे त्र्यङ्गुले मण्डले—ॐभूर्भुवः स्वः भौमाय नमः भौममावाहयामि स्थापयामि ॥ अवन्तिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम इहागच्छ इह तिष्ठ ॥

४ उद्बुध्यस्वेत्यस्य परमेष्ठीऋषिः त्रिष्टुप्छन्दः बुधो देवता बुधावाहने विनियोगः—ॐउद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳬसृजेथामयञ्च॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत॥६१/१८॥उदङ्मुखं बुधमैशान्यां दिशि बाणाकारे चतुरङ्गुले मण्डले—ॐभूर्भुवः स्वः बुधाय नमः बुधमावाहयामि स्थापयामि ॥ मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण भो बुध इहागच्छ इह तिष्ठ ॥

५ बृहस्पत इत्यस्य गृत्समदऋषिः त्रिष्टुप्छन्दः बृहस्पतिर्देवता बृहस्पत्यावाहने विनियोगः—ॐबृहस्पतेऽअति यदर्य्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम्॥३/२६॥ उदङ्मुखं बृहस्पतिमुत्तरस्यां दिशि लम्बदीर्घचतुरस्रे पद्माकारे षडङ्गुले मण्डले—ॐभूर्भुवः स्वः बृहस्पतये नमः बृहस्पतिमा० स्था०॥ सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो बृहस्पते इहागच्छ इह तिष्ठ॥

६ अन्नात्परिस्रुत इत्यस्य अश्विसरस्वतीन्द्राऋषयः अतिजगतीछन्दः शुक्रो देवता शुक्रावाहने विनियोगः—ॐअन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानᳬ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु॥७५/१९॥ प्राङ्मुखं शुक्रं पूर्वस्यां दिशि पञ्चकोणे नवाङ्गुले मण्डले—ॐभूर्भुवः स्वः शुक्राय नमः शुक्रमा० स्था०॥ भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र इहागच्छ इह०

७ शन्नोदेवीरित्यस्य दध्यङ्ङाथर्वणऋषिः गायत्रीछन्दः शनैश्चरो देवता शनैश्चरावाहने विनियोगः—ॐशन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥ १२/३६ ॥ प्रत्यङ्मुखं शनिं पश्चिमायां दिशि धनुराकारे द्व्यङ्गुले मण्डले—ॐभूर्भुवः स्वः ॐशनैश्चराय नमः शनैश्चरमावाहयामि स्थापयामि ॥ सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर इहागच्छ इह तिष्ठ ॥

८ कयान इत्यस्य वामदेवऋषिः गायत्रीछन्दः राहुर्देवता राह्वावाहने विनियोगः—ॐकया नश्चित्रऽ आभुवदूती सदावृधः सखा ॥ कया शचिष्ठया वृता ॥ ३६/४॥ दक्षिणाभिमुखं राहुं नैर्ऋत्यां दिशि शूर्पाकारे द्वादशाङ्गुले मण्डले—ॐभूर्भुवः स्वः राहवे नमः राहुमावाहयामि स्थापयामि ॥ राठिनापुरोद्भव पैठिनसगोत्र नीलवर्ण भो राहो इहागच्छ इह तिष्ठ ॥

९ केतुङ्कृण्वन्नित्यस्य मधुच्छन्दाऋषिः अनिरुक्तागायत्रीछन्दः केतुर्देवता केत्वावाहने विनियोगः—ॐकेतुङ्कृण्वन्न केतवे पेशो मर्य्याऽ अपेशसे ॥ समुषद्भिरजायथाः ॥ ३७/२९ ॥ दक्षिणाभिमुखं केतुं वायव्यां दिशि ध्वजाकारे षडङ्गुले मण्डले—ॐभूर्भुवः स्वः केतवे नमः केतुमावाहयामि स्थापयामि ॥ अन्तर्वेदिसमुद्भव जैमिनिसगोत्र धूम्रवर्ण भो केतो इहागच्छ इह तिष्ठ ॥

अधिदेवतावाहनम्—१ त्र्यम्बकमित्यस्य वसिष्ठऋषिः अनुष्टुप्छन्दः ईश्वरो देवता ईश्वरावाहने वि०—ॐत्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम्॥ उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥६०/३॥सूर्यदक्षिणपार्श्वे—ॐभूर्भुवः स्वः ईश्वराय नमः ईश्वरमा० स्था०॥ भो ईश्वर इ० इ०॥

२ श्रीश्चत इत्यस्य उत्तरनारायणऋषिः त्रिष्टुप्छन्दः उमा देवता उमावाहने वि०—ॐश्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥२२/३१॥सोमदक्षिणपार्श्वे—ॐभू० उमायै नमः उमामा० स्था०॥ भो उमे इ० इ०॥

३ यदक्रन्द इत्यस्य भार्गवजमदग्निदीर्घतमाऋषयः त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहने विनियोगः—ॐयदक्रन्दः प्रथमञ्जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यम्महि जातन्तेऽ अर्वन्॥१२/२९॥ भौमदक्षिणपार्श्वे—ॐभूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावाहयामि स्थापयामि ॥ भो स्कन्द इहागच्छ इह तिष्ठ ॥

४ विष्णोरराटमित्यस्य प्रजापतिऋषिः यजुश्छन्दः विष्णुर्देवता विष्ण्वावाहने विनियोगः ॐविष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि॥ वैष्णवमसि विष्णवे त्वा॥२१/५ ॥बुधदक्षिणपार्श्वे—ॐभूर्भुवः स्वः विष्णवे० विष्णुमा० स्था०॥ भो विष्णो इहा० इह०॥

५ आब्रह्मन्नित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः ॥ ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्य ᳪ शूर ऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिᳪ पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नᳪ पर्ज्जन्यो वर्षतु फलवत्यो नऽ ओषधयᳪ पच्यन्तां योगक्षेमो नः कल्पताम् ॥२२॥ गुरुदक्षिणपार्श्वे–ॐभूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥ भो ब्रह्मन् इहागच्छ इहतिष्ठ ॥

६ सजोषाइन्द्रेत्यस्य विश्वामित्रऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रावाहने विनियोगः–ॐसजोषाऽ इन्द्र सगणो मरुद्भिᳪ सोमम्पिब वृत्रहा शूर विद्वान् ॥ जहिशत्रूँ१रप मृधो नुदस्वाथाभयङ्कृणुहि विश्वतो नᳪ॥३७॥ शुक्रदक्षिणपार्श्वे–ॐभूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि ॥ भो इन्द्र इहागच्छ इह तिष्ठ ॥

७ यमायत्वेत्यस्य दध्यङ्ङाथर्वणऋषिः यजुश्छन्दः यमो देवता यमावाहने विनियोगः–ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे॥३८॥शनिदक्षिणपार्श्वे–ॐभूर्भुवःस्वः यमायनमःयममावाहयामिस्थापयामि॥ भो यमइहागच्छइहतिष्ठ॥

८ कार्षिरसीत्यस्यप्रजापतिर्ऋषिःअनुष्टुप्छन्दःकालोदेवताकालावाहनेविनियोगः–ॐकार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधीᳪ॥२८॥राहुदक्षिणपार्श्वे–ॐभूर्भुवःस्वः कालायनमः कालमा०स्था०॥भोकाल इहागच्छइहतिष्ठ॥

९ चित्रावसोइत्यस्य हिरण्यस्तूपऋषिः यजुर्जगतीछन्दः चित्रगुप्तो देवता चित्रगुप्तावाहने विनियोगः–ॐचित्रावसो स्वस्ति ते पारमशीय॥५७॥ केतुदक्षिणपार्श्वे–ॐभूर्भुवःस्वः चित्रगुप्ताय नमः चित्रगुप्तमावाहयामि स्थापयामि ॥ भो चित्रगुप्त इहागच्छ इह तिष्ठ ॥

प्रत्यधिदेवतावाहनम्–१ अग्निन्दूतमित्यस्यविरूपाक्षऋषिः गायत्रीछन्दः अग्निर्देवताअग्न्यावाहनेविनियोगः–ॐअग्निन्दूतम्पुरो दधे हव्यवाहमुपब्रुवे।देवाँ२आसादयादिह॥१७॥ॐसूर्यवामपार्श्वे–ॐभूर्भुवःस्वःअग्नयेनमःअग्निमावाहयामिस्था०॥भोअग्नेइहागच्छइहतिष्ठ॥



२ आपोहिष्ठेत्यस्य सिन्धुद्वीपऋषिः गायत्रीछन्दः आपो देवता अपावाहने विनियोगः–ॐआपोहिष्ठा मयोभुवस्ता नऽऊर्ज्जे दधातन॥ महे रणाय चक्षसे॥३६॥सोमवामपार्श्वे–ॐभूर्भुवः स्वः अद्भ्यो नमः अप आवाहयामि स्थापयामि॥भो आप इहागच्छत इह तिष्ठत॥

३ स्योनापृथिवीत्यस्यमेधातिथिर्ऋषिः गायत्रीछन्दः पृथ्वीदेवता पृथ्व्यावाहनेविनियोगः–ॐस्योना पृथिविनोभवानृक्षरानिवेशनी॥ यच्छानᳪशर्म्मसप्रथाᳪ॥३६॥भौमवामपार्श्वे–ॐभूर्भुवःस्वःपृथिव्यैनमः पृथिवीमावाहयामि स्थापयामि॥भोपृथिविइहागच्छइहतिष्ठ॥

४ इदंविष्णुरित्यस्यमेधातिथिर्ऋषिः गायत्रीछन्दः विष्णुर्देवताविष्ण्वावाहनेविनियोगः–ॐइदंविष्णुर्विचक्रमेत्रेधानिदधे पदम्॥समूढ-मस्यपाᳪसुरेस्वाहा॥५॥ बुधवामपार्श्वे–ॐभूर्भुवःस्वः विष्णवे नमः विष्णुमावाहयामि स्थापयामि॥भोविष्णो इहागच्छ इह तिष्ठ॥

५ त्रातारमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दःइन्द्रोदे०इन्द्रावाहनेवि०–ॐत्रातारमिन्द्रमवितारमिन्द्रᳪहवेहवेसुहवᳪशूरमिन्द्रम्॥ह्वयामिशक्र-म्पुरुहूतमिन्द्रᳪस्वस्तिनोमघवाधात्विन्द्रः॥२०॥गुरुवामपार्श्वे–ॐभूर्भुवःस्वः इन्द्रायनमः इन्द्रमा०स्थाप०॥ भोइन्द्रइहागच्छइहतिष्ठ॥

६ अदित्यैरास्नेत्यस्यदध्यङ्ङाथर्वणऋषिः यजुश्छन्दः इन्द्राणीदेवता इन्द्राण्यावाहने विनियोगः–ॐअदित्यै रास्नासीन्द्राण्याऽउष्णी-षः॥पूषासिघर्म्मायदीष्व॥३८॥ शुक्रवामपार्श्वे-ॐभूर्भुवःस्वःइन्द्राण्यैनमः इन्द्राणीमा० स्थापयामि॥भो इन्द्राणि इहागच्छ इह तिष्ठ॥

७ प्रजापत इत्यस्य हिरण्यगर्भऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रजापत्यावाहने विनियोगः–ॐप्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ॥ यत्कामास्ते जुहुमस्तन्नोऽ अस्तु वयᳪ स्याम पतयो रयीणाम् ॥ ६५ ॥ शनिवामपार्श्वे–ॐभूर्भुवः स्वः प्रजापतये नमः प्रजापतिमावाहयामि स्थापयामि ॥ भो प्रजापते इहागच्छ इह तिष्ठ ॥

८ नमोस्तुसर्पेभ्यइत्यस्यप्रजापतिर्ऋषिः अनुष्टुप्छन्दःसर्पादेवताःसर्पावाहनेविनियोगः-ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु॥येऽअन्तरिक्षे येदिवितेभ्यःसर्पेभ्योनमः॥६॥राहुवामपार्श्वेॐभूर्भुवःस्वःसर्पेभ्योनमःसर्पानावा०स्थापयामि ॥ भोसर्पा इहागच्छत इह तिष्ठत॥

८

१ ब्रह्मजज्ञानमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः—ॐब्रह्मं जज्ञानम्प्रथमम्पुरस्ताद्वि सीमुत? सुरुचो व्वेनऽ आवः ॥ स बुध्न्याऽ उपमाऽ अस्य विष्ठाः? सतश्च योनिमसतश्च विवः ॥३/१३॥ केतुवामपार्श्वे—ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥

पञ्चलोकपालदेवतावाहनम्—१ गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः गणपतिर्देवता गणपत्यावाहने विनियोगः—ॐगणानां-न्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम॥आहमजानि गर्भधमा त्वम-जासि गर्भधम्॥१९/२३॥ राहोरुत्तरतः—ॐभूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि॥भो गणपते इहागच्छ इह तिष्ठ॥

२ अम्बेअम्बिकइत्यस्यप्रजापतिर्ऋषिःअनुष्टुप्छन्दःदुर्गादेवतादुर्गावाहनेविनियोगः—ॐअम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन॥ससस्त्यश्वकः?सुभद्रिकाङ्काम्पीलवासिनीम्॥१८/२३॥शनेरुत्तरतः—ॐभूर्भुवःस्वःदुर्गायैनमःदुर्गामा०स्थापयामि॥भो दुर्गेइहागच्छइहतिष्ठ॥

३ वायोयेतइत्यस्य गृत्समदऋषिः गायत्रीछन्दः वायुर्देवता वाय्वावाहने विनियोगः—ॐवायो ये ते सहस्रिणो रथासस्तेभिरागहि॥ नियुत्वान्त्सोमपीतये॥३२/२७॥ रवेरुत्तरतः—ॐभूर्भुवः स्वः वायवे नमः वायुमावाहयामि स्थापयामि॥ भो वायो इहागच्छ इह तिष्ठ ॥

४ घृतं घृतपावान इत्यस्य प्रजापतिर्ऋषिः ऋचा पङ्क्तिश्छन्दः आकाशो देवता आकाशावाहने विनियोगः—ॐघृतङ्घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिशऽ आदिशो विदिशऽ उद्दिशो दिग्भ्यः? स्वाहा ॥१२/६॥ राहोर्दक्षिणे—ॐभूर्भुवः स्वः आकाशाय नमः आकाशमावाहयामि स्थापयामि ॥ भो आकाश इहागच्छ इह तिष्ठ ॥

५ यावाङ्कशेत्यस्यमेधातिथिर्ऋषिः गायत्रीछन्दः अश्विनौ देवते अश्विनावाहने विनियोगः—ॐयावाङ्कशामधुमत्याश्विनासूनृतावती ॥ तयायज्ञम्मिमिक्षतम्॥११/७॥केतुदक्षिणे-ॐभूर्भुवःस्वःअश्विभ्यांनमःअश्विनावावाहयामिस्थाप०॥ भोअश्विनौइहागच्छतम्इहतिष्ठतम्॥



अथ क्षेत्राधिपतेः वास्तोष्पतेश्चावाहनम् ।

१ नहिस्पशमित्यस्य विश्वामित्रऋषिः त्रिष्टुप्छन्दः क्षेत्राधिपतिर्देवता क्षेत्राधिपत्यावाहने विनियोगः ॥ ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽ एतारमग्नेः? ॥ एमेनमवृधन्नमृताऽ अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः? ॥६०/३३॥ गुरोरुत्तरे—ॐभूर्भुवः स्वः क्षेत्राधिपतयेनमः क्षेत्राधिपतिमावाहयामि स्थापयामि ॥ भो क्षेत्राधिपते इहागच्छ इह तिष्ठ ॥

१ वास्तोष्पत इत्यस्य वसिष्ठऋषिः वास्तोष्पतिर्देवता वास्तोष्पत्यावाहने विनियोगः ॥ ॐवास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽ अनमीवो भवानः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भवद्विपदे शं चतुष्पदे ॥ क्षेत्राधिपोत्तरे—ॐभूर्भुवः स्वः वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि स्थापयामि ॥ भो वास्तोष्पते इहागच्छ इह तिष्ठ ॥

॥ अथ मण्डलाद्बहिः प्रागादितः पीठसमन्तात् इन्द्रादिदशदिक्पालानामावाहनम् ॥

१ त्रातारमित्यस्यगर्गऋषिःत्रिष्टुप्छन्दःइन्द्रोदेवताइन्द्रावाहनेविनियोगः॥ॐत्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳशूरमिन्द्रम्॥ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो मघवाधात्विन्द्रः॥५०/२०॥मण्डलाद्बहिःपूर्वे—ॐभूर्भुवःस्वःइन्द्रायनमःइन्द्रमा०स्था०॥ भोइन्द्रइहा०इह०॥

२ त्वन्नोऽअग्नइत्यस्य हिरण्यस्तूप आङ्गिरसऋषिः जगतीछन्दः अग्निर्देवता अग्न्यावाहने विनियोगः॥ॐत्वन्नोऽ अग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥१३/३४॥ मण्डलाद्बहिः आग्नेय्याम्—ॐभूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि स्थापयामि ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥

३ यमायेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमो देवता यमावाहने विनियोगः॥ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥स्वाहा घर्म्मायस्वाहाघर्म्मः?पित्रे॥९/३८॥मण्डलाद्बहिः दक्षिणे—ॐभूर्भुवःस्वःयमायनमःयममावा०स्थापयामि॥ भो यम इहागच्छ इह तिष्ठ ।

४ असुन्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋत्यावाहने विनियोगः॥ ॐअसुन्वन्तमयजमानमिच्छ स्तेनस्ये-
त्यामन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ मण्डलाद्बहिः नैर्ऋत्याम्-
ॐभूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाहयामि स्थापयामि ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥

५ तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः॥ ॐतत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते
यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽ आयुः प्रमोषीः ॥ ४९/१८ ॥ मण्डलाद्बहिः पश्चिमे-ॐभूर्भुवः स्वः
वरुणाय नमः वरुणमावाहयामि स्थापयामि ॥ भो वरुण इहागच्छ इह तिष्ठ ॥

६ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वाय्वावाहने विनियोगः ॥ ॐआ नो नियुद्भिः शतिनीभिरध्वरꣳ
सहस्रिणीभिरुपयाहि यज्ञम्॥ वायोऽ अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ २६/२७ ॥ मण्डलाद्बहिः वायव्याम्-
ॐभूर्भुवः स्वः वायवे नमः वायुमावाहयामि स्थापयामि ॥ भो वायो इहागच्छ इह तिष्ठ ॥

७ वयꣳसोमेत्यस्य बन्धुऋषिः गायत्रीछन्दः सोमोदेवता सोमावाहने विनियोगः॥ ॐवयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ॥
प्रजावन्तः सचेमहि॥ ५६/३ ॥मण्डलाद्बहिः उत्तरे-ॐभूर्भुवः स्वः सोमायनमः सोममावाहयामि स्थापयामि भो सोमइहागच्छ इह तिष्ठ॥

८ तमीशानमित्यस्य गौतमऋषिः जगतीछन्दः ईशानो देवता ईशानावाहने विनियोगः ॥ ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धिय-
ञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ १८/२५ ॥ मण्डलाद्बहिः ईशान्याम्-
ॐभूर्भुवः स्वः ईशानाय नमः ईशानमावाहयामि स्थापयामि ॥ भो ईशान इहागच्छ इह तिष्ठ ॥



९ अस्मेरुद्रामेहनेत्यस्य प्रगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः॥अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ
सजोषाः ॥ यः शꣳसते स्तुवते धायि पज्रऽइन्द्रज्येष्ठाऽ अस्माँ२ऽ अवन्तु देवाः ॥ ५०/३३ ॥ मण्डलाद्बहिः ईशानेन्द्रयोर्मध्ये-
ॐभूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥

१० स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तो देवता अनन्तावाहने विनियोगः ॥ ॐस्योना पृथिवि नो भवानृ-
क्षरा निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः ॥ १३/३६ ॥ मण्डलाद्बहिः निर्ऋतिवरुणयोर्मध्ये-ॐभूर्भुवः स्वः अनन्ताय नमः अनन्त-
मावाहयामि स्थापयामि ॥ भो अनन्त इहागच्छ इह तिष्ठ ॥

प्रतिष्ठापनम्—ॐमनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञ० ॥ १३/२ ॥ सूर्याद्यावाहितग्रहमण्डलदेवताः सुप्रतिष्ठिताः वरदाः भवत ।

पूजनम्-अग्न्युत्तारणप्राणप्रतिष्ठादिकृतग्रहमूर्तिं ताम्रपात्रे संस्थाप्य ध्यानादारभ्यस्नानान्तमुपचारान्कृत्वा ग्रहमण्डलोपरिस्थापयन्ति
तत्र मूलं न पश्यामः ।

ध्यानम्-ॐ ग्रहाऽ ऊर्ज्जाहुतयो व्यन्तो विप्राय मतिम् ॥ तेषां विशिप्रियाणां वो हमिषमूर्ज्जꣳ समग्रभमुपयामगृहीतोसीन्द्राय त्वा
जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ४/६ ॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः ध्यायामि ॥

आसनम्-ॐपुरुषऽ एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्॥उता० २/३१ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्योनमः आसनंसमर्पयामि ॥

पाद्यम्-ॐएतावानस्य महिमातोज्यायाँश्च पू रुषः॥ पादो०॥ ३/३१ ॥ ॐ भूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमः पाद्यंसमर्पयामि ॥

अर्घ्यम्-धामन्तेविश्वम्भुवनमधिश्रितमन्तः० ॥ ६/७ ॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः अर्घ्यं समर्पयामि ॥

आचमनीयम्-ॐत्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहा०॥ ४/३१ ॥ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः आचमनीयं समर्पयामि॥

पञ्चामृतस्नानम्—ॐ घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः ॥ऊर्जस्वती० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः पञ्चामृतस्नानं समर्पयामि॥ पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि॥

गन्धोदकस्नानम्—गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः गन्धोदकस्नानं सम० ॥ गन्धोदकस्नानान्ते शुद्धोदकस्नानं सम० ॥ शुद्धोदकस्नानान्ते आचमनीयं सम० ॥

उद्वर्तनस्नानम्—ॐ अंशुना ते अंशुः पृच्यतां परुषा परुः ॥ गन्धस्ते० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः उद्वर्तनस्नानं स० ॥ उद्वर्तनस्नानान्ते उष्णोदकस्नानं सम० ॥ उष्णोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि॥ शुद्धोदकस्नानान्ते आचमनीयं सम० ॥

अभिषेकः—ॐ ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः अभिषेकस्नानं समर्पयामि ॥

स्नानम्—ॐ शुद्धवालः सर्वशुद्ध० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः स्नानं समर्पयामि॥ स्नानान्ते आचमनीयं समर्पयामि॥

वस्त्रम्—ॐ सुजातो ज्योतिषा० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः वस्त्रोपवस्त्रे समर्पयामि॥ वस्त्रान्ते आचमनीयं समर्पयामि॥

उपवीतम्—ॐ यज्ञोपवीतं० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः उपवीतं समर्पयामि॥ उपवीतान्ते आचमनीयं समर्पयामि॥

गन्धः—ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ॥ त्वामोषधे० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः गन्धं सम० ॥

अक्षताः—ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत॥ अस्तो० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः अक्षतान्समर्पयामि॥

पुष्पाणि—ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ॥ अश्वा० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः पुष्पाणि स० ॥

सौभाग्यद्रव्याणि—ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः सौभाग्यद्रव्याणि सम० ॥

आभूषणानि—ॐ स्वर्णं घर्मः स्वाहा स्वर्णार्कः स्वाहा० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः आभूषणानि समर्पयामि ॥



धूपः—ॐ अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः ॥ मखाय त्वा० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः धूपमाघ्रापयामि ॥

दीपः—ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा । अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ॥ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः दीपं दर्शयामि॥

नैवेद्यम्-ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ॥ प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः नैवेद्यं निवेदयामि॥ देवाग्रे गोमयेन जलेन वा चतुष्कोणं मण्डलं कृत्वा तदुपरि नैवेद्यपात्रं निधाय तत्र तुलसीपत्रं निक्षिप्य गायत्रीमन्त्रेण सम्प्रोक्ष्य धेनुमुद्रां प्रदर्श्य ग्राससमुद्रया तर्जनीमध्यमाङ्गुष्ठैः—ॐ प्राणाय स्वाहा । मध्यमानामिकाङ्गुष्ठैः—ॐ अपानाय स्वाहा। कनिष्ठिकानामिकाङ्गुष्ठैः-ॐ व्यानाय स्वाहा। कनिष्ठातर्जन्यङ्गुष्ठैः-ॐ उदानाय स्वाहा । साङ्गुष्ठाभिः सर्वाङ्गुलिभिः-ॐ समानाय स्वाहा। पूर्वापोशनं स० ॥

नैवेद्यमध्ये पानीयम्—एलोशीरलवङ्गादिकर्पूरपरिवासितम्। प्राशनार्थं कृतं तोयं गृहाण परमेश्वर॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः नैवेद्यमध्ये पानीयं स० ॥ उत्तरापोशनं सम० ॥ हस्तप्रक्षालनं सम० ॥ मुखप्रक्षालनं स० ॥ आचमनीयं स० ॥ करोद्वर्तनार्थे चन्दनं समर्पयामि ॥

फलम्—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ॥० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः फलं समर्पयामि॥

मुखवासार्थे ताम्बूलम्-ॐ उत स्मास्य द्रवतस्तुरण्यतः० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः मुखवासार्थे ताम्बूलं सम० ॥

दक्षिणा—ॐ यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः० ॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः सुवर्णपुष्पदक्षिणां समर्पयामि ॥

कर्पूरार्तिक्यम्—ॐ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ॥ अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्॥ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः कर्पूरार्तिक्यं दर्शयामि ॥ जलेन प्रदक्षिणावर्तनम् । पुष्पैर्देववन्दनम् । अभिवन्दनम् । आत्मवन्दनम् । हस्तप्रक्षालनम् ॥

मन्त्रपुष्पाञ्जलिः—ॐ यज्ञेन यज्ञमयजन्त देवास्तानि० ॥ १६/३१ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ॥
प्रदक्षिणा—ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः० ॥ १५/३१ ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः प्रदक्षिणां समर्पयामि ॥
विशेषार्घ्यम्—अर्घ्यपात्रे जलं सम्पूर्य चन्दनपुष्पाक्षतसहितं नारिकेलं च धृत्वा—आदित्याद्या ग्रहाः सर्वे पीठे चात्र प्रतिष्ठिताः । ते गृह्णन्तु मया दत्तमिममर्घ्यं नमोस्तु वः ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः विशेषार्घ्यं समर्पयामि ॥
प्रार्थनापूर्वकनमस्कारः—आयुर्विद्या धनं सौख्यं यशः शौर्यं च पुष्कलम् । पुत्रान् दत्त धनं दत्त सर्वान्कामांश्च दत्त मे ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः प्रार्थनापूर्वकं नमस्करोमि ॥
राजोपचाराः—छत्रं च चामरं चैव व्यजनं दर्पणं तथा । पादुकादि च सर्वं वै गृह्णतां परमेश्वर ॥ ॐ भूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः राजोपचारान्समर्पयामि ॥ ( अभावे कल्पयामि ) ॥
अर्पणम्—अनेन यथा ज्ञानेन यथामिलितोपचारद्रव्यैः ध्यानावाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणामन्त्रपुष्परूपैः षोडशोपचारैः अन्योपचारैश्च कृतपूजनेन सूर्यादिग्रहमण्डलदेवताः प्रीयन्ताम् ॥
कलशस्थापनम्—वेदीशानदिग्भागे गोमयोपलिप्ते सितैस्तन्दुलैः चतुर्विंशतिदलं अष्टदलम् वा कमलं सकर्णिकं विलिख्य तस्यां कर्णिकायाम् अव्रणं कलशं कलशस्थापनविधिना स्थापयेत् ॥
भूमिस्पृष्ट्वा—ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥ ३२/८ ॥
पद्मोपरियवप्रक्षेपः—ॐ ओषधयः समवदन्त सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥ ९६/१२ ॥
पद्मोपरिकलशंस्थापयेत्—ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः ॥ पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती० ॥ ४२/८ ॥



कलशेजलपूरणम्—ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य० ॥ ३६/४ ॥
गन्धप्रक्षेपः—ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥ ९८/१२ ॥
धान्यप्रक्षेपः—ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा ॥ दीर्घामनु प्रसितिमायुषे धां देवो वः सविता० ॥ २०/१ ॥
सर्वौषधिप्रक्षेपः—ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ॥ मनै नु बभ्रूणामहꣳ शतं धामानि सप्त च ॥ ७५/१२ ॥
दूर्वाप्रक्षेपः—ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ २०/१३ ॥
पञ्चपल्लवप्रक्षेपः—ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥ गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ७९/१२ ॥
सप्तमृद्प्रक्षेपः—ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथाः ॥ १३/३६ ॥
फलप्रक्षेपः—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥ ८९/१२ ॥
पञ्चरत्नप्रक्षेपः—ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानि दाशुषे ॥ २५/११ ॥
हिरण्यप्रक्षेपः—ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ४/१३ ॥
रक्तसूत्रेण वस्त्रेण च कलशं वेष्टयेत्—ॐ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ पारस्करगृह्यसूत्रकाण्डः २ काण्डिका २ मन्त्रः ९ ॥
पूर्णपात्रमुपरिन्यसेत्—ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो ॥ ४९/३ ॥
वरुणमावाहयेत्—तत्त्वेत्यस्य शुनःशेप ऋषिः त्रिष्टुप्छन्दः वरुणो देवता व० वि० । ॐ तत्त्वा यामि० ॥ ४९/१८ ॥ ॐ भू० अस्मिन्कलशे वरुणं सा० आ० स्था० । ॐ भूर्भुवः स्वः वरुणाय नमः इत्यनेन सम्पूजयेत् ॥
प्रतिष्ठापनम्—ॐ मनो जूतिर्जुषतामाज्यस्य० ॥ १३/२ ॥ ॐ वरुण सुप्रतिष्ठितो वरदो भव ॥

पुष्पाञ्जलिः-वरुण० क्षत्रमिन्द्रियं भगेन सविता श्रियंम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥ ९ ॥ अनेनपूजनेनवरुणः प्रीयताम् ॥

कलशाभिमन्त्रणपूर्वकदेवतावाहनम् ॥ अनामिकया कलशं स्पृष्ट्वा-सर्वे समुद्राः० । आयान्तु मम० ॥ कलशस्य मुखे० । मूले तत्र० ॥ कुक्षौ तु० ऋग्वेदोऽथ० ॥ अङ्गैश्च सहिताः० ॥ अत्रगायत्री० ॥ आयान्तुमम० ॥ वरुणाद्यावाहितकलशाधिष्ठातृदेवताभ्योनमः इत्यनेन पूजयेत् ॥

कलशं प्रार्थयेत-देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ इति प्रार्थयित्वा कलशं स्पृष्ट्वा साङ्गरुद्रजपः कार्यः[1] ॥ इति ग्रहस्थापनप्रयोगः ॥

---

१ अत्र केचन अर्वाचीनाः ग्रन्थकाराः कलशेऽम्भसि असङ्ख्यातेति मन्त्रेण रुद्रमावाह्य पूजयन्ति । केचन कलशोपरि पूर्णपात्रे रौप्यमयीं रुद्रमूर्ति संस्थाप्य पूजयन्ति परं च रुद्रकल्पद्रुमप्रयोगाब्धिदेवभट्टकृतप्रतिष्ठाप्रयोगशान्तिरत्नाकरकाशीदीक्षितकृतमहारुद्रप्रयोगखण्डदीक्षितकृतमहारुद्रप्रयोगरत्नमार्तण्डाचार्यादिप्राचीनग्रन्थेषु वरुणमावाह्य साङ्गरुद्रजपः कार्यः इत्युक्तत्वात् अस्माभिः प्रयोगे तथैवादृतमस्ति । केचन असङ्ख्यातेतिमन्त्रेण होममपि कुर्वन्ति न तत्र मूलवचनं पश्यामः । केचन मरुदेशीयग्रन्थकारास्तु-असङ्ख्यातेति सम्पूज्यो रुद्रो रुद्रघटाम्भसि । प्रजापतेरग्रभागे शनिमण्डलके शुभे ॥ पूज्यो विष्णुः स्वसूक्तेन षोडशर्चेन तत्र वै । रुद्रकुम्भाग्रतः पूज्या चामुण्डा जातवेदसे ॥ योवः शिवेति गौर्यादिमातरश्चैव पूजयेत् ॥ सूर्याच्च पूर्वदिग्भागे अग्निमीळेऋचा ततः । इषेत्वेति यजुर्वेदं सूर्याद्दक्षिणतो न्यसेत् ॥ सूर्याच्च पश्चिमे साम अग्नआयाहि मन्त्रतः । रवेरुत्तरदिग्भागे शन्नोदेवीत्यथर्वणम् ॥ इत्यादिप्रमाणपुरःसरं रुद्रं विष्णुं चामुण्डां गौर्यादिमातरः ऋग्वेदादिवेदांश्च ग्रहमण्डले स्थापयन्ति तद्विषये प्राचीनग्रन्थेषु मूलं न पश्यामः ॥ वसिष्ठमतं स्वीकृत्य संस्कारभास्करकारेणापि तस्मिन्कलशे असङ्ख्यातेति मन्त्रेण रुद्रस्थापनमुक्तं परं च मत्स्यपुराणादिग्रन्थेषु मूलं न पश्यामः ॥ गौडानामयमाचारो दरीदृश्यते ॥



अथ वैकल्पिकपदार्थावधारणं देवताभिध्यानञ्च ॥

आचार्यः अग्नेः पश्चिमत उपविशेत् ॥ यजमानस्तु दक्षिणतोऽग्नेर्ब्रह्मणः पश्चिमत उपविष्ट एवास्ते ॥ आचार्यः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य करिष्यमाणवास्तुशान्त्याख्ये कर्मणि वैकल्पिकपदार्थावधारणं देवताभिध्यानं च करिष्ये ॥

वैकल्पिकपदार्थावधारणम्-पूर्वेण ब्रह्मणो गमनमपरेण वा ॥ अग्नेः पश्चिमतः पात्रासादनमुत्तरतो वा ॥ त्रीणि पवित्राणि ॥ पवित्रे द्वे ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली चरुस्थाली च तैजसी मृन्मयी वा ॥ पालाश्यः समिधो यज्ञियवृक्षोद्भवा अन्या वा ॥ प्राञ्चावाघारौ विदिशौ वा ॥ समिद्धतमेऽग्नौ आज्यभागौ आग्नेयमुत्तरपूर्वार्द्धे सौम्यं दक्षिणपूर्वार्द्धे ॥ पूर्णपात्रं दक्षिणावरो वा एतान्वैकल्पिकपदार्थानहमस्मिन्कर्मणि करिष्ये ॥

देवताभिध्यानम्-अन्वाधानम्-समिद्द्वयं गृहीत्वा-अग्निम् अग्निं वास्तोष्पतिं चतुर्वारम् आज्येन एकैकयाऽऽहुत्या ॥ प्रजापतिम् इन्द्रम् अग्निं सोमम् एकैकयाऽऽज्याहुत्या ॥ अग्निम् इन्द्रं बृहस्पतिं विश्वान्देवान् सरस्वतीं वाजीम् ॥ सर्वदेवजनान् हिमवन्तं सुदर्शनम् वसून् रुद्रान् आदित्यान् ईशानं जगदान् ॥ पूर्वाह्णम् अपराह्णं मध्यन्दिनं प्रदोषम् अर्द्धरात्रं व्युष्टां देवीं महापथाम् ॥ कर्त्तारं विकर्त्तारं विश्वकर्माणम् ओषधीः वनस्पतीः ॥ धातारं विधातारं निधीनां पतिम् ॥ ब्रह्माणं प्रजापतिं सर्वाश्च देवताः एताः षट् चर्वाहुतिभिः ॥ आदित्यं सोमं भौमं बुधं बृहस्पतिं शुक्रं शनैश्चरं राहुं केतुम् इति नवग्रहान् मधुसर्पिर्दध्याक्ताभिः अर्कादियथालाभसमिच्चरुतिलाज्यद्रव्यैः प्रत्येकं प्रतिद्रव्येण अष्टाष्टसङ्ख्याकाभिराहुतिभिः ॥ ईश्वरम् उमां स्कन्दं विष्णुं ब्रह्माणम् इन्द्रं यमं कालं चित्रगुप्तम् इत्यधिदेवताः ॥ अग्निम् अपः धरां विष्णुम् इन्द्रम् इन्द्राणीं प्रजापतिं सर्पान् ब्रह्माणम् एताः प्रत्यधिदेवताश्च तैरेवद्रव्यैः प्रतिद्रव्येण चतुश्चतुःसंख्याकाभिराहुतिभिः ॥ विनायकं दुर्गां वायुम् आकाशम् अश्विनाविति पञ्चलोकपालान् वास्तोष्पतिं क्षेत्राधिपतिम् इन्द्रम् अग्निं यमं

निऋतिं वरुणं वायुं कुबेरम् ईशानं ब्रह्माणम् अनन्तं तैरेव द्रव्यैः प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्याम् ॥ वास्तुं वास्तोष्पत इति च तस्रभिर्वास्तोष्पतेध्रुवेत्यनया चेति १श्रीविल्वफलाहुतिभिस्तद्बीजाहुतिभिर्वा ॥ पुनर्वास्तोष्पतिं वास्तोष्पतेप्रतिजानीह्यस्मानीतिमन्त्रेण मधुघृतदधिभिरभ्यक्ताभिः औदुम्बरादियथालाभसमिच्चरुकृष्णतिलाज्यद्रव्यैः प्रतिद्रव्यम् अष्टोत्तरशतैः अष्टाविंशतिसङ्ख्याकाभिर्वाहुतिभिः॥ध्रुवासीत्यनेनमन्त्रेण ध्रुवं चरुणा तिलैराज्येन अष्टोत्तरशतैः अष्टाविंशत्यष्टभिर्वाहुतिभिः ॥ अघोरेभ्य इति मन्त्रेणाज्येन वास्तोर्मर्मसन्धानाय अष्टोत्तरशतैः अष्टाविंशत्यष्टभिर्वाहुतिभिः ॥ शिख्यादिवास्तुपीठदेवान् घृतेन ओदनेन तिलैः क्षीरसमिद्भिः प्रतिद्रव्यम् एकैकयाहुत्या न्यूनातिरिक्तपरिपूरणार्थं घृताक्ततिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैः अष्टोत्तरशतैः अष्टाविंशत्याहुतिभिर्वा ॥ शेषेणस्विष्टकृतम्॥ अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निवरुणं सवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्कान् वरुणं आदित्यं अदितिं प्रजापतिम् एता अङ्गप्रधानार्थदेवता एकैकयाऽऽज्याहुत्या अस्मिन्वास्तुशान्त्याख्येकर्मण्यहं यक्ष्ये इति समिद्द्वयं अग्नावादध्यात् ॥ इति अग्न्यन्वाधानम् ॥

अथ कुशकण्डिका—अग्नेर्दक्षिणतोब्रह्मासनास्तरणम्॥ तत्रपञ्चाशत्कुशमयंयथासम्भवकुशमयंवाब्रह्माणमुपवेश्यअस्मिन्कर्मणित्वंब्रह्मा भव॥भवामीति प्रतिवचनम्॥ तत्र पूर्वेण ब्रह्मणोगमनम्॥ उत्तरतः षडाहुतिसंस्रवप्रक्षेपार्थं उदपात्रस्थापनम्[2]—ब्रह्मन् अपः प्रणेष्यामि ॥ ॐप्रणययज्ञंदेवतावर्द्धयत्वंनाकस्यपृष्ठेयजमानो अस्तु॥सप्तऋषीणाᳬंसुकृतां यत्र लोकस्तत्रेमंयजमानंचधेहि॥ॐप्रणय॥इतिब्रह्मानुज्ञातः

१ गृह्यकारिकायाम्—अघोरेणाथ मन्त्रेण घृतेनाष्टोत्तरंशतम् । जुहुयाद्वास्तुपुंसोपि सन्धानार्थन्तुमर्मणाम्॥ कैश्चित् शिख्यादिपञ्चचत्वारिंशत्मण्डलदेवताहोमः अष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमसङ्ख्याभिः औदुम्बरसमित्तिल(यव)पायसाज्याहुतिभिरुक्तः। कैश्चित्तिलैः घृतेन ओदनेन क्षीरसमिद्भिः प्रतिद्रव्यं प्रत्येकं च अष्टसंख्या जुहुयादित्युक्तम्।शिख्यादिनामष्टसंख्यापक्षे चरक्यादिबाह्यदेवतानां चतुःसंख्येति शिष्टः अथवा सर्वान् प्रतिद्रव्यं एकैकयाहुत्या जुहुयादित्युक्तम् ॥ २ तेनोदकेन गृहं प्रोक्षेत् ॥



अग्नेरुत्तरतः प्रागग्रं कौशं पूर्वापरमासनद्वयं प्रकल्प्य वारणं सव्यहस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रोदकेन पूरयित्वा पश्चिमासने निधाय आलभ्य ब्रह्मणो मुखमवलोकयन् पूर्वासने उत्तरतोऽग्नेः स्थापयेत् ॥ ईशान्यादि पूर्वाग्रैस्त्रिभिस्त्रिभिर्दर्भैः द्वितीयमेखलायां पश्चिमयोनिरन्ध्रेण अग्नेः परिस्तरणं तच्च प्रागुदगग्रैर्दक्षिणतः प्रागग्रैः प्रत्यगुदगग्रैः उत्तरतः प्रागग्रैः ॥ अग्नेरुत्तरतः पश्चाद्वा अर्थवत्पात्रासादनम्—पवित्रच्छेदनादर्भास्त्रयः ॥ साग्रे अनन्तर्गर्भे पवित्रे द्वे ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली ॥ चरुस्थाली ॥ सम्मार्गकुशाः पञ्च ॥ उपयमनकुशाः सप्त॥समिधस्तिस्रः ॥ स्रुवः आज्यम् ॥ त्रिःप्रक्षालितास्तण्डुलाः॥ पूर्णपात्रम्॥ दक्षिणा वरो वा यथाशक्तिहिरण्यादि द्रव्यम्।अन्यान्युपकल्पनीयानि कांस्यमयम् उदपात्रम् अर्कादिसमिधःकृष्णतिलादिहवनीयद्रव्याणिवसोर्द्धारार्थं स्रुक्।इति पात्रासादनम्॥

पवित्रे कृत्वा—द्वयोः पवित्रयोरुपरि पवित्रत्रयं निधाय द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य त्रयाणां मूलाग्राणि एकीकृत्य अनामिकाङ्गुष्ठेन द्वयोरग्रं छेदयेत् द्वे ग्राह्ये त्रीण्युत्तरतः क्षिपेत्[2]॥प्रणीतोत्तरतः प्रोक्षणीपात्रं निधाय तत्र पात्रान्तरेण प्रणीतोदकं प्रपूर्य पवित्राभ्यामुत्पूयँ पवित्रे[3]प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये पाणौ कृत्वा दक्षिणहस्तमुत्तानं कृत्वा मध्यमानामिकाङ्गुल्योः

१ एतावान्विशेषः रुद्रकल्पद्रुमे ॥ देवताभिध्यानस्य अकरणे प्रत्यवायः ॥ पारिजाते बृहन्मनुः—देवताभिध्यानरूपं ह्यन्वाधानं समिद्भुतम् । यो मूढधीर्न कुरुते हवनस्याल्पकं फलम् ॥ परशुराममहारुद्रपद्धतौ—देवतानामभिध्यानं न करोत्यत्र मूढधीः। तस्य कर्म वृथैवस्यादिति वेदविदो विदुः ॥ वसिष्ठः—यदि ग्रहाणामष्टौ स्यादधिप्रत्यधिकेषु च । चतुश्चतुर्हुनेद्धेरम्बादीनां द्विद्विसङ्ख्यया ॥ अत्र होमविषये कैश्चित्पद्धतिकारैः सिद्धोदनेन मधुना आज्येन यवैः कृष्णतिलैः क्षीरसमिद्भिः अष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमसंख्याभिः पायसेन च प्रतिद्रव्येण होमः उक्तः । कैश्चित् औदुम्बरसमित्तिलपायसाज्याहुतिभिश्च होमः उक्तः । एवं भिन्नभिन्नपुस्तकेषु अनेकशः पक्षाः सन्ति । अस्माभिरस्मत्पुस्तके एकतरः लघुपक्ष आहृतः। समयसद्भावे अनेकदिनसाध्यवास्तुप्रयोगे अन्यतमपक्षस्वीकरणे अन्वाधाने उच्चारभेदो विधेयः। २ केचन चतुर्वारं केचन त्रिवारं निक्षिप्येति वदन्ति परं च भाष्यपञ्चके नोक्तत्वान्निर्मूलं भाति ॥ ३ केचन ‘ वामकरे पवित्राग्रं दक्षिणे पवित्रयोर्मूलं धृत्वा मध्यतः पवित्राभ्यामुत्पूय’ इति वदन्ति तत्र मूलं न पश्यामः ॥

मध्यमपर्वाभ्यामपामुद्दिङ्गनम् ॥ ताभिस्तासां[1]प्रोक्षणम् ॥ आज्यस्थाल्याः प्रोक्षणम् ॥ चरुस्थाल्याः प्रोक्षणम् ॥ सम्मार्गकुशानां प्रोक्षणम् ॥ उपयमनकुशानां प्रोक्षणम्॥समिधां प्रोक्षणम्॥स्रुवस्य प्रोक्षणम् ॥ आज्यस्य प्रोक्षणम् ॥ तण्डुलानां प्रोक्षणम् ॥ पूर्णपात्रस्य प्रोक्षणम्॥ अन्येषामुपकल्पनीयहवनीयद्रव्याणां प्रोक्षणम् ॥ असञ्चरे[2] प्रोक्षणीपात्रं निधाय ॥ आज्यस्थाल्याम् आज्यनिर्वापः॥ चरुस्थाल्यां[3] प्रणीतोदकमासिच्य त्रिःप्रक्षालितांस्तण्डुलान् प्रक्षिप्य दक्षिणतः ब्रह्मणः आज्याधिश्रयणम् मध्ये यजमानेन चरोरधिश्रयणं युगपत् ॥ ज्वलदुल्मुकेन उभयोः ऐशानीमारभ्य ऐशानीपर्यन्तं पर्यग्निकरणम् । इतरथावृत्तिः । अर्धशृते चरौ स्रुवस्य प्रतपनम् । दक्षिणेन हस्तेन स्रुवमादाय प्राञ्चमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्गाग्रैर्मूलतोऽग्रपर्यन्तं सम्मृज्य मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत्प्रतप्य दक्षिणतो निदध्यात् ॥ सम्मार्गकुशानग्नौ[4] प्रास्य ॥ आज्योद्वासनम्—अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेणोत्तरतो नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः पश्चिमे निधाय चरुमुत्थाप्य पूर्वेणोत्तरतः आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः निधाय आज्यमग्नेः पश्चादानीय स्थापयेत् । चरुं च आज्यस्य पूर्वेण प्रदक्षिणमानीय उत्तरत आसादयेत् । पवित्राभ्याम् आज्योत्पवनम् । अवेक्षणम् । अपद्रव्यनिरसनम् । ताभ्यामेवाज्यलिप्ताभ्यां पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम् । पवित्रे प्रोक्षण्यां निधाय ॥ गृहप्रवेशः कार्यः ।

१ ताभिः प्रणीतापात्रस्थाभिरद्भिः तासां प्रोक्षणीपात्रस्थापानां प्रोक्षणमित्यर्थः ॥ विकल्पे प्रोक्षणीपात्रस्थाभिरद्भिः प्रोक्षणीस्थानामपां प्रोक्षणम् ॥ २ असञ्चरः प्रणीताग्न्योरन्तरालः ॥ परशुरामकारिकायाम्—प्रणीतानैर्ऋतेभागे कुण्डवायव्यगोचरे । असञ्चरं हि विज्ञेयं प्रोक्षणीस्थानमुत्तमम् ॥ इति केचित् ॥ सर्वसम्मतन्तु—प्रणीताग्न्योरन्तराले प्रोक्षणीस्थानमुत्तमम् । अन्यत्र स्थापिता चैव यज्ञकर्ता च ब्रह्महा ॥ ३ केचन सपवित्रचरुस्थाल्यामिति वदन्ति तत्र मूलं मृग्यम् ॥ ४ कात्यायनश्रौतसूत्रे—सम्मार्जनान्यपास्यत्याहवनीये प्रासनमेके ॥



॥ अथ द्वारशाखातोरणपूजनपूर्वकं गृहप्रवेशः ॥

सपत्नीको यजमानः बहिर्निष्क्रम्य अन्यगृहात् ज्योतिर्विदादिष्टे वामार्काद्यनुकूले सुलग्ने शान्तिसूक्तादिपठद्भिर्ब्राह्मणैः मङ्गलवाद्यघोषैश्च सह गोधूमतण्डुलदीपादिभिः सहितः दूर्वाम्रपल्लवनालिकेरादियुतं जलपूर्णं कलशं गृहीत्वा पूर्वद्वारसमीपे आगत्य द्वारशाखातोरणानि पूजयेत् ॥

देहल्यग्रतः कुङ्कुमादिना त्रिकोणं तदुपरि वृत्तं तदुपरि चतुरस्रं मण्डलं कृत्वा तत्र असुरान्तकाय चक्राय नमः इति मन्त्रेण प्रक्षालितं ताम्रादिपात्रं स्थापयित्वा कृष्णाय नमः हृदयाय नमः इति मन्त्राभ्यां तत्पात्रे जलं पूरयेत् ॥

द्वाराभ्युक्षणम्——गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ इति मन्त्रेण अङ्कुशमुद्रया सूर्यमण्डलात् तीर्थान्यावाह्य पुष्पाणि पात्रे निक्षिप्य तज्जलेन ॐ असुरान्तकाय चक्राय नमः इति द्वारमभ्युक्ष्य द्वारशाखां गन्धाक्षतपुष्पैः सम्पूज्य ततः द्वारदेवताः पूजयेत् ॥

पूर्वद्वारे ग्रामणीपीठे–पक्षीन्द्राय नमः । दक्षिणे–चण्डाय नमः । वामे–प्रचण्डाय नमः । ऊर्ध्वम्–द्वारश्रियै नमः । देहल्यां द्वारपीठस्यमध्ये–वास्तुपुरुषाय नमः । द्वारान्तः दक्षिणपार्श्वे–गङ्गायै नमः । वामपार्श्वे यमुनायै नमः । पुनः दक्षिणपार्श्वे–शङ्खनिधये नमः । वामपार्श्वे–पद्मनिधये नमः । द्वारस्य ऊर्ध्वम्–आग्नेयकोणे–गणपतये नमः । अधः नैर्ऋत्यकोणे दुर्गायै नमः । अधः वायव्यकोणे–सरस्वत्यै नमः । ऊर्ध्वम्–ईशानकोणे–क्षेत्रपालाय नमः । इति द्वारदेवताः सम्पूज्य तोरणपूजां कुर्यात् ॥

प्राचीं तु दिशमाश्रित्य सुदृढं नामतोरणम् । महाकायं महावीर्यमिन्द्रायुधसमप्रभम् ॥ इन्द्रदैवताश्वत्थमहातोरण एह्येहि एनं यज्ञं रक्ष सर्वविघ्नान्निवारय । प्राच्याम्–सुदृढतोरणाय नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि । इति पूर्वद्वारपूजनम् ॥

दक्षिणद्वारसमीपमागत्य देहल्यग्रतः कुङ्कुमादिना त्रिकोणं तदुपरि वृत्तं तदुपरि चतुरस्रं मण्डलं कृत्वा तत्र असुरान्तकाय चक्राय नमः इति मन्त्रेण प्रक्षालितं ताम्रादिपात्रं स्थापयित्वा कृष्णाय नमः हृदयाय नमः इति मन्त्राभ्यां तत्पात्रे जलं पूरयेत् ॥

द्वाराभ्युक्षणम्—गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ इति मन्त्रेण अङ्कुशमुद्रया सूर्यमण्डलात्तीर्थान्यावाह्य पुष्पाणि पात्रे निक्षिप्य तज्जलेन ॐ असुरान्तकाय चक्राय नमः इति द्वारमभ्युक्ष्य द्वारशाखां गन्धाक्षतपुष्पैः सम्पूज्य ततः द्वारदेवताः पूजयेत् ॥

दक्षिणद्वारे ग्रामणीपीठे—पक्षीन्द्राय नमः । दक्षिणे—धात्रे नमः । वामे—विधात्रे नमः । ऊर्ध्वं द्वारश्रियै नमः । देहल्यां द्वारपीठस्य मध्ये—वास्तुपुरुषाय नमः । द्वारान्तः दक्षिणपार्श्वे—गङ्गायै नमः । वामपार्श्वे—यमुनायै नमः । पुनः दक्षिणपार्श्वे—शङ्खनिधये नमः । वामपार्श्वे--पद्मनिधये नमः । द्वारस्य ऊर्ध्वम् आग्नेयकोणे—गणपतये नमः । अधः नैर्ऋत्यकोणे—दुर्गायै नमः । अधः वायव्यकोणे—सरस्वत्यै नमः । ऊर्ध्वम् ईशानकोणे—क्षेत्रपालाय नमः । इति द्वारदेवताः सम्पूज्य तोरणपूजां कुर्यात् ॥

दक्षिणां दिशमाश्रित्य विकटं नाम तोरणम् । महावीर्यं महाकायं भिन्नाञ्जनसमप्रभम् ॥ यमदैवतौदुम्बरमहातोरण एह्येहि एनं यज्ञं रक्ष सर्वविघ्नान्निवारय । दक्षिणे--विकटतोरणाय नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ इति दक्षिणद्वारपूजनम् ॥

पश्चिमद्वारसमीपमागत्य देहल्यग्रतः कुङ्कुमादिना त्रिकोणं तदुपरि वृत्तं तदुपरि चतुरस्रं मण्डलं कृत्वा तत्र असुरान्तकाय चक्राय नमः इति मन्त्रेण प्रक्षालितं ताम्रादिपात्रं स्थापयित्वा कृष्णाय नमः हृदयाय नमः इति मन्त्राभ्यां तत्पात्रे जलं पूरयेत् ॥

द्वाराभ्युक्षणम्—गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ इति मन्त्रेण अङ्कुशमुद्रया सूर्यमण्डलात् तीर्थान्यावाह्य पुष्पाणि पात्रे निक्षिप्य तज्जलेन असुरान्तकाय चक्राय नमः इति द्वारमभ्युक्ष्य द्वारशाखां गन्धाक्षतपुष्पैः सम्पूज्य ततः द्वारदेवताः पूजयेत् ॥



पश्चिमद्वारे ग्रामणीपीठे—पक्षीन्द्राय नमः । दक्षिणे—जयाय नमः । वामे—विजयाय नमः । ऊर्ध्वं द्वारश्रियै नमः । देहल्यां द्वारपीठस्य मध्ये—वास्तुपुरुषाय नमः । द्वारान्तः दक्षिणपार्श्वे—गङ्गायै नमः । वामपार्श्वे—यमुनायै नमः । दक्षिणपार्श्वे—शङ्खनिधये नमः । वामपार्श्वे—पद्मनिधये नमः । द्वारस्य ऊर्ध्वम् आग्नेयकोणे—गणपतये नमः । अधः नैर्ऋत्यकोणे—दुर्गायै नमः । अधः वायव्यकोणे—सरस्वत्यै नमः । ऊर्ध्वम् । ईशानकोणे—क्षेत्रपालाय नमः । इति द्वारदेवताः सम्पूज्य तोरणपूजां कुर्यात् ॥

प्रतीचीं दिशमाश्रित्य सुभीमनामतोरणम् । महावीर्यं महाकायं सुवर्णसदृशप्रभम् ॥ वरुणदैवतप्लक्षतोरण एह्येहि एनं यज्ञं रक्ष सर्वविघ्नान्निवारय । पश्चिमे—सुभीमतोरणाय नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ इति पश्चिमद्वारपूजनम् ॥

उत्तरद्वारसमीपमागत्य देहल्यग्रतः कुङ्कुमादिना त्रिकोणं तदुपरि वृत्तं तदुपरि चतुरस्रं मण्डलं कृत्वा तत्र असुरान्तकाय चक्राय नमः इति मन्त्रेण प्रक्षालितं ताम्रादिपात्रं स्थापयित्वा कृष्णाय नमः हृदयाय नमः इति मन्त्राभ्यां तत्पात्रे जलं पूरयेत् ॥

द्वाराभ्युक्षणम्—गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ इति मन्त्रेण अङ्कुशमुद्रया सूर्यमण्डलात् तीर्थान्यावाह्य पुष्पाणि पात्रे निक्षिप्य तज्जलेन ॐअसुरान्तकाय चक्राय नमः इति द्वारमभ्युक्ष्य द्वारशाखां गन्धाक्षतपुष्पैः सम्पूज्य ततः द्वारदेवताः पूजयेत् ॥

उत्तरद्वारे ग्रामणीपीठे—पक्षीन्द्राय नमः । दक्षिणे—बलाय नमः । वामे—प्रबलाय नमः । ऊर्ध्वं द्वारश्रियै नमः । देहल्यां द्वारपीठस्य मध्ये—वास्तुपुरुषाय नमः । द्वारान्तः दक्षिणपार्श्वे—गङ्गायै नमः । वामपार्श्वे—यमुनायै नमः । पुनः दक्षिणपार्श्वे—शङ्खनिधये नमः । वामपार्श्वे—पद्मनिधये नमः । द्वारस्य ऊर्ध्वम् आग्नेयकोणे—गणपतये नमः । अधः नैर्ऋत्यकोणे—दुर्गायै नमः । अधः वायव्यकोणे—सरस्वत्यै नमः । ऊर्ध्वम् ईशानकोणे—क्षेत्रपालाय नमः । इति द्वारदेवताः सम्पूज्य तोरणपूजां कुर्यात् ॥

उत्तरां दिशमाश्रित्य सुप्रभं नाम तोरणम् । महावीर्यं महाकायं शुद्धस्फटिकनिर्मलम् ॥ सोमदैवतन्यग्रोधतोरण एह्येहि एनं यज्ञं रक्ष सर्वविघ्नान्निवारय–उत्तरे–सुप्रभतोरणाय नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ इति उत्तरद्वारपूजनम् ॥ यदा गृहस्य एकद्वारं स्यात्तदा एकत्रैव द्वारदेवताः पूजयेत् ॥

पूर्वद्वारसमीपे आगत्य विघ्नोत्सादनं कुर्यात्—ॐ नमो भगवते वास्तुपुरुषाय इति मूलमन्त्रं मनसा जपन् दिव्यदृष्ट्या ऊर्ध्वाधस्तालत्रयं कृत्वा वामपार्ष्णिना त्रिभिर्घातैः भूमिं ताडयेत् ॥ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ अन्तरिक्षस्थिता ये च दिविलोके स्थिताश्च ये।इतोऽन्यत्र च गच्छन्तु सर्वे एव भयावहाः॥ एवं त्रिः विघ्नानुत्सार्य। यजमानः गृहसंमुखं पश्यन प्रैषं कुर्यात्–ब्रह्मन प्रविशामि । ॐ प्रविश॥ ( ॐ प्रविशस्व इति सर्वभाष्यसम्मतः पाठः ) इति ब्रह्मा प्रतिवचनं वदेत् ॥ यजमानः ॐऋचं प्रपद्ये शिवं प्रपद्ये। इति मन्त्रं पठित्वा शनैरङ्गं सङ्कोचयन् स्वदक्षिणांशेन द्वारवामांशं स्पर्शयित्वा दक्षिणपादपुरः सरं देहलिं स्पृशन् गृहान्तः प्रविश्य ऐशान्यां गोधूममुद्गादिधान्यराश्युपरि कलशस्थापनमन्त्रैः कलशं संस्थाप्य पूजयेत्॥

दक्षिणहस्तेन उपयमनकुशानादाय सव्ये गृहीत्वा तिस्रः समिधः[1] तिष्ठन्नग्नावाधाय दक्षिणचुलुकगृहीतेन सपवित्रेण प्रोक्षण्युदकेन अग्नेः ईशानकोणादारभ्य ईशानपर्यन्तं प्रदक्षिणवत्पर्युक्षणं[2] इतरथावृत्तिः । पवित्रयोः प्रणीतासु निधानम् । अग्नेः प्रदीप्तिकरणम् ।

---

१ समिल्लक्षणं स्मृत्यर्थसारे–पलाशखदिराश्वत्थशम्युदुम्बरजासमित् । अपामार्गार्कदूर्वाश्च कुशाश्चेति विदुर्बुधाः ॥ अन्यच्च–अर्कः पलाशः खदिरो ह्यपामार्गोऽथ पिप्पलः । उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्तथा । शस्ता दशाङ्गुलास्तास्तु द्वादशाङ्गुलिकास्तु वा । आर्द्राः पक्वाः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः । अपाटिताश्च द्विशाखाः कृमिदोषविवर्जिताः ॥ ईदृशा होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥ यद्वा–समित्पवित्रं वेदश्च त्रयः प्रादेशसम्मिताः । इध्मस्तु द्विगुणो ज्ञेयः परिधिस्त्रिगुणः स्मृतः ॥ २ सपवित्राम्बुहस्तेन वह्निं कुर्यात्प्रदाक्षिणम् । हव्यवाट् सलिलं दृष्ट्वा विभीतः सम्मुखो भवेत्॥



॥ आज्येन षडाहुतीहोमः ॥

१ दक्षिणं जान्वाच्य—ॐ इहरतिरिहरमध्वमिहधृतिरिहस्वधृतिःस्वाहा ॥ इदमग्नये न मम ॥

२ ॐउपसृजन्धरुणं मात्रेधरुणं मातरन्धयन्। रायस्पोषमस्मासुदीधरत्स्वाहा ॥ इदमग्नये न मम ।। अपराश्चतस्रः जुहुयात् ॥

३ ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः। यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ इदं वास्तोष्पतये न मम ॥

४ ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ इदं वास्तोष्पतये न मम ॥

५ ॐ वास्तोष्पते शग्मयासꣳ सदा ते सक्षीमहिरण्वया गातुमत्या॥पाहि क्षेम उतयोगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहा ॥ इदं वास्तोष्पतये न मम ॥

६ ॐ अमीवहावास्तोष्पते बिश्वारूपाण्याविशन् ॥ सखा सुशेव एधि नः स्वाहा ॥ इदं वास्तोष्पतये न मम ॥ उदकस्पर्शः ॥

॥ अथ आघारहोमः ॥

स्थानोपविष्टः दक्षिणं जान्वाच्य कुशैर्ब्रह्मणान्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण[1] प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयति ॥

१ मनसा ॐ प्रजापतये ( अत्र न स्वाहाकारः[2] ) प्रोक्षण्यां संस्रवप्रक्षेपः ॥ यजमानः–इदं प्रजापतये न मम ॥

२ अग्नेर्दक्षिणप्रदेशे उत्तराघारमाघारयेत्–ॐइन्द्राय स्वाहा–प्रोक्षण्यां संस्रवप्रक्षेपः–इदमिन्द्राय न मम॥ इत्येतौ पूर्वोत्तरावाघारौ॥

---

१ द्रवद्रव्यं स्रुवेणैव पाणिना कठिनं हविः । जुहुयादग्नये स्वाहा सुसमिद्धहुताशने ॥ २ अत्र न स्वाहाकारपठनमिति रुद्रकल्पद्रुमकारसम्मतम् । अन्ये तु ॐ प्रजापतये स्वाहा–इति मनसा ध्यायन्–आहुतिर्देयेति सम्मन्वते तत्र मूलं मृग्यम् ॥

## ॥ अथ आज्यभागहोमः ॥

३ अग्नेरुत्तरार्धपूर्वार्द्धे—ॐ अग्नये स्वाहा ॥ प्रोक्षण्यां संस्रवप्रक्षेपः ॥ इदमग्नये न मम ॥

४ अग्नेर्दक्षिणार्द्धपूर्वार्द्धे—ॐ सोमाय स्वाहा ॥ प्रोक्षण्यां संस्रवप्रक्षेपः ॥ इदं सोमाय न मम ॥

## ॥ अथ स्थालीपाकेन षडाहुतिहोमः ॥ तासामाहुतीनाम् उदपात्रे संस्रवप्रक्षेपः ॥

१ ततश्चरुमभिघार्य—ॐअग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये ॥ सरस्वतीं च वाजीं च वास्तु मे दत्तवाजिनः स्वाहा ॥ उदपात्रे संस्रवप्रक्षेपः ॥ इदमग्नये इन्द्राय बृहस्पतये विश्वेभ्यो देवेभ्यः सरस्वत्यै वाज्यै च न मम ॥

२ ॐ सर्पदेवजनान्सर्वान्हिमवन्तꣳसुदर्शनम् ॥ वसूꣳश्च रुद्रानादित्यानीशानं जगदैः सह ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्तवाजिनः स्वाहा ॥ उदपात्रेसंस्रवप्रक्षेपः—इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्य आदित्येभ्य ईशानाय जगदेभ्यश्च न मम॥

३ ॐ पूर्वाह्णमपराह्णं चोभौ मध्यन्दिना सह ॥ प्रदोषमर्धरात्रं च व्युष्टां देवीं महापथाम् ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त-वाजिनः स्वाहा ॥ उदपात्रेसंस्रवप्रक्षेपः—इदं पूर्वाह्णायापराह्णाय मध्यन्दिनाय प्रदोषायार्धरात्राय व्युष्टायै देव्यै महापथायै च न मम ॥

४ ॐ कर्तारं च विकर्तारं विश्वकर्माणमोषधींश्च वनस्पतीन् ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ उदपात्रे संस्रवप्रक्षेपः ॥ इदं कर्त्रे विकर्त्रे विश्वकर्मणे ओषधीभ्यो वनस्पतिभ्यश्च न मम ॥

५ ॐ धातारं च विधातारं निधीनां च पतिꣳसह ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ उदपात्रेसंस्रवप्रक्षेपः॥ इदं धात्रे विधात्रे निधीनां पतये च न मम ॥

६ ॐ स्योनꣳशिवमिदं वास्तुदत्तं ब्रह्मप्रजापती ॥ सर्वाश्च देवताः स्वाहा ॥ उदपात्रे संस्रवप्रक्षेपः ॥ गृहप्रोक्षणकाले अनेन जलेन प्रोक्षणम् ॥ इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्यश्च न मम ॥ उदकस्पर्शः ॥

## ॥ अथ द्रव्यत्यागसङ्कल्पः ॥[1]

यजमानः हस्ते जलमादाय—इदमुपकल्पितं समिच्चरुतिलाज्यादिहवनीयद्रव्यं या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम यथादैवतमस्तु ॥

वराहुतिः[2]—ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम॥ आहमजानि गर्भधमा त्वमजासि गर्भधम् स्वाहा ॥ १९/२३ ॥

## ॥ सूर्यादिनवग्रहाणां प्रत्येकं प्रतिद्रव्यम् अष्टाष्टसंख्यया[3] होमः ॥

१ मधुसर्पिर्दध्याक्तार्कसमिदाज्यचरुतिलान् गृहीत्वा—आकृष्णेनेत्यस्य हिरण्यस्तूपआङ्गिरसऋषिः त्रिष्टुप्छन्दः सूर्यो देवता सूर्यप्रीतये कपिलाग्नावर्कसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् स्वाहा ॥ ३१/३४ ॥

२ मधुसर्पिर्दध्याक्तपलाशसमिदाज्यचरुतिलान् गृहीत्वा—इमन्देवाइत्यस्य वरुणऋषिः अत्यष्टीछन्दः सोमो देवता सोमप्रीतये पिङ्गलाग्नौ पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ इमन्देवाऽ असपत्नꣳसुवद्ध्वम्महते क्षत्त्राय महते ज्यैष्ठ्याय महते जानराज्या-येन्द्रस्येन्द्रियाय ॥ इममुमुष्य पुत्रममुष्यै पुत्रमस्यै विशऽ एष वोमी राजा सोमोस्माकम्ब्राह्मणानाꣳराजा स्वाहा ॥ ४०/९ ॥

---

१ रुद्रकल्पद्रुमे—बहुकर्तृके होमे यथाकालं प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात् सर्वं होमद्रव्यं देवताश्च मनसा ध्यात्वा त्यजेत् ॥ २ वराहुतिः कमलाकरः—गणाधिपतये देयात्प्रथमां तु वराहुतिम् । अन्यथा विफलं विप्र भवतीह न संशयः ॥ ३ प्रतिग्रहमष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशत्यष्टसङ्ख्यान्यतमसंख्यैर्वा प्रणवादिकैः स्वाहान्तैराकृष्णेनेत्यादिमन्त्रैर्होमः कार्यः ॥ यदि ग्रहाणामष्टौ स्यादधिप्रत्यधिकेषु च । चतुश्चतुर्हुनेद्धेरम्बादीनां द्विद्विसङ्ख्यया ॥ ४ प्रादेशमात्रादिभिरव्यङ्गाभि-र्विधूतकीटाद्यजग्धाभिः कनिष्ठावत्स्थूलाभिर्मधुसर्पिर्दध्याक्ताभिरर्कादिसमिद्भिर्होमः कार्यः ॥ ५ ग्रहहोमः स्कान्दे—आदित्ये कपिलो नाम सोमे पिङ्गल उच्यते । धूम्रकेतु-स्तथा भौमे जाठरोग्निर्बुधे स्मृतः ॥ गुरौ चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहुकेत्वोर्हुताशनः ॥ ज्ञात्वैवं ह्यग्निनामानि गृह्यकर्म समाचरेत् ॥

३ मधुसर्पिर्दध्याक्तखादिरसमिच्चरुतिलाज्यद्रव्यं गृहीत्वा ॥ अग्निर्मूर्द्धेत्यस्य विरूपाक्षऋषिः गायत्रीछन्दः अङ्गारको देवता अङ्गारकप्रीतये धूमकेत्वग्नौ खादिरसमिच्चरुतिलाज्यहोमे विनियोगः ॥ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽ अयम् ॥ अपाꣳ रेताꣳसि जिन्वति स्वाहा ॥ १२/३ ॥

४ मधुसर्पिर्दध्याक्तापामार्गसमिदाज्यचरुतिलद्रव्यं गृहीत्वा ॥ उद्बुध्यस्वेत्यस्य परमेष्ठीऋषिः त्रिष्टुप्छन्दः बुधो देवता बुधप्रीतये जठरनामाग्नौ अपामार्गसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च ॥ अस्मिन्त्सधस्थेऽ अद्ध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत स्वाहा ॥ ६१/१८ ॥

५ मधुसर्पिर्दध्याक्ताश्वत्थसमिच्चरुतिलाज्यद्रव्यं गृहीत्वा॥ बृहस्पत इत्यस्य गृत्समदऋषिः त्रिष्टुप्छन्दः बृहस्पतिर्देवता बृहस्पतिप्रीतये शिखिनामाग्नौ अश्वत्थसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ बृहस्पतेऽ अति यदर्य्योऽ अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽ ऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् स्वाहा ॥ ३/२६ ॥

६ मधुसर्पिर्दध्याक्तोदुम्बरसमिच्चरुतिलाज्यद्रव्यं गृहीत्वा ॥ अन्नात्परिस्रुत इत्यस्य अश्विसरस्वतीन्द्राऋषयः अतिजगतीछन्दः शुक्रो देवता शुक्रप्रीतये हाटकाग्नौ उदुम्बरसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयꣳ सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु स्वाहा ॥ ७५/१९ ॥

७ मधुसर्पिर्दध्याक्तशमीसमिच्चरुतिलाज्यद्रव्यं गृहीत्वा ॥ शन्नो देवीरित्यस्य दध्यङ्ङाथर्वणऋषिः गायत्रीछन्दः शनैश्चरो देवता शनैश्चरप्रीतये महातेजसाग्नौ शमीसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः स्वाहा ॥ १२/३६ ॥



८ मधुसर्पिर्दध्याक्ततिसृणां तिसृणांदूर्वासमिच्चरुतिलाज्यद्रव्यं गृहीत्वा ॥ कयान इत्यस्य वामदेवऋषिः गायत्रीछन्दः राहुर्देवता राहुप्रीतये शुचिनामाग्नौ दूर्वासमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ कया नश्चित्रऽ आ भुवदूती सदावृधः सखा ॥ कया शचिष्ठया वृता स्वाहा ॥ ४/३६ ॥

९ मधुसर्पिर्दध्याक्तबहुपत्रकुशसमिच्चरुतिलाज्यद्रव्यं गृहीत्वा ॥ केतुङ्कृण्वन्नित्यस्य मधुच्छन्दाऋषिः अनिरुक्तागायत्रीछन्दः केतवो देवताः केतुप्रीतये हुताशनाग्नौ कुशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्य्याऽ अपेशसे॥समुषद्भिरजायथाः स्वाहा ॥ ३७/२९ ॥

॥ अथाधिदेवतानां मधुसर्पिर्दध्याक्तपलाशसमिच्चरुतिलाज्यैश्चतुश्चतुःसङ्ख्याभिर्होमः ॥

१ त्र्यम्बकमित्यस्य वसिष्ठऋषिः अनुष्टुप्छन्दः त्र्यम्बको रुद्रो देवता ईश्वरप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् स्वाहा ॥ ६०/३ ॥

२ श्रीश्चत इत्यस्य उत्तरनारायणऋषिः त्रिष्टुप्छन्दः उमा देवता उमाप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ श्रीश्च तेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽ इषाण सर्वलोकम्मऽ इषाण स्वाहा ॥ २२/३१ ॥

३ यदक्रन्द इत्यस्य भार्गवजमदग्निदीर्घतमाऋषयः त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः । ॐ यदक्रन्दः प्रथमञ्जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात्॥श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यम्महि जातन्तेऽ अर्वन् स्वाहा ॥ १२/२९ ॥

---

१ दूर्वाणां तिसृणां तिसृणामेकैकाहुतिः ॥ २ कुशस्य तु बहुपत्रस्यैव । ३ रोहिताग्नौ वा । ४ अधिदेवतानां पलाशसमिद्भिरेव होमः ॥

४ विष्णोरराटमित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः विष्णुर्देवता विष्णुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ विष्णो॑ रुराट॑मसि विष्णो॑ꣳ श्नप्त्रे॑ स्त्थो विष्णो॑ꣳ स्यूर॑सि विष्णो॑र्ध्रुवो॑सि ॥ वैष्णुवम॑सि विष्ण॑वे त्वा स्वाहा ॥ २१/५ ॥

५ आब्रह्मन्नित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्मा देवता ब्रह्मप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः–ॐ आ ब्रह्म॑न्ब्राह्मणो ब्र॑ह्मवर्च्चसी जा॑यतामा राष्ट्रे रा॑जन्युꣳशूर॑ऽ इषुव्योतिव्याधी म॑हार्थो जा॑यतान्दोग्ध्रीं॑धेनुर्वोढा॑नड्वानाशुः॒ सप्ति॑ꣳ पुर॑न्धिर्योषा॑ जिष्णू र॑थेष्ठाः॒ सुभेयो युवास्य यज॑मानस्य वीरो जा॑यतान्निकामे नि॑कामे नꣳ पुर्जन्यो॑ वर्षतु फल॑वत्यो नुऽ ओष॑धयꣳ पच्यन्तां॑ योगक्षेमो न॑ꣳ कल्पताम् स्वाहा ॥ २२/२२ ॥

६ सजोषाइन्द्रेत्यस्य विश्वामित्र ऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐसुजोषा॑ऽ इन्द्र सग॑णो मुरुद्भिꣳ सोम॑म्पिब वृत्रहा शूर विद्वान्॥जहि शत्रूँ॑२ रप मृधो॑ नुदस्वाथाभ॑यङ्कृणुहि विश्वतो॑ नꣳ स्वाहा ॥ ३७/७॥

७ यमायत्वेत्यस्य दध्यङ्ङाथर्वण ऋषिः यजुश्छन्दः यमो देवता यमप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः––ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा॑ ॥ स्वाहा॑ घुर्म्माय स्वाहा॑ घुर्म्मः॒ पित्रे स्वाहा ॥ ९/३८ ॥

८ कार्षिरसीत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः कालो देवता कालप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ कार्षि॑रसि समुद्रस्य त्वा क्षित्या॑ऽ उन्न॑यामि ॥ समापो॑ऽ अद्भिर॑ग्मत समोष॑धीभिरोष॑धीꣳ स्वाहा ॥ २८/६ ॥

९ चित्रावसो इत्यस्य हिरण्यस्तूप ऋषिः यजुर्जगतीछन्दः चित्रगुप्तो देवता चित्रगुप्तप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ चित्रा॑वसो स्वुस्ति ते॑ पार म॑शीय स्वाहा ॥ १८/३ ॥ इत्यधिदेवतानां होमः ॥

॥ अथ प्रत्यधिदेवतानां मधुसर्पिर्दध्याक्तपलाशसमिच्चरुतिलाज्यैश्चतुश्चतुःसङ्ख्याभिर्होमः ॥

१ अग्निन्दूतमित्यस्य विरूपाक्षऋषिः गायत्रीछन्दः अग्निर्देवता अग्निप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐअग्निन्दूतम्पुरो द॑धे हव्यवाहमुप॑ ब्रुवे ॥ देवाँ॑२ऽ आ सा॑दयादिह स्वाहा ॥ १७/२२ ॥

२ आपोहिष्ठेत्यस्य सिन्धुद्वीपऋषिः गायत्रीछन्दः आपो देवता अपां प्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ आपो हि ष्ठा म॑यो भुवस्ता न॑ऽ ऊर्ज्जे द॑धातन ॥ मुहे रणा॑य चक्ष॑से स्वाहा ॥ १४/३६ ॥

३ स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः पृथ्वी देवता पृथ्वीप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ स्योना पृ॑थिवि नो भवानृक्षरा निवेश॑नी ॥ यच्छा॑ नꣳ शर्म्म॑ सुप्रथा॑ꣳ स्वाहा ॥ १३/३६ ॥

४ इदं विष्णुरित्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः विष्णुर्देवता विष्णुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ इदं विष्णुर्वि च॑क्रमे त्रेधा नि द॑धे पुदम् ॥ समू॑ढमस्य पाꣳसुरे स्वाहा ॥ १५/५ ॥

५ त्रातारमिन्द्रमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐ त्रातार॑मिन्द्र॑मवितार॑मिन्द्रꣳ हवे॑ हवे सुहवꣳ शूर॑मिन्द्र॑म् ॥ ह्वया॑मि शुक्रम्पु॑रुहूतमिन्द्र॑ꣳ स्वुस्ति नो॑ मघवा॑ धात्विन्द्रः॒ स्वाहा ॥ ५०/२० ॥

६ अदित्यैरास्ना इत्यस्य दध्यङ्ङाथर्वणऋषिः यजुश्छन्दः इन्द्राणी देवता इन्द्राणीप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः–ॐअदि॑त्यै रास्ना॑सीन्द्राण्या॑ऽ उष्णीषः॑॥ पूषासि॑ घुर्म्माय॑ दीष्व स्वाहा ॥ ३/३८ ॥

७ प्रजापत इत्यस्य हिरण्यगर्भऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रजापतिप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐ प्रजा॑पते न त्वदे॒तान्यन्यो विश्वा॑ रूपाणि परि ता ब॑भूव॥यत्का॑मास्ते जुहुमस्तन्नो॑ऽअस्तु वुयꣳ स्या॑म पत॑यो रयीणाम् स्वाहा॥६५/२३॥

८ नमोस्तुसर्पेभ्यइत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः सर्पा देवताः सर्पप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥
ॐ नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ॥ येऽ अन्तरिक्षे ये दिवि तेब्भ्यः सर्प्पेभ्यो नमः स्वाहा ॥६/१३॥
९ ब्रह्मजज्ञानमित्यस्यप्रजापतिर्ऋषिःत्रिष्टुप्छन्दःब्रह्मादेवताब्रह्मप्रीतयेपलाशसमिच्चरुतिलाज्यहोमेविनियोगः॥ॐब्रह्मजज्ञानम्प्रथम-
म्पुरस्ताद्विसीमत?सुरुचोवेनऽआवः॥सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः स्वाहा ३/१३॥इतिप्रत्यधिदेवतानांहोमः॥
प्रत्येकं प्रतिद्रव्यं द्वाभ्याम् द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥

विनायकादिपञ्चलोकपालानां स्वस्वमन्त्रैः प्रत्येकं प्रतिद्रव्यं द्वाभ्याम् द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥ विनियोगः॥
१ गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः गणपतिर्देवता गणपतिप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥
ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥ आहमजानि
गर्ब्भधमा त्वमजासि गर्ब्भधम् स्वाहा ॥ १९/२३ ॥
२ अम्बेअम्बिकइत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः दुर्गादेवता दुर्गाप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः। ॐ अम्बेऽ
अम्बिकेम्बालिके न मा नयति कश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् स्वाहा ॥ १८/२३ ॥
३ आनइत्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः-ॐ आ नो नियुद्भिः
शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम् ॥ वायोऽ अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः स्वाहा ॥२७/२३॥
४ घृतंघृतपावानइत्यस्य प्रजापतिर्ऋषिः ऋचांपङ्क्तिश्छन्दः आकाशोदेवता आकाशप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥
ॐ घृतङ्घृतपावानः पिबतवसांवसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा॥ दिशः प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा १९/६॥



५ यावाङ्कशेत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अश्विनौदेवते अश्विनोः प्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥
ॐ या वाङ्कशा मधुमत्यश्विना सूनृतावती ॥ तया यज्ञम्मिमिक्षतम् स्वाहा ॥११/७॥ इति विनायकादिपञ्चलोकपालदेवताहोमः ॥
प्रत्येकं प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥

॥ क्षेत्रपालस्य वास्तोश्च स्वस्वमंत्राभ्यां प्रत्येकं प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥ विनियोगः॥
१नहिस्पशमविदमित्यस्य विश्वामित्रऋषिःत्रिष्टुप्छन्दः क्षेत्राधिपतिर्देवताक्षेत्राधिपतिप्रीतयेपलाशसमिच्चरुतिलाज्यहोमेविनियोगः॥
ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽ एतारमग्नेः॥ एमेनमवृधन्नमृताऽ अमर्त्यं वैश्वानरङ्क्षैत्रजित्यायदेवाः स्वाहा॥६०/३३॥
२ वास्तोष्पत इत्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वास्तोष्पतिर्देवता वास्तोष्पतिप्रीतये औदुम्बरसमिच्चरुतिलाज्यहोमे विनियोगः॥
ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः ॥ यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥
प्रत्येकं प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥

॥ इन्द्रादिदशदिक्पालानां स्वस्वमन्त्रैः प्रत्येकं प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥ विनियोगः ॥ ॐ त्रातारमिन्द्र
१ त्रातारमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥
मवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्ति नो मघवाधात्विन्द्रः स्वाहा ॥ ५०/२० ॥
२ त्वन्नोऽअग्नइत्यस्य हिरण्यस्तूपआङ्गिरसऋषिः जगतीछन्दः अग्निर्देवता अग्निप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥
ॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्य हेडोऽअवयासिसीष्ठाः॥यजिष्ठो वह्नितमः शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् स्वाहा ॥३/२१॥
३ यमायत्वेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमो देवता यमप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः-ॐ यमाय
त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे स्वाहा ॥ ३८/८ ॥

४ असुन्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋतिप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ असु-
न्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य॥ अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु स्वाहा ॥६२/१२॥
५ तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणोदेवता वरुणप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ तत्त्वा
यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽ आयुꣳ प्रमोषीꣳ स्वाहा ॥२/२१॥
६ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ आ नो
नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्॥वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिꣳ सदानꣳ स्वाहा॥२८/२७॥
७ वयꣳसोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमोदेवता सोमप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ वयꣳसोम
व्रते तव मनस्तनूषु बिभ्रतꣳ ॥ प्रजावन्तꣳ सचेमहि स्वाहा ॥ ५६/३ ॥
८ तमीशानमित्यस्य गौतमऋषिः जगती छन्दः ईशानो देवता ईशानप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ तमीशा-
नञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धꣳ स्वस्तये स्वाहा ॥ १८/२५ ॥
९ अस्मेरुद्रामेहनेत्यस्य प्रगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मादेवता ब्रह्मप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐ अस्मे रुद्रा
मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाꣳ ॥ यः शꣳसते स्तुवते धायि पज्रऽ इन्द्रज्येष्ठाऽअस्माँऽअवन्तु देवाः स्वाहा ॥ ५०/३४ ॥
१० स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तोदेवता अनन्तप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥
ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नꣳ शर्म्म सप्रथाꣳ स्वाहा ॥ १३/३६ ॥ इति इन्द्रादिदशदिक्पालहोमः ॥



वास्तोःवास्तोष्पतइतिचतसृभिर्वास्तोष्पतेध्रुवेत्यनयाचघृताभिघारितपञ्चबिल्वफलाहुतिभिस्तद्धीजाहुतिभिर्वाहोमः।
१ घृताभिघारितबिल्वफलं तद्बीजानि वा स्रुवे निधाय—ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः। यत्त्वेमहे
प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥
२ घृताभिघारितद्वितीयं बिल्वफलं तद्बीजानि वा स्रुवे निधाय—ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो।
अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥
३ घृताभिघारिततृतीयं बिल्वफलं तद्बीजानि वा स्रुवे निधाय—ॐ वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या।
पाहि क्षेम उतयोगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहा ॥
४ घृताभिघारितचतुर्थं बिल्वफलं तद्बीजानि वा स्रुवे निधाय—ॐ अमीवहावास्तोष्पते विश्वरूपाण्याविशन्। सखा सुशेव
एधि नः स्वाहा ॥
५ घृताभिघारितं पञ्चमं बिल्वफलं तद्बीजानि वा स्रुवे निधाय—ॐ वास्तोष्पते ध्रुवास्थूणाꣳसत्रं सोम्यानाम्। द्रप्सोभेत्ता
पुरां शश्वतीनामिन्द्रो मुनीनां सखा शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥

**पुनर्वास्तोष्पतेः वास्तोष्पते प्रतिजानीह्यस्मानितिमन्त्रेण मधुघृतदधिभिरभ्यक्ताभिः औदुम्बरादियथालाभ-**
**समिच्चरुकृष्णतिलाज्यद्रव्यैः प्रतिद्रव्यम् अष्टोत्तरशतैः अष्टाविंशतिसंख्याकाभिर्वाहुतिभिर्होमः ॥**

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः। यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे
स्वाहा ॥ प्रतिद्रव्यम् अष्टोत्तरशतैः अष्टाविंशतिसङ्ख्याकाभिर्वाहुतिभिर्होमः ॥

१ अत्र समिध उदुम्बरस्य मुख्याः तदलाभे खादिरादीनामपि ॥ तिलाः कृष्णा एव ॥

**ध्रुवासीत्यनेन मन्त्रेण ध्रुवस्य चरुणा कृष्णतिलैराज्येन प्रतिद्रव्यम् अष्टोत्तरशतैः अष्टाविंशतिभिरष्टभिर्वाहुतिर्होमः॥**

ॐ ध्रुवासि ध्रुवोऽयंयजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेनद्यावापृथिवी पूर्य्येथामिन्द्रस्यच्छदिरसि विश्व-जनस्यच्छाया स्वाहा ॥ प्रतिद्रव्यम् अष्टोत्तरशतैः अष्टविंशतिभिरष्टभिर्वा सङ्ख्याकाभिराहुतिभिर्होमः ॥

अघोरेभ्य इति मन्त्रेणाज्येन वास्तोर्मर्मसन्धानाय अष्टोत्तरशतैः अष्टाविंशतिभिरष्टभिर्वाहुतिभिर्होमः ॥

ॐ अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽ अस्तु रुद्ररूपेभ्यः स्वाहा ॥ अष्टोत्तरशतैरष्टाविंश-तिभिरष्टभिर्वाहुतिभिर्होमः ॥

**शिख्यादिवास्तुपीठदेवानां घृतेन ओदनेन कृष्णतिलैः क्षीरोदुम्बरादिसमिद्भिः प्रतिद्रव्यम् एकैकयाहुत्या होमः॥**

| | | | |
|---|---|---|---|
| १ ॐ शिखिनेनमः स्वाहा | ९ ॐ वायवेनमः स्वाहा | १७ ॐ पितृभ्योनमः स्वाहा | २५ ॐ रोगायनमः स्वाहा |
| २ ॐ पर्जन्यायनमः स्वाहा | १० ॐ पूष्णेनमः स्वाहा | १८ ॐ दौवारिकायनमः स्वाहा | २६ ॐ अहयेनमः स्वाहा |
| ३ ॐ जयन्तायनमः स्वाहा | ११ ॐ वितथायनमः स्वाहा | १९ ॐ सुग्रीवायनमः स्वाहा | २७ ॐ मुख्यायनमः स्वाहा |
| ४ ॐकुलिशायुधायनमः स्वाहा | १२ ॐ गृहक्षतायनमः स्वाहा | २० ॐ पुष्पदन्तायनमः स्वाहा | २८ ॐ भल्लाटायनमः स्वाहा |
| ५ ॐ सूर्यायनमः स्वाहा | १३ ॐ यमायनमः स्वाहा | २१ ॐ वरुणायनमः स्वाहा | २९ ॐ सोमायनमः स्वाहा |
| ६ ॐ सत्यायनमः स्वाहा | १४ ॐ गन्धर्वायनमः स्वाहा | २२ ॐ असुरायनमः स्वाहा | ३० ॐ सर्पायनमः स्वाहा |
| ७ ॐ भृशायनमः स्वाहा | १५ ॐ भृङ्गराजायनमः स्वाहा | २३ ॐ शेषायनमः स्वाहा | ३१ ॐ अदित्यैनमः स्वाहा |
| ८ ॐ आकाशायनमः स्वाहा | १६ ॐ मृगायनमः स्वाहा | २४ ॐ पापायनमः स्वाहा | ३२ ॐ दित्यैनमः स्वाहा |

| | | | |
|---|---|---|---|
| ३३ ॐ आपायनमः स्वाहा | ४४ ॐ आपवत्सायनमः स्वाहा | ५५ ॐ अग्नयेनमः स्वाहा | ६६ ॐ महाकालायनमः स्वाहा |
| ३४ ॐ सावित्रायनमः स्वाहा | ४५ ॐ ब्रह्मणेनमः स्वाहा | ५६ ॐ यमायनमः स्वाहा | ६७ ॐ पिलिपित्सायनमः स्वाहा |
| ३५ ॐ जयायनमः स्वाहा | ४६ ॐ चरक्यैनमः स्वाहा | ५७ ॐ निर्ऋतयेनमः स्वाहा | ६८ ॐ हेतुकायनमः स्वाहा |
| ३६ ॐ रुद्रायनमः स्वाहा | ४७ ॐ विदार्यैनमः स्वाहा | ५८ ॐ वरुणायनमः स्वाहा | ६९ ॐत्रिपुरान्तकायनमः स्वाहा |
| ३७ ॐ अर्यम्णेनमः स्वाहा | ४८ ॐ पूतनायैनमः स्वाहा | ५९ ॐ वायवेनमः स्वाहा | ७० ॐ अग्निवैतालायनमः स्वाहा |
| ३८ ॐ सवित्रेनमः स्वाहा | ४९ ॐ पापराक्षस्यैनमः स्वाहा | ६० ॐ कुबेरायनमः स्वाहा | ७१ ॐ असिवैतालायनमः स्वाहा |
| ३९ ॐ विवस्वतेनमः स्वाहा | ५० ॐ स्कन्दायनमः स्वाहा | ६१ ॐ ईश्वरायनमः स्वाहा | ७२ ॐ कालायनमः स्वाहा |
| ४० ॐविबुधाधिपायनमः स्वाहा | ५१ ॐ अर्यम्णेनमः स्वाहा | ६२ ॐ ब्रह्मणेनमः स्वाहा | ७३ ॐ करालायनमः स्वाहा |
| ४१ ॐ मित्रायनमः स्वाहा | ५२ ॐ जृम्भकायनमः स्वाहा | ६३ ॐ अनन्तायनमः स्वाहा | ७४ ॐ एकपदायनमः स्वाहा |
| ४२ ॐ राजयक्ष्मणेनमः स्वाहा | ५३ ॐ पिलिपिच्छायनमः स्वाहा | ६४ ॐ उग्रसेनायनमः स्वाहा | ७५ ॐ भीमरूपायनमः स्वाहा |
| ४३ ॐ पृथ्वीधरायनमः स्वाहा | ५४ ॐ इन्द्रायनमः स्वाहा | ६५ ॐ डामरायनमः स्वाहा | ७६ ॐ खेचरायनमः स्वाहा |
| | | | ७७ ॐ तलवासिनेनमः स्वाहा |

**अथन्यूनातिरिक्तपरिपूरणार्थं घृताक्तकृष्णतिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैः अष्टोत्तरशतैः अष्टाविंशतिभिराहुतिभिर्वा होमः ॥**

कालतस्तन्त्रतो मन्त्रतो वा ज्ञानतोऽ-
यजमानः हस्ते जलमादाय—अस्मिन्शालाकर्मपूर्वकवास्तुशान्त्याख्ये कर्मणि देशतः कालतस्तन्त्रतो मन्त्रतो वा ज्ञानतोऽ-ज्ञानतो वा अयथाकरणन्यूनकरणचतुर्विधकर्मातिरिक्तकरणभ्रेषजातप्रत्यवायपरिहारद्वाराकर्मसाद्गुण्यसिद्धये तथा प्रधानदेवताभ्योश्च

मध्ये गमने तथा समिदाज्यचरुतिलादिहविषां मध्ये अन्यतमस्याभावे होमस्वाहाकारयोः पूर्वापराभावे अग्निमध्ये हविर्गत-कीटाद्युपघाते प्रणीताग्न्योर्मध्येगमने प्रणीतास्कन्दे इध्मपरिस्तरणादिदाहे कुण्डाद्बहिरग्निपतने समिच्चरुतिलाज्यमध्ये कृमिकीटकादिसंयोगे होममन्त्रपठनसमये स्वरवर्णादिविस्मृतौ देवतावदानमन्त्रतन्त्रकर्मविपर्यासमक्षिकाकीटकेशादिभिर्हविर्दुष्टदग्धपाकहितस्थाने होमाकरणादिज्ञाताज्ञातदोषपरिहारार्थम् ॥

घृताक्तकृष्णतिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैरष्टोत्तरशतैरष्टाविंशतिभिराहुतिभिर्वा होमः॥

पुनर्जलमादाय—भूर्भुवः स्वरितितिसृणां महाव्याहृतीनां प्रजापतिर्ऋषिःगायत्र्युष्णिगनुष्टुप्छन्दांसि क्रमेण अग्निवायुसूर्या देवताः सर्वासां प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः ॥

१ ॐभूः स्वाहा ॥ २ ॐभुवः स्वाहा॥ ३ ॐस्वः स्वाहा॥ ४ ॐभूर्भुवः स्वः स्वाहा॥ एवं सप्तवारं होमे अष्टाविंशत्याहुतयः भवन्ति । सप्तविंशतिवारं होमे अष्टोत्तरशताहुतयः भवन्ति। द्विपञ्चाशताधिकशतद्वयाहुतिहोमे(२५२) अष्टोत्तरसहस्राहुतयः भवन्ति ॥

॥ गुर्जराचारात् गुग्गुलहोमः[1] ॥

गुग्गुलं घृतेनाभिघार्य—त्र्यम्बकमित्यस्य वसिष्ठऋषिः अनुष्टुप्छन्दः रुद्रो देवता त्र्यम्बकप्रीतये गुग्गुलहोमे विनियोगः॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा ॥ ६०/३ ॥

॥ गुर्जराचारात् शत्रुविनाशार्थं सर्षपहोमः ॥

सर्षपान् घृतेनाभिघार्य-सजोषाइत्यस्य विश्वामित्रऋषिः निचृदार्षीत्रिष्टुप्छन्दः इन्द्रोदेवता शत्रुविध्वंसनाये सर्षपहोमे विनियोगः॥ ॐसजोषाऽ इन्द्र सगणो मरुद्भिꣳ सोमम्पिब वृत्रहा शूर विद्वान्॥ जहि शत्रूँ२ रप मृधो नुदस्वाथाभयङ्कृणुहि विश्वतो नꣳ स्वाहा ॥ ३/७ ॥[2]

१ अत्र गुग्गुलहोमः सर्षपहोमः लक्ष्मीहोमश्च कृताकृतः गुर्जरदेशीयैरेवाद्रियतेनान्यैः प्राचीनग्रन्थेषु प्रमाणाभावात्॥ २ अत्र केचन—ॐ जातवेदसे सुनवाम सोममरातियतो निर्दहाति वेदः॥सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ इत्यपि मन्त्रं पठन्ति परं चायं मन्त्रो ऋग्वेदीयत्वात् परशाखीयः ॥



॥ गुर्जराचारात् लक्ष्मीहोमः ॥

क्षीरं दूर्वा दाडिमादि होमद्रव्याणि[1] एकीकृत्य घृतेनाभिघार्य मनस इत्यस्य दधीचऋषिः निच्यृदार्षीबृहतीछन्दः श्रीर्देवता लक्ष्मीहोमे विनियोगः—ॐ मनसः कामुमाकूतिं वाचः सत्यमशीय॥ पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम्मयि स्वाहा ॥ ४/४ ॥

॥ अथ उत्तरपूजनम्[2] ॥

हस्तेजलमादाय पूर्वोच्चारितशुभपुण्यतिथौ कृतस्य वास्तुशान्त्याख्यकर्मणःसाङ्गतासिद्ध्यर्थं स्थापितदेवतानां मृडाग्नेश्चोत्तरपूजनं करिष्ये[3]।

गणपतिपूजनम्—गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः आर्षी बृहती छन्दः गणपतिर्देवता गणपतिपूजने विनियोगः॥ ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम॥ आहमजानि गर्भधमा-त्वमजासि गर्भधम् ॥ १९/२३ ॥ ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहितमहागणपतये नमः सर्वोपचारार्थे[4] गन्धाक्षतपुष्पाणि समर्पयामि ॥

मातृकापूजनम्—समख्येइत्यस्य वत्सऋषिः आस्तारपङ्क्तिश्छन्दः मातृकादेवता वसोःपवित्रमित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः वसोर्द्धारादेवता उत्तरपूजने विनियोगः॥ ॐ समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा॥ मा मऽ आयुः प्रमोषीर्मोऽ अहन्तव वीरं विदेय तव देवि सन्दृशि ॥ २३/४ ॥ ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोः

१ सीताफलं क्षीरमाज्यं दाडिमं मधु शर्करा ॥ शमीपत्राणि दूर्वा च बिल्वपत्राणि तन्दुलाः ॥ कदलीफलमिश्राणि कृत्वा वै जुहुयात्ततः ॥ २ उत्तराङ्गानि—पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा ॥ श्रेयः सम्पाद्य दानं च ह्यभिषेको विसर्जनम् ॥ ३ यज्ञपार्श्वे कल्पद्रुमे च—पूर्वं प्रज्वलितो ह्यग्निर्हविर्हव्यबुभुक्षितः । तृप्तो निर्धूमनिर्ज्वालो मृडाग्निः परिकीर्तितः ॥ ४ अवकाशे सति षोडशोपचारैर्वा पूजयेत् ॥

॥ ॐ भूर्भुवः स्वः वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातृभ्यो नमः सर्वोपचारार्थे
पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ३/१ ॥ ॐ भूर्भुवः स्वः वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातृभ्यो नमः सर्वोपचारार्थे
गन्धाक्षतपुष्पाणि समर्पयामि ॥

वास्तुपूजनम्—तमीशानमितिगौतमऋषिः जगतीछन्दः शिखी देवता वास्तोष्पत इत्यस्य मैत्रावरुणिर्वसिष्ठऋषिः त्रिष्टुप्छन्दः
वास्तोष्पतिर्देवता ध्रुवासीत्यस्यौतथ्योदीर्घतमाऋषिः निच्यृदार्षी गायत्रीच्छन्दः ध्रुवो देवता सर्वेषामुत्तरपूजने विनियोगः ॥ ॐ तमी-
शानुञ्जगतस्तुस्थुषुस्पतिन्धियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वुस्तये ॥ १५/२८ ॥ ॐ वास्तोष्पते
प्रतिजानी ह्यस्मान्स्वावेशो अनमीवो भवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशन्नो भव द्विपदे शञ्चतुष्पदे ॥ ॐ ध्रुवासि ध्रुवोयं यजमानो-
स्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया ॥ ३/८ ॥ ॐ भूर्भुवः स्वः शान्त्यादि-
रेखादेवतामण्डूकादिपीठदेवताशिख्यादिमण्डलदेवतासहितसध्रुववास्तुपुरुषाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

ग्रहमण्डलदेवतापूजनम्—ग्रहाइत्यस्य बृहस्पतिर्ऋषिः अनुष्टुप्छन्दः ग्रहादेवताः सूर्याद्यावाहितग्रहमण्डलदेवतापूजने विनियोगः ॥
ग्रहाऽ ऊर्ज्जाहुतयोव्यन्तो विप्राय मतिम् ॥ तेषां विशिप्रियाणां वोहमिषमूर्ज्जᳫ समग्रभमुपयामगृहीतोसीन्द्राय त्वाजुष्टङ्गृह्णाम्येष ते
योनिरिन्द्राय त्वा जुष्टतमम् ॥ ८/५८ ॥ ॐ भूर्भुवः स्वः सूर्याद्यावाहितग्रहमण्डलदेवताभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

अग्निपूजनम्—अग्नेनयेत्यस्य अगस्त्यऋषिः त्रिष्टुप्छन्दः अग्निर्देवता अग्निपूजने विनियोगः ॥ ॐ अग्ने नय सुपथा रायेऽ-
अस्मान्विश्वानि देव वयुनानि विद्वान् ॥ युयोद्ध्युस्मज्जुहुराण मेनो भूयिष्ठान्ते नमऽ उक्तिं विधेम ॥ ३६/८ ॥ ॐ भूर्भुवः स्वः स्वाहा-
स्वधायुतायमृडाग्नये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ इत्युत्तरपूजनम् ॥

१ अग्नये गन्धादिकं बहिरेव देयमिति कल्पद्रुमकाराः॥ अन्ये तु मध्ये पूजनमिच्छन्ति। विष्णुधर्मोत्तरे—मध्येऽपि गन्धपुष्पादीन्दद्यादग्नेर्न संशयः। बहिर्नैवेद्यमात्रन्तु दातव्यमिति निश्चितम् ॥ २ कल्पद्रुमे—उत्तरपूजाम् अत्रावसरे केचिन्मन्यन्ते अन्ये तु नवाहुतिहोमान्ते अपरे तु यजमानाभिषेकान्ते ॥

---

स्विष्टकृद्धोमः—हविःशेषोत्तरार्धात् द्विर्द्विरवदानधर्मेणावदाय द्विरभिघार्य ब्रह्मणा अन्वारब्धः—ॐ अग्नये स्विष्टकृते
स्वाहा—इदमग्नये स्विष्टकृते न मम ॥ उदकोपस्पर्शः ॥

॥ ब्रह्मणान्वारब्धः नवाहुतिहोमः ॥

भूरित्यस्य प्रजापतिर्ऋषिः गायत्रीछन्दः अग्निर्देवता भुवरित्यस्य प्रजापतिर्ऋषिः उष्णिक्छन्दः वायुर्देवता स्वरित्यस्य
प्रजापतिर्ऋषिः अनुष्टुप्छन्दः सूर्यो देवता—त्वन्नो ऽअग्नइत्यस्य हिरण्यस्तूपवामदेवऋषिः जगतीछन्दः अग्नीवरुणौ देवते सत्वन्न-
इत्यस्यवामदेवऋषिः त्रिष्टुप्छन्दः अग्नीवरुणौ देवते अयाश्चाग्नइत्यस्य वामदेवऋषिः बृहती छन्दः अग्निर्देवता येतेशतमित्यस्य
वामदेवऋषिः त्रिष्टुप्छन्दः वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्काश्च देवताः उदुत्तममित्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः
वरुणादयोदेवताः प्रजापतय इत्यस्य ब्रह्माऋषिः यजुश्छन्दः प्रजापतिर्देवता सर्वेषां होमे विनियोगः॥ सर्वत्र ब्रह्मणा अन्वारब्धः—
१ ॐ भूः स्वाहा । इदमग्नये न मम ॥ २ ॐ भुवः स्वाहा । इदं वायवे न मम ॥ ३ ॐ स्वः स्वाहा । इदं सूर्याय न मम ॥
४ ॐ त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांᳫसि प्रमुमु-
ग्ध्युस्मत् स्वाहा ॥ ३/२१ ॥ इदमग्नीवरुणाभ्यां न मम ॥

१ अनेकदिनसाध्यहोमश्चेत्तदापर्युषितदोषपरिहारार्थं हविःशेषं स्विष्टकृदर्थं घृतमध्ये स्थापयेत् ॥ नष्टे दुष्टे वा हविषि आज्येनैव स्विष्टकृद्धोमः ॥ २ अन्वारब्धआघारा-वाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यᳫ स्विष्टकृच्च ॥ एतन्नित्यᳫ सर्वत्र॥ जयरामः—एतच्चतुर्दशाहुतिकं नित्यं सर्वकर्मसु भवति यत्र यत्र होमोस्ति॥ तथा च प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यचेदाज्याद्धविः शेषात्स्विष्टकृते समवद्यति यावद्धविरुत्तरार्धात्स्विष्टकृत् ॥ नाज्यादशेषात् ॥ आज्यैकहविष्केकर्मणि शेषादाज्यादन्ते स्विष्टकृद्यागः॥ तत एव होमः ॥ तत इत्युत्तरइत्यर्थः ॥ असंसृष्टमाहुतिभिः ॥ ३ रौद्रत्वात्—रौद्रᳫराक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वापित्र्यमात्मानं चालभ्यो-पस्पृशेदपः ॥ आत्माहृदयम् ॥ चात्कर्म च कृत्वेति ॥

५ स त्वन्नोऽअग्नेऽवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ॥ अवयक्ष्वनो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽएधि स्वाहा ॥ ४/२१ ॥ इदमग्नीवरुणाभ्यां न मम ॥

६ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि॥ अयानो यज्ञं वहास्ययानोधेहिभेषजꣳ स्वाहा॥इदमग्नये अयसे न मम॥

७ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः॥ तेभिर्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्क्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥

८ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम स्वाहा ॥ १२/१२ ॥ इदं वरुणाय आदित्याय अदितये च न मम ॥

९ ॐ प्रजापतये स्वाहा—इदं प्रजापतये न मम ॥ इति नवाहुति होमः ॥

**बलिदानप्रयोगः** ॥ हस्ते जलमादाय—प्रारब्धस्य सग्रहमखशालाकर्मपूर्वकवास्तुशान्त्याख्यस्यकर्मणः साङ्गतासिद्ध्यर्थं दिक्पालपूर्वकं स्थापितदेवताभ्यो बलिदानं करिष्ये ॥

---

१ दिक्पालेभ्यः एकतन्त्रेण बलिदान पक्षे—ॐ प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्द्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा॥ २४/२२॥ इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सशक्तिकेभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो भो इन्द्रादि दशदिक्पालाः दिशं रक्षत बलिं भक्षत मम सकुटुम्बस्याभ्युदयं कुरुत ॥ आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाः भवत ॥ अनेन पूजनपूर्वकबलिदानेन इन्द्रादिदशदिक्पालाः प्रीयन्ताम् ॥



१ त्रातारमित्यस्य गर्गऋषिः त्रिष्टुपछन्दः इन्द्रो देवता इन्द्रप्रीतये बलिदाने विनियोगः—ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो मघवा धात्विन्द्रः॥ ५०/२० ॥ प्राच्याम् इन्द्रं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो इन्द्र दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन इन्द्रः प्रीयताम् ॥

२ त्वन्नोअग्नइत्यस्य हिरण्यस्तूपआङ्गिरसऋषिः जगती छन्दः अग्निर्देवता अग्निप्रीत्यर्थे बलिदाने विनियोगः—ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत्॥ ३/२१॥ आग्नेय्याम् अग्निं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि॥ अग्नये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो अग्ने दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन अग्निः प्रीयताम् ॥

३ यमायत्वेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमोदेवता यमप्रीत्यर्थे बलिदाने विनियोगः—ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ५/८॥ दक्षिणस्यां यमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ यमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो यम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन यमः प्रीयताम्॥

४ असुन्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋतिप्रीत्यर्थे बलिदाने विनियोगः—ॐ असुन्वन्तमयज-

पानमिच्छमानस्येत्यामन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ नैर्ऋत्यां निर्ऋतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ निर्ऋतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो निर्ऋते दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन निर्ऋतिः प्रीयताम् ॥

५ तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणप्रीत्यर्थे बलिदाने विनियोगः—ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥ २/२१ ॥ पश्चिमायां वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो वरुण दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन वरुणः प्रीयताम् ॥

६ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायुप्रीत्यर्थे बलिदाने विनियोगः—ॐ आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम्। वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ २७/२८ ॥ वायव्यां वायुं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो वायो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन वायुः प्रीयताम् ॥

७ वयꣳ सोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमो देवता सोमप्रीत्यर्थे बलिदाने विनियोगः–ॐ वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ॥ प्रजावन्तः सचेमहि ॥ ३६/३ ॥ उदीच्यां सोमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ सोमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो सोम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन सोमः प्रीयताम् ॥

८ तमीशानमित्यस्य गौतमऋषिः जगतीछन्दः ईशानो देवता ईशानप्रीत्यर्थे बलिदाने विनियोगः–ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ३६/२८ ॥ ईशान्याम् ईशानं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो ईशान दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन ईशानः प्रीयताम् ॥

९ अस्मेरुद्रामेहनेत्यस्य प्रगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मप्रीत्यर्थे बलिदाने विनियोगः–ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ॥ यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥ ३३/५० ॥ पूर्वेशानयोर्मध्ये ऊर्ध्वायां ब्रह्माणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो ब्रह्मन् दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन ब्रह्मा प्रीयताम् ॥

१० स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तो देवता अनन्तप्रीत्यर्थे बलिदाने विनियोगः—ॐ स्योना

वास्तुशा-
न्तिप्रयोगः ॥

॥६२॥

बलिदान-
प्रयोगः ।

पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नुः शर्म्म सुप्रथाः ॥ १३/३६ ॥ निर्ऋतिपश्चिमयोर्मध्ये अधःस्थायां दिशि अनन्तं साङ्गं सप-
रिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदी-
पमाषभक्तबलिं समर्पयामि ॥ भो अनन्त दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता
पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन अनन्तः प्रीयताम् ॥

॥ स्थापितदेवताबलिदानम् ॥

१ गणेशबलिः—गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः आर्षीबृहतीछन्दः गणपतिर्देवता बलिदाने विनियोगः—ॐ गणानान्त्वा
गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वां निधिपतिꣳ हवामहे वसो मम ॥ आहमजानि गर्भधमात्वमजा-
सि गर्भधम् ॥ १९/२३ ॥ गणपतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ गणपतये साङ्गाय
सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो गणपते इमं बलिं गृहाण मम सकुटुम्बस्याभ्युदयं
कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन गणपतिः प्रीयताम् ॥

२ मातृकाबलिः—समख्येइत्यस्य वत्सऋषिः आस्तारपङ्क्तिश्छन्दः वाग्देवता मातृप्रीत्यर्थे बलिदाने विनियोगः—ॐ समख्ये
देव्या धिया सन्दक्षिणयोरुचक्षसा ॥ मा म ऽ आयुः प्रमोषीर्म्मो ऽ अहन्तव वीरं विदेय तव देवि सन्दृशि ॥ २३/४ ॥ वसोर्द्धारा-
सहितसगणेशगौर्याद्यावाहितमातृः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्धाद्युपचारैः वः अहं पूजयामि ॥ वसोर्द्धारास-
हितसगणेशगौर्याद्यावाहितमातृभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि ॥
भो वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातरः इमं बलिं गृह्णीत मम सकुटुम्बस्याभ्युदयं कुरुत ॥ आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः
पुष्टिकर्त्र्यः तुष्टिकर्त्र्यः निर्विघ्नकर्त्र्यः वरदाः भवत ॥ अनेन बलिदानेन वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातरः प्रीयन्ताम् ॥

॥६२॥

३ वास्तुबलिः—वास्तोष्पत इत्यस्य मैत्रावरुणिर्वसिष्ठऋषिः त्रिष्टुप्छन्दः वास्तोष्पतिर्देवता ध्रुवासीत्यस्यौतथ्योदीर्घतमाऋषिः
निच्यृदार्षी गायत्रीछन्दः ध्रुवोदेवता बलिदाने विनियोगः—ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः ॥ यत्त्वेमहे प्रतितन्नो
जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥ ॐ ध्रुवासि ध्रुवोऽयंयजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी पूर्य्येथा-
मिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥ ३/५ ॥ शिख्यादिमण्डलदेवतासहितं सध्रुववास्तोष्पतिं साङ्गं सपरिवारं सायुधं सशक्तिकं
एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ शिख्यादिमण्डलदेवतासहितसध्रुववास्तोष्पतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय
इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भोः शिख्यादिमण्डलदेवतासहितसध्रुववास्तोष्पते इमं बलिं गृहाण मम सकुटुम्बस्याभ्युदयं
कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन शिख्यादिमण्डलदेवता-
सहितसध्रुववास्तोष्पतिः प्रीयताम् ॥

४ ग्रहबलिः—ग्रहाइत्यस्य बृहस्पतिर्ऋषिः निचृदार्ष्यनुष्टुप्छन्दः ग्रहा देवताः सूर्याद्यावाहितग्रहप्रीत्यर्थे बलिदाने विनियोगः-
ॐ ग्रहा ऽ ऊर्ज्जाहुतयो व्यन्तो विप्राय मतिम् ॥ तेषां विशिप्रियाणां वोहमिषमूर्ज्जꣳ समग्रभमुपयामगृहीतोसीन्द्राय त्वा
जुष्टं गृह्णाम्म्येषते योनिरिन्द्राय त्वा जुष्टतमम् ॥ -/४ ॥ आदित्याद्यावाहितदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभि-
र्गन्धाद्युपचारैः वः अहं पूजयामि ॥ आदित्याद्यावाहितदेवताभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीप-
माषभक्तबलिं समर्पयामि ॥ भो भो आदित्याद्यावाहितदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः इमं बलिं गृह्णीत मम
सकुटुम्बस्याभ्युदयं कुरुत ॥ आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः पुष्टिकर्त्र्यः तुष्टिकर्त्र्यः निर्विघ्नकर्त्र्यः वरदाः भवत ॥ अनेन बलिदा-
नेन आदित्याद्यावाहितदेवताः प्रीयन्ताम् ॥

५ क्षेत्रपालमहाबलिः—मण्डपाद्बहिः वंशपात्रे सदीपमाषभक्तदध्योदनताम्बूलदक्षिणाकूष्माण्डोदककुम्भयुतं बलिं संस्थाप्य हरिद्राकुङ्कुमसिन्दूरपताकायुतं तं कृत्वा। हस्ते जलमादाय० अद्य पूर्वोच्चारितशुभपुण्यतिथौ सकलारिष्टशान्तिपूर्वकं मारीप्सितस्य वास्तुशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं क्षेत्रपालाय पूजनपूर्वकं बलिदानं करिष्ये॥ बलिदानपात्रे पूगीफले क्षेत्रपालमावाहयेत्॥

नहिस्पशमित्यस्य विश्वामित्रऋषिः त्रिष्टुप्छन्दः क्षेत्रपालो देवता क्षेत्रपालपूजने बलिदाने च विनियोगः—ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽ एतारमग्नेः। एमेनमवृधन्नमृताऽ अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः॥ ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः क्षेत्रपालमावाहयामि स्थापयामि॥ क्षेत्रपालाय नमः इत्यनेन षोडशोपचारैः पञ्चोपचारैर्वा सम्पूजयेत्॥ प्रार्थयेत्—ॐ नमामि क्षेत्रपाल त्वां भूतप्रेतगणाधिप। पूजां बलिं गृहाणेमं सौम्यो भवहि सर्वदा॥ आयुरारोग्यमस्मे देहि निर्विघ्नं कुरु सर्वदा॥ मा विघ्नं माऽस्तु मे पापं मा सन्तु परिपन्थिनः॥ सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः॥ यं यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं संसंसंहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम्। दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्वरेखाकपालं पं पं पं पापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालम्॥ ॐ नमस्ते क्षेत्रपाल चित्रतुरङ्गवाहन सर्वभूतप्रेतपिशाचशाकिनीडाकिनीकूष्माण्डगणवेतालादिपरिवृत दध्योदनप्रिय सकलशक्तिसहित इमां पूजां गृहाण॥ अनया पूजया क्षेत्रपालः प्रीयताम्॥

क्षेत्रपालाय साङ्गाय सपरिवाराय बर्बरकेशाय भूतप्रेतपिशाचशाकिनीडाकिनीकूष्माण्डगणवेतालादियुताय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि॥

१ हेमाद्रिः—सोदकुम्भं सकूष्माण्डं क्षेत्रपालबलिं हरेत्॥ चतुर्वर्तिसमायुक्तं दीपं तत्र निधापयेत्॥

भोः क्षेत्रपाल सर्वतो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव॥ अनेन बलिदानेन क्षेत्रपालः प्रीयताम्॥

पश्चादनवेक्षमाणेन दुर्ब्राह्मणेन शूद्रेण वा बलिं नीत्वा चतुष्पथे स्थापयेत्॥

यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेत्—हिङ्कारायेत्यादीनां प्रस्कण्वऋषिः दैवीत्रिष्टुप्दैवीपङ्क्तिर्दैवी जगतीछन्दांसि लिङ्गोक्ता देवता जलक्षेपणे विनियोगः। ॐ—हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा सꣳहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा॥ २२॥ पाणिपादं प्रक्षाल्य आचामेत्॥

पूर्णाहुतिहोमः तत्र उपकल्पनीयानि—आज्यस्थाली होमावशिष्टादाज्यादन्यदाज्यं वैकङ्कतीस्रुक् खादिरः स्रुवः सम्मार्गकुशाः पवित्रे नारिकेलफलं ताम्बूलवीटकं पूगीफलं पट्टवस्त्रखण्डं रक्तसूक्तं पुष्पाणि पुष्पमाला च इत्युपकल्प्य हस्ते जलमादाय अद्यपूर्वोच्चारितशुभपुण्यतिथौ कृतस्य वास्तुशान्त्याख्यस्य कर्मणः सम्पूर्णतासिद्ध्यर्थं वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये॥

१ प्रयोगदर्पणे रेणुः—अस्या हि वास्तुशान्त्यास्तु होमस्य परिपूर्तये। पूर्णाहुतिं करिष्येऽहं वसोर्द्धारासमन्विताम्॥ अन्यदाज्यं समानीयाधिश्रिते स्रुक्स्रुवावुभौ। तौ तु प्रतप्य सम्मार्गकुशैः सम्मृज्य सिञ्चयेत्॥ पुनः प्रतप्य याम्यायां निदध्यात्स्रुक्स्रुवौ च तौ। आज्यमुद्वास्य चोत्पूयावेक्ष्यापद्रव्यनिष्कृतिः॥ चतुर्गृहीतमाज्यं तद् गृहीत्वा स्रुचिमध्यतः। वस्त्रताम्बूलपूगादिफलपुष्पसमन्विताम्॥ अधोमुखस्रुवच्छन्नांगन्धमाल्याद्यलङ्कृताम्। पूर्वं दक्षिणहस्तेन पश्चाद्वामेन पाणिना॥ गृहीत्वाथ स्रुचं कर्ता शङ्खसन्निभमुद्रया। वामस्तनान्तमानीय नाभिमूलां स्रुचं ततः॥ अग्रमध्यममध्यस्थं मूलमध्यममध्यतः। पाणिद्वयेन होतव्यं पाणिरेको निरर्थकः॥ संततमाज्यधारां तां पूर्णाहुतिमथाचरेत्। समुद्रादूर्मिसूक्तेन पुनस्त्वेत्यनयाथवा॥ सप्ततेअग्न इति वा मूर्द्धानन्दिवमन्त्रतः। पूर्णादर्वीतिमन्त्रेण पूर्णाहुतिमथाचरेत्॥

आज्यं निरूप्याग्नावधिश्रित्य स्रुवं स्रुचं च प्रतप्य सम्मार्गकुशैः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य अग्नेः पश्चिमतो याम्यायां निदध्यात् ॥ आज्यमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य स्रुवेण चतुर्वारमाज्यं स्रुचि गृहीत्वा शिष्टाचारात्तस्यां सपूगीफलं ताम्बूलवीटकं निधाय तदुपरि रक्तवस्त्रवेष्टितं रक्तसूत्रबद्धं पुष्पमालापरिवेष्टितं सिन्दूरादिभिश्चर्चितं नारिकेलफलं निधाय अधोमुखस्रुवच्छन्नां तां स्रुचमादाय वामस्तनान्तमानीय यजमानान्वारब्धः आचार्यः आसीन एव पूर्णाहुतिं जुहुयात् ॥

सङ्कल्पः—समुद्रादूर्मिरित्येकादशर्चस्य वामदेवऋषिः त्रिष्टुप्छन्दः यज्ञपुरुषो देवता पुनस्त्वेत्यस्य प्रजापतिऋषिः त्रिष्टुप्छन्दः अग्निर्देवता सप्ततेअग्नइत्यस्य सप्तऋषयः त्रिष्टुप्छन्दः अग्निर्देवता मूर्द्धानमित्यस्य भरद्वाजऋषिः त्रिष्टुप्छन्दः अग्निर्देवता पूर्णादर्वीत्यस्य और्णवाभऋषिः अनुष्टुप्छन्दः शतक्रतुर्देवता सर्वेषां पूर्णाहुतिहोमे विनियोगः ॥

ॐसमुद्रादूर्मिर्म्मधुमाँ२ऽ उदारदुपाᳫंशुना सममृतत्त्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ १/७ ॥
वयन्नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ॥ उपब्रह्मा शृणवच्छस्यमानञ्चतुः शृङ्गोवमीद्गौर२ऽ एतत् ॥ २/७ ॥

१ रुद्रकल्पद्रुमहोमपरिच्छेदे—केचित्तिष्ठन् पूर्णाहुतिमाचरन्ति तन्निर्मूलम् ॥ परशुराममहारुद्रप्रयोगे—होमोऽसौ द्विविधःप्रोक्तः श्रौतः स्मार्तश्च होतृभिः । श्रौतो यजतिसंज्ञोऽसौ स्मार्तो जुहोतिसंज्ञकः ॥ तिष्ठता हूयते यत्र याज्यया चानुवाक्यया । वषट्कारप्रदानेन स श्रौतः परिकीर्तितः ॥ यत्र होत्रोपविष्टेन स्वाहाकारेण हूयते । स स्मार्त इति विज्ञेयः पूर्णाहुत्यादिकर्मसु ॥ केचिदुत्थाय कुर्वन्ति कात्यायनमतं न तत् । तस्मादध्वर्युणा कार्या पूर्णासीनेन सर्वदा ॥ कल्पद्रुमे तथा खण्डदीक्षित महारुद्रपद्धतौ तु त्र्यृचा एव पूर्णाहुतिः॥ अन्येषां मन्त्राणामपि विकल्पनैव पूर्णाहुतिः प्रोक्ता यथा—सप्ततेअग्न इति मन्त्रेण वा अत्र इदमग्नये सप्तवत इति त्यागः॥ मूर्धानन्दिवइत्यनेन वा अत्र इदमग्नये वैश्वानरायेति त्यागः ॥ समुद्रादूर्मिरितित्र्यृचेन वा पुनस्त्वेति वा पूर्णादर्वीत्यनया वा त्रयाणामिदमग्नय इति त्यागः ॥ केचन विकल्पं विहाय सर्वैरपि मन्त्रैः पूर्णाहुतिहोमं कुर्वन्ति तदेतत्करणं मन्त्राणां विकल्पानुगमात्समुच्चये च प्रमाणाभावात् चिन्त्यमिति कल्पद्रुमकाराः ॥



चत्वारि शृङ्गा त्रयोऽ अस्य पादा द्वे शीर्षे सप्त हस्तासोऽ अस्य॥त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ऽ आविवेश॥ ३/७ ॥
त्रिधा हितम्पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्ववविन्दन् ॥ इन्द्रऽ एकᳫं सूर्य्यऽ एकञ्जजान वेनादेकᳫं स्वधया निष्टतक्षुः ॥ ४/७ ॥
एताऽ अर्षन्ति हृद्यात्समुद्राच्छतव्व्रजा रिपुणा नावचक्षे ॥ घृतस्य धाराऽ अभिचाकशीमि हिरण्ययो वेतसो मध्यऽ आसाम् ॥ ५/७ ॥
सम्यक्स्रवन्ति सरितो नधेनाऽ अन्तर्हृदा मनसा पूयमानाः ॥ एतेऽ अर्षन्त्यूर्म्मयो घृतस्य मृगाऽ इव क्षिपणोरीषमाणाः ॥ ६/७ ॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः॥घृतस्य धाराऽ अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ७/७ ॥
अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमाना सोऽअग्निम्॥घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्य्यति जातवेदाः ॥ ८/७ ॥
कन्याऽ इव वहतुमेतवाऽ उऽ अञ्ज्यञ्जानाऽ अभिचाकशीमि ॥ यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽ अभि तत्पवन्ते ॥ ९/७ ॥
अभ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ॥ इमं यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ १०/७ ॥
धामन्ते विश्वम्भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ॥ अपामनीके समिथे यऽ आभृतस्तमश्याम मधुमन्तन्तऽ ऊर्म्मिम् ॥ ११/७ ॥
पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीथयज्ञैः ॥ घृतेन त्वन्तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ ४४/१२ ॥
सप्त तेऽअग्ने समिधः सप्तजिह्वाः सप्तऽ ऋषयः सप्तधाम प्रियाणि॥सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥ ६६/१७ ॥
मूर्द्धानन्दिवोऽ अरतिम्पृथिव्या वैश्वानरमृतऽ आ जातमग्निम्॥ कविᳫं सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः॥ ८/३३ ॥
पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहाऽ इषमूर्जᳫं शतक्रतो ॥ ४९/३ ॥
अथ प्रातर्हुत्वा हुते वायन्रथाकामयेत सोऽस्याऽ अनिरसितायै कुंभ्यै दर्व्योपहन्ति पूर्णादर्विपुरापतसुपूर्णा पुनरापत ॥
वस्नेवविक्रीणावहाऽ इषमूर्जᳫं शतक्रतो स्वाहा ॥

वास्तुशान्तिप्रयोगः ॥६५॥

पूर्णाहुतिहोमः।

त्यागः—इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नये अद्भ्यश्च न मम ॥ संस्रवप्रक्षेपः ॥ इति पूर्णाहुतिः ॥

१ पारस्करगृह्यसूत्रप्रथमकाण्डद्वितीयकण्डिकाभाष्ये हरिहरः—' बर्हिर्हुत्वा प्राश्नाति ' अत्र प्राशनोपदेशसामर्थ्यात् प्राश्यमाकांक्षितम् तत्किं हुतशेषः अन्यद्वा
किञ्चित् उच्यते—पाकयज्ञेष्ववत्तस्या सर्वहोमो हुत्वा शेषप्राशनमिति कात्यायनेनोक्तेः स्रुवेणावत्तस्य होमद्रव्यस्य सर्वस्य होमनिषेधात् हुतशेषस्य च प्राशनविधानात्
सर्वासामाहुतीनां होमद्रव्यं स्रुवेवशेषितं संस्रवत्वेन प्रसिद्धं पात्रान्तरे प्रक्षिप्यते तत्प्राश्यमिति ॥ इत्यनेन प्रमाणेन स्रुवाहुतीनामेव संस्रवप्रक्षेपः सिद्धः । परंचाग्रे
गदाधरभाष्ये तु स्रुवभिन्नहस्तादिभिर्हुतानां सर्वासामाहुतीनां संस्रवप्रक्षेपो दरीदृश्यते तद्यथा—गदाधरः-' बर्हिर्हुत्वा प्राश्नाति ' परिस्तरणबर्हिर्हस्तेनैव हुत्वा पात्रा-
न्तरस्थापितहोमशेषद्रव्यं भक्षयति । प्राशनस्य पात्रत्वात् । बर्हिर्होमोत्तरकालविधानार्थं ग्रहणम् । शेषरक्षणं भक्षणं च श्रौतसूत्रे उक्तमस्ति—पाकयज्ञेष्ववत्तस्या सर्वहोमो
हुत्वा शेषप्राशनमिति । अस्यार्थः—पाकशब्देन च स्मार्तहोमा उच्यन्ते तत्र होमार्थं यदवत्तं गृहीतं तस्य असर्वहोमः कर्तव्यः स्रुवादिभिर्यद्गृहीतं तद्धुत्वा किञ्चि-
त्परिशेष्य पात्रान्तरे स्थापनमित्यर्थः ॥ अत्र सर्वैरपि भाष्यकारैः पात्रान्तरे संस्रवप्रक्षेप उक्तः तस्मात्प्रोक्षणीपात्रे एव संस्रवप्रक्षेपः कर्तव्यः इति न किन्तु वायव्यकोणे
पात्रान्तरं संस्थाप्य तत्र संस्रवप्रक्षेपो विधेयः ॥ कश्चन चतुर्दशाहुतीनामेव संस्रवप्रक्षेपः कर्तव्यः इति वदन्ति तन्निर्मूलं भाति । अत्र विद्यमानानि—मुद्रितं पारस्कर-
भाष्यपञ्चकम्, संस्कारगणपतिः, संस्कारनृसिंहः, संस्कारभास्करः, रेणुकारिका, वैद्यनाथी, स्मार्तोल्लासः, स्मार्तगङ्गाधरी, प्रयोगरत्नम्, कुशकण्डिकाभाष्यम्,
संस्कारदीपकः, रुद्रकल्पद्रुमः, इत्यादीनि प्राचीनानि निबन्धपुस्तकानि यावद्बुद्धिबलं विविच्य मया परिशोधितानि । परं—नोपलभ्यते चतुर्दशाहुतिष्वेव संस्रवप्रक्षेप-
विषये मूलवचनम् । भगवद्भिः श्रीकात्यायनाचार्यैः श्रौतकल्पे षष्ठाध्याये षष्ठ्यां कण्डिकायाम् " पाकयज्ञेष्ववत्तस्या सर्वहोमो हुत्वा शेषप्राशनम् " इति सूत्रितम्
पाकयज्ञेषु, स्मार्तहोमेषु पक्षादिकर्मसु, होमार्थं अवत्तस्य गृहीतस्य, आज्यचर्वादेः सर्वस्य होमो न कर्तव्यः । प्रतिहोमं किञ्चित्परिशेषणीयम् । हुत्वा साङ्गं पाकयज्ञं
समाप्य तस्य शेषस्य प्राशनं भक्षणं कर्तव्यमिति तदर्थः । एवं च नह्याघारादि चतुर्दशाहुतिष्वेव संस्रवप्रक्षेपः कार्यं इति नियमः अपि तु—पाकहोमेषु यावत्यो वाऽऽ
हुतयोऽपेक्ष्यन्ते, सर्वासु तासु नियमेन संस्रवप्रक्षेप आवश्यक इति सूत्रकृतामाशयः परिस्फुरति । स्मार्तमार्तण्डे—" ब्रह्मणान्वारब्धश्चतुर्दशाहुतिषु संस्रवप्रक्षेपं कुर्यात् "
इत्यत्र चतुर्दशाहुति सम्बन्धः स्वानन्तरोक्तब्रह्मणान्वारब्धशब्देन कर्तव्यः सूत्रभाष्यस्मृतिषु ब्रह्मणान्वारब्धस्य चतुर्दशाहुतिष्वेव सुस्पष्टं प्रतीयमानत्वात् । संस्रवप्रक्षेपं

॥६५॥

स्थालीपाकस्य षडाहुतिहोमस्य संस्रवप्रक्षेपः यस्मिन्कांस्योदपात्रे कृतस्तस्मिन्पात्रे औदुम्बरपत्राणि सक्षीराणि कुशदूर्वागोमय-
दधिमधुघृतयवांश्च क्षिप्त्वा आसनानि नागदन्तस्थानानि उपस्थानानि देवतास्थानानि गृहं च तैः पत्रादिसम्भारैः प्रोक्षेत् ॥

वसोर्द्धाराहोमः औदुम्बरीं ऋज्वीमकोटरां बाहुमात्रप्रमाणां निर्मलघृतपूरितां स्रुचं धृत्वा अग्नेरुपरि वसोर्द्धारां पातयेत् ॥
तस्यां च घृतधारायां सूक्ष्मप्रणालिकया अग्नौ पतन्त्यां सत्यां वक्ष्यमाणमन्त्रान्पठेत्—

सप्तत इत्यारभ्य इममित्यन्तानां सप्तर्षयऋषयः घृतमित्यस्य गृत्समदऋषिः सप्तत इत्यस्य त्रिष्टुप्छन्दः शुक्रज्योतिरित्यस्य स्वराड्-
उष्णिक्छन्दः ईदृङ्क्षतश्चेत्यनयोर्गायत्रीछन्दः ऋतजिच्चेत्यस्य उष्णिक्छन्दः ईदृक्षास इत्यस्य जगतीछन्दः स्वतवाँश्चेत्यस्य स्वराड्-
गायत्रीछन्दः इन्द्रमित्यस्य शक्करीछन्दः इमं घृतमित्यनयोस्त्रिष्टुप्छन्दः सप्तत इत्यस्य अग्निर्देवता शुक्रज्योतिरित्यारभ्य इन्द्रमित्य-
न्तानां सप्तानां मरुतो देवताः इमं घृतमित्यनयोरग्निर्देवता सर्वेषां वसोर्द्धाराहोमे विनियोगः ॥

न तु प्रत्याहुतिः कुर्यात् इति सङ्गतिः कर्तव्या । अन्यच्च—संस्रवप्रक्षेपणार्थं प्रोक्षणीपात्रं अन्यत्पात्रं च वायव्यां दिशि स्थापयेदिति स्मार्तवचनस्यापि संगतिः सुवचा ।
संस्रवप्रक्षेपणार्थं पात्रद्वयस्थापनम् व्यर्थमिति चेन्न " प्रोक्षणीषु त्यजेच्छेषं संस्रवन्तु स्रुवाहुतेः । हस्ताहुतेर्हविः शेषक्षेपमन्यत्र कल्पयेत् " । इति परशुरामकारिकायाम् ॥
आज्यहोमे संस्रवप्रक्षेपः प्रोक्षणीषु आज्यातिरिक्तचर्वादिहोमे पात्रान्तरे शेषप्रक्षेपः इति पात्रद्वयस्थापनमावश्यकमेव ॥ रेणुकारिकास्वपि वचनमेतादृशमेवोपलभ्यते ॥
अत्र युक्तायुक्तमीमांसा तज्ज्ञैश्चिन्त्या ॥

१ पारस्करगृह्यसूत्रतृतीयकाण्डचतुर्थीकण्डिकायां नवमं सूत्रम्—प्राशनान्ते कांस्ये संभारानोप्यौदुम्बरपलाशानि सक्षुराणि शाड्वलं गोमयं दधि मधु घृतं
कुशान्यवांश्चासनोपस्थानेषु प्रोक्षेत् ॥

ॐ सप्त ते ऽ अग्ने समिधः सप्त जिह्वाः सप्त ऽ ऋषयः सप्त धाम प्रियाणि ॥ सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥ ७९ /१७
शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च ॥ शुक्रश्च ऽ ऋतपाश्चात्यꣳहाः ॥ ८० /१७ ॥
ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च ॥ मितश्च सम्मितश्च सभराः ॥ ८१ /१७ ॥
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ॥ धर्त्ता च विधर्त्ता च विधारयः ॥ ८२ /१७ ॥
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ॥ अन्तिमित्रश्च दूरे ऽ अमित्रश्च गणः ॥ ८३ /१७ ॥
ईदृक्षास ऽ एतादृक्षास ऽ ऊ षु णः सदृक्षासः प्रतिसदृक्षास ऽ एतन ॥ मितासश्च सम्मितासो नो ऽ अद्य सभरसो मरुतो यज्ञे ऽ अस्मिन् ॥ ८४ /१७ ॥
स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च ॥ क्रीडी च शाकी चोज्जेषी ॥ ८५ /१७ ॥
इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ॥ एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो
भवन्तु ॥ ८६ /१७ ॥ इमꣳ स्तनमूर्ज्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ॥ उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ॥ ८७ /१७
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ॥ अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ ८८ /१७ ॥
ब्राह्मणम्— अथातो वसोर्द्धारां जुहोति ॥ अत्रैष सर्वोऽग्निः संस्कृतः स ऽ एषोऽत्र वसुस्तस्मै देवा ऽ एतां धाराम्प्रागृह्णँस्तयैनम-
प्रीणँस्तद्यदेतस्मै वसव ऽ एतान्धाराम्प्रागृह्णँस्तस्मादेनाम्वसोर्द्धारेत्याचक्षते तथैवास्मा ऽ अयमेतान्धाराम्प्रगृह्णाति तयैनं प्रीणाति ॥ १ ॥
यद्वैताम्वसोर्धाराञ्जुहोति ॥ अभिषेक उ ऽ एवास्यैष ऽ एतद्वा ऽ एनन्देवाः सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभ्यषिञ्चंस्तया
वसोर्द्धारया तथैनमयमेतत्सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतया वसोर्द्धारयाज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा तस्योक्तो



बन्धुः ॥२॥ वैश्वानरꣳ हुत्वा ॥ शिरो वै वैश्वानरः शीर्ष्णो वा ऽ अन्नमद्यतेऽथो शीर्षतो वा ऽ अभिषिच्यमानोऽभिषिच्यते मारुतान्हुत्वा
प्राणा वै मारुताः प्राणैर्वा ऽ अन्नमद्यतेऽथो प्राणेषु वा ऽ अभिषिच्यमानोऽभिषिच्यते ॥ ३ ॥ तद्वा ऽ अरण्येऽनूच्यं । वाग्वा ऽ अरण्येऽनूच्यो
वाचो वा ऽ अन्नमद्यतेऽथो वाचा वा ऽ अभिषिच्यमानोऽभिषिच्यते तदेतत्सर्वम्वसु सर्वं ह्येते कामाः सैषा वसुमयी धारा यथा क्षीरस्य वा सर्पिषो
वैवमारम्भायैवेयमाज्याहुतिर्हूयते तद्यदेषा वसुमयी धारा तस्मादेनाम्वसोर्द्धारेत्याचक्षते ॥ ४ ॥ स ऽ आह । इदं च म ऽ इदं च म ऽ इत्यनेन
च त्वा प्रीणाम्यनेन चानेन च त्वाभिषिञ्चाम्यनेन चेत्येतद्यथा ऽ इदं च मे देहीदं च म ऽ इति सा यद्वैषा धाराग्निम्प्राप्नुयादथैतद्यजुः
प्रतिपद्येत ॥५॥ एतद्वा ऽ एनन्देवाः ॥ एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्द्धारयाथैनमेतान्कामानयाचन्त तेभ्य ऽ इष्टः प्रीतो-
ऽभिषिक्त ऽ एतान्कामान्प्रायच्छत्तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्द्धारयाथैनमेतान्कामान्याचते तस्मा ऽ इष्टः
प्रीतोऽभिषिक्त ऽ एतान्कामान्प्रयच्छति द्वौ द्वौ कामौ संतनत्यव्यवच्छेदाय यथान्योऽन्यौ कसौ संतनुयादेवं यज्ञेन कल्पतामिति ॥ ६ ॥
एतद्वै देवा ऽ अब्रुवन् ॥ केनेमान्कामान्प्रतिग्रहीष्याम ऽ इत्यात्मनैवेत्यब्रुवन्यज्ञो वै देवानामात्मा यज्ञ ऽ उ ऽ एव यजमानस्य स यदाह यज्ञेन
कल्पन्तामित्यात्मनामेव कल्पन्तामित्येवैतदाह ॥७॥ द्वादश कल्पयति ॥ द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा ता-
वतैवैनमेतदन्नेन प्रीणात्यथो तावतैवैनमेतदन्नेनाभिषिञ्चति चतुर्दश कल्पयत्यष्टौ कल्पयति दश कल्पयति त्रयोदश कल्पयति ॥ ८ ॥
अथार्धेन्द्राणि जुहोति ॥ सर्वमेतद्यदर्धेन्द्राणि सर्वेणैवैनमेतत्प्रीणात्यथो सर्वेणैवैनमेतदभिषिञ्चति ॥ ९ ॥ अथ ग्रहाञ्जुहोति ॥ यज्ञो वै
ग्रहा यज्ञेनैवैनमेतदन्नेन प्रीणात्यथो यज्ञेनैवैनमेतदन्नेनाभिषिञ्चति ॥ १० ॥ अथैतान्यज्ञक्रतूञ्जुहोति ॥ अग्निश्च मे घर्मश्च म ऽ इत्येतैरेवै-
नमेतद्यज्ञक्रतुभिः प्रीणात्यथो ऽ एतैरेवैनमेतद्यज्ञक्रतुभिरभिषिञ्चति ॥ ११ ॥ अथायुजस्तोमाञ्जुहोति ॥ स हैष यज्ञ ऽ उवाच नग्नताया
वै बिभेमीति का ते नग्नतेत्यभित एव मा परिस्तृणीयुरिति तस्मादेतदग्निमभितः परिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृप्तिरिति

वास्तुशा-
न्तिप्रयोगः
॥६७॥

अग्निप्रद-
क्षिणां
कुर्यात् ।

ब्राह्मणन्तुर्प्पयित वै ब्रूयाधज्ञमेवैतत्तर्पयति ॥ १२ ॥ यत्कर्मणा त्यरीरिचं

ब्राह्मणस्यैव तृप्तिमनुतृप्येयमितितस्मात्सु॑ स्थिते यज्ञे ब्राह्मणन्तुर्प्पयित वै ब्रूयाधज्ञमेवैतत्तर्पयति ॥ १२ ॥ यत्कर्मणा त्यरीरिचं

यद्वान्यूनमिहाकरम् ॥ अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टं सुहुतं करोतु स्वाहा ॥ १३ ॥ इदमग्नये न मम ॥ नात्र संस्रवप्रक्षेपः ॥

होमसङ्कल्पः—अस्मिन्कर्मणि यद्यद्द्रव्यं येन येन मन्त्रेण यस्यै यस्यै देवतायै हुतं सा सा देवता प्रीयताम् न मम ॥ ते देवाः

शान्तिदाः पुष्टिदास्तुष्टिदा वरदा भवन्तु ॥

अग्निप्रदक्षिणां कुर्यात्—ॐस ह वै यज्ञ उवाच नग्नताया वै बिभेमीति का ते नग्नतेत्यभित एवमापरिस्तृणीयुरिति तस्माद्-

तदग्निमभितः परिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमिति तस्मात्सु॑ स्थिते यज्ञे ब्राह्मण-

न्तुर्प्पयित वै ब्रूयाधज्ञमेवैतत्तर्पयति ॥ शतपथब्राह्मण काण्ड १ प्रपाठक ६ ब्राह्मण १ मन्त्र २८ इत्यग्निं प्रदक्षिणीकृत्य अग्नेः पश्चात्

प्राङ्मुखो यजमान उपविशेत् ॥

---

१ अत्र केचन रुद्रकलशसमीपे 'कुशे त्यागः' इति वदन्तः संस्रवप्रक्षेपं कुर्वन्ति तन्निर्मूलम् ॥ त्यागपठनरूपा क्रिया भिन्ना तथा च संस्रवप्रक्षेपरूपा क्रिया भिन्ना ॥ न तयोर्नित्यसम्बन्धः ॥ रुद्रकल्पद्रुमशास्त्रार्थपरिच्छेदे—वसोर्द्धारां हुत्वा यजमान एव तस्मिन्नग्नौ स्रुक्प्रासनं करोति अत्र तां स्रुचमनुप्रास्यति यदत्राज्यलिप्तं नैतद्बहिर्द्धाग्नेरसदिति श्रवणात् ॥ महार्णवेऽपि—होमान्ते प्रासयेदग्नौ स्रुचं तामाज्यलिप्तिकाम् ॥ कात्यायनसूत्रेऽपि—वसोर्द्धारां जुहोत्यौदुम्बर्या पञ्चगृहीतः संततं यज-मानोऽरण्येनूच्येऽग्निप्राप्ते वाजश्रम इत्यष्टानुवाकेन हुत्वा स्रुक्प्रासनमिति ॥ संस्रवो नाम पात्रसंलग्नहुतशेषः ॥ श्राद्धसूत्रे—स॑स्रवान् समवनीय—इत्यस्य व्याख्याने कर्कादिभाष्यकारैः संस्रवनाम—पात्रसंलग्नहुतशेष इत्युक्तमस्ति ॥ श्राद्धे संस्रवस्य शेषप्रतिपत्तिः—न्युब्जीकरणम् ॥ कात्यायनश्रौतसूत्रे तृतीयाध्याये दर्शपौर्णमासेष्ट्याम्—स॑स्रवान् जुहोति स॑स्रवभागास्थ इति ॥ श्रौते संस्रवस्य शेषप्रतिपत्तिः—होमः ॥ स्मार्ते तु भक्षणम् ॥ बर्हिर्हुत्वा प्राश्नाति ॥ २ अनेन मन्त्रेण अग्निप्रदक्षिणी-करणं काशीदीक्षितेनोक्तम् ॥

॥६७॥

भस्मधारणम्—ॐ त्र्यायुषञ्जमदग्नेः—ललाटे । कश्यपस्य त्र्यायुषम्—ग्रीवायाम् । यद्देवेषु त्र्यायुषम्—बाह्वोः । तन्नोऽ अस्तु

त्र्यायुषम्—हृदये ॥ ततः संस्रवप्राशनम् ॥ पवित्राभ्यां मार्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः ॥

ब्रह्मणे पूर्णपात्रदानम्—प्रणीतोदकेन सङ्कल्पः—कृतस्य वास्तुशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं

सदक्षिणाकं तुभ्यमहं सम्प्रददे ॥ यजमानो वदेत्—प्रतिगृह्यताम् ॥ ब्रह्मा प्रतिगृह्णाति—ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॥

प्रणीताविमोकः अग्नेः पश्चात्—प्रणीताविमोकोदकेन ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

स्थालीपाकस्य षडाहुतिहोमस्य संस्रवप्रक्षेपः यस्मिन्कांस्योदपात्रे कृतस्तस्मिन्पात्रे औदुम्बरपत्राणि सक्षीराणि कुशदूर्वागोमयदधिमधु-

घृतयवांश्च क्षिप्त्वा आसनानि नागदन्तस्थानानि (खुंटीतिभाषायाम्) उपस्थानानि देवतास्थानानि गृहं च तैः पत्रादिसम्भारैः प्रोक्षेत्॥[1]

सार्वभौतिकबलिहरणम्—वास्तुमण्डलात्पूर्वतः शुचौ देशे गोमयेनोपलिप्य तदुपरि पत्रावलिं संस्थाप्य तदुपरि पायसबलिं

दद्यात्—त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥ देवदानवगन्धर्वा यक्षराक्षस-

पन्नगाः । ऋषयो मनवो गावो देवमातर एव च ॥ भूतप्रेतपिशाचाश्च मातरो लोकमातरः । सर्वे मम गृहे रक्षां प्रकुर्वन्तु मुदान्विताः॥

ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह । रक्षन्तु सदनं सर्वे घ्नन्तु रक्षांसि सर्वतः ॥

ॐ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः बलिं समर्पयामि ॥ त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः बलिं समर्पयामि ॥

ॐ ब्रह्मणे नमः बलिं समर्पयामि॥ॐ विष्णवे नमः बलिं समर्पयामि॥ॐ शिवाय नमः बलिं समर्पयामि॥ॐ देवेभ्यो नमः बलिं समर्पयामि॥

---

१ पारस्करगृह्यसूत्रतृतीयकाण्डचतुर्थीकण्डिकायां नवमं सूत्रम्—प्राशनान्ते का॑स्ये संभारानोप्यौदुम्बरपलाशानि सतृणानि शाड्वलं गोमयं दधिमधुघृतं कुशान्यवा॑श्चासनोपस्थानेषु प्रोक्षेत् ॥

ॐ दानवेभ्यो नमः बलिं समर्पयामि॥ॐ गन्धर्वेभ्यो नमः बलिं समर्पयामि।।ॐ यक्षेभ्यो नमः बलिं समर्पयामि॥ ॐ राक्षसेभ्यो नमः बलिं
समर्पयामि ॥ ॐ पन्नगेभ्यो नमः बलिं समर्पयामि।।ॐ ऋषिभ्यो नमः बलिं समर्पयामि ॥ ॐ मनुष्येभ्यो नमः बलिं समर्पयामि ॥
ॐ गोभ्यो नमः बलिं समर्पयामि।। ॐ देवमातृभ्यो नमः बलिं समर्पयामि।। ॐ भूतेभ्यो नमः बलिं समर्पयामि ॥ ॐ प्रेतेभ्यो नमः
बलिं समर्पयामि।ॐ पिशाचेभ्यो नमः बलिं समर्पयामि।। ॐ मातृभ्यो नमः बलिं समर्पयामि।।ॐ गणेभ्यो नमः बलिं समर्पयामि।।

प्रार्थना—बलिं गृह्णन्त्विमे देवा आदित्या वसवस्तथा। मरुतोऽश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च
पिशाचोरगराक्षसाः। डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृम्भकाः सिद्धगन्धर्वा मालाविद्याधरा नगाः। दिक्पाला
लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ इति सार्वभौतिकबलिः ॥

पूर्वादिदिक्षु सन्धावभिमर्शनम्—शालाभ्यन्तरे पूर्वादिदिक्षु भित्तिषु अभिमर्शनं—स्पर्शनमित्यर्थः ॥

१ पूर्वे सन्धावभिमृशति ॥ ॐ श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेताम् ॥

२ दक्षिणे सन्धावभिमृशति ॥ ॐ यज्ञश्च त्वा दक्षिणा च दक्षिणे सन्धौ गोपायेताम् ॥

३ पश्चिमे सन्धावभिमृशति ॥ ॐ अन्नं च त्वा ब्राह्मणाश्च पश्चिमे सन्धौ गोपायेताम् ॥

४ उत्तरे सन्धावभिमृशति ॥ ॐ ऊर्क् च त्वा सूनृता चोत्तरे सन्धौ गोपायेताम् ॥

गृहाद्बहिर्निष्क्रम्यदिशउपतिष्ठते-केताचमासुकेताचेत्यादिचतुर्णांमन्त्राणांविवस्वानृषिः।यजुश्छंदः।दिशोदेव०प्रागादिक्रमेणदिगुपस्थानेवि०

पूर्वदिशि-ॐ केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वैकेतादित्यः सुकेतातौ प्रपद्ये ताभ्यां नमोऽस्तुतौ मा पुरस्ताद्गोपायेताम्॥

दक्षिणादिशि—ॐ गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वैगोपायमानᳬ रात्री रक्षमाणा ते प्रपद्ये ताभ्यां
नमोऽस्तु ते मा दक्षिणतो गोपायेताम् ॥

पश्चिमदिशि-ॐ दीदिविश्चमाजागृविश्च पश्चाद्गोपायेतामित्यन्नं वैदीदिविः प्राणोजागृविस्तौप्रपद्येताभ्यांनमोऽस्तुतौ मापश्चाद्गोपायेताम्॥

उत्तरदिशि-ॐ अस्वप्नश्च माऽनवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽ-
स्तु तौ मोत्तरतो गोपायेताम् ॥ इति दिगुपस्थानम् ॥

गृहस्य पूर्वादिदिक्षु ध्वजां पताकां च रोपयेत्—पूर्वे—पीताम् । आग्नेय्यां—रक्ताम् । दक्षिणे—कृष्णाम् । नैर्ऋत्यां—नीलाम् ।
पश्चिमे—श्वेताम् । वायव्याम्—धूम्राम् । उदीच्यां- हरिताम् । ऐशान्याम्—मेचवर्णाम् । ईशानपूर्वयोर्मध्ये—गृहमध्यभागे वा—चित्रवर्णाम् ।
नैर्ऋतपश्चिमयोर्मध्ये रक्ताम् ॥ पूर्वादिरोपणक्रमेण नाममन्त्रेण ध्वजाः पताकाश्च पूजयेत् ॥

त्रिरावृत्तेन सूत्रेण रक्षोघ्नसूक्तं पठन् गृहं वेष्टयेत् छिन्ने सूत्रे अशुभम् ॥

गृहस्य परितः दुग्धजलपूरितेन कुङ्कुमगन्धाक्षतपुष्पदुर्वापञ्चरत्नपञ्चपल्लवादिनिक्षिप्तेन कुम्भेन पवमानरक्षोघ्नसूक्तं पठन् सन्
गृहस्य परितः अविच्छिन्नां धारां पातयेत् ॥

गृहप्रवेशः—यजमानः पञ्चपल्लवपञ्चरत्नदध्यक्षतगन्धादिभिरलङ्कृतम् उदकपूर्णं कलशं गृहीत्वा ब्राह्मणपुरस्सरं शुक्लमाल्यानुलेपनः
तादृशकलत्रपुत्रपौत्रादिसमेतः सशकुनः सूचिताभ्युदयः तोरणाढ्यां शालां द्वारेण प्रविश्य कलशं गोधूमतण्डुलादिधान्यराश्युपरि गृहस्या-

१ कृत्वाऽऽदौ वास्तुपूजां जलभृतकलशं ब्राह्मणांश्चाग्रतोऽर्कं वामं कृत्वाऽथ कार्यो नवतरभवने तोरणाढ्ये प्रवेशः ॥ वास्तुपद्धतौ—कृत्वा विप्रान्सजलकलशं
चाग्रतो वामतोऽर्कं स्नातः स्रग्वी विमलवचनैर्मङ्गलैर्वेदघोषैः । तोयैर्वासः कथितशकुनैर्द्वारमार्गेण राजन्हर्म्यं पुण्यं प्रकररुचिमत्तोरणाढ्यं विशेच ॥ १ ॥ भूरिपुष्पनिकरं
सतोरण तोयपूर्णकलशोपशोभितम् । पुष्पधूपबलिपूजितामरं ब्राह्मणध्वनियुतं विशेद्गृहम् ॥ २ ॥

ग्नेय्यां दिशि स्थापयेत्—तत्र मन्त्रः—धर्मस्थूणाराजमिति विवस्वान् ऋषिः विकृतिश्छंदः कालोदेवता शालाप्रवेशकलशस्थापने विनि-
योगः—ॐ धर्मस्थूणाराजꣳ श्रीस्तूपमहोरात्रे द्वारफलके॥इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह॥ यन्मे
किञ्चिदस्त्युपहूतः सर्वगणसखाय साधु संवृतः ॥ तां त्वाशाले अरिष्टवीरा गृहान्नः सन्तु सर्वतः ॥ धर्मार्थकामसिद्ध्यर्थं पुत्रपौत्राभि-
वृद्धये । त्वामहं प्रविशाम्यद्य भगोमन्दिर ते नमः ॥ यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावत्त्वं मम कुलस्य मङ्गलाभ्युदयं
कुरु ॥ इत्यनेन मन्त्रेण प्रविश्य तस्मिन्नेव कलशे वर्धिनीं पूजयेत् ॥

वर्धिनीपूजा—आग्नेय्यां स्थापितकलशसमीपे उपविश्य—वर्धिनि त्वं महाभागा सर्वतीर्थोदकान्विता । अतस्त्वां प्रार्थये देवि
भव त्वं कुलवर्धिनी॥ॐ वर्धिन्यै नमः वर्धिनीमावाहयामि स्थापयामि॥तत्रैव अष्टसिद्धीनां स्थापनम्—ॐ अणिमायै नमः अणिमामा-
वाहयामि स्थापयामि ॥ २ ॐ महिमायै नमः महिमामावाहयामि स्थापयामि॥ ३ॐ गरिमायै नमः गरिमामावाहयामि स्थापयामि॥
४ ॐ लघिमायै नमः लघिमामावाहयामि स्थापयामि॥ ५ ॐ प्राप्त्यै नमः प्राप्तिमावाहयामि स्थापयामि ॥ ६ ॐ प्राकाम्याय नमः
प्राकाम्यमावाहयामि स्थापयामि ॥ ७ ॐ ईशित्वाय नमः ईशित्वमावाहयामि स्थापयामि ॥ ८ ॐ वशित्वाय नमः वशित्वमावा-
हयामि स्थापयामि ॥ तत्रैव १ ॐ महापद्माय नमः महापद्ममावाहयामि स्थापयामि ॥ २ ॐ पद्माय नमः पद्ममावाहयामि स्थाप-
यामि॥ ३ॐ शङ्खायनमः शङ्खमावाहयामि स्थापयामि॥ ४ॐ मकरायनमः मकरमावाहयामि स्थापयामि॥ ५ॐ कच्छपायनमः कच्छप-
मावाहयामि स्थापयामि॥ ६ ॐ मुकुन्दायनमः मुकुन्दमावाहयामि स्थापयामि ॥ ७ ॐ कुन्दाय नमः कुन्दमावाहयामि स्थापयामि॥
८ॐ नीलायनमः नीलमावाहयामि स्थापयामि॥ ९ॐ खर्वायनमः खर्वमावाहयामि स्थापयामि॥ तत्रैव १ ॐ लक्ष्म्यैनमः लक्ष्मीमावा-
हयामि स्थापयामि॥ २ ॐ कौस्तुभायनमः कौस्तुभमावाहयामि स्थापयामि॥ ३ॐ पारिजातायनमः पारिजातमावाहयामि स्थापयामि॥ ॥६९॥

४ॐ सुरायै नमः सुरामावाहयामि स्थापयामि॥ ५ॐ धन्वन्तरये नमः धन्वन्तरिमावाहयामि स्थापयामि॥ ६ॐ चन्द्रमसे नमः चन्द्रमस
मावाहयामि स्थापयामि॥ ७ॐ कामदुघायैनमः कामदुघामावाहयामि स्थापयामि॥ ८ॐ सुरेश्वरगजाय नमः सुरेश्वरगजमावाहयामि स्थाप-
यामि॥ ९ ॐ देवाङ्गनाभ्योनमः देवाङ्गना आवाहयामि स्थापयामि॥ १० ॐ सप्तमुखाश्वाय नमः सप्तमुखाश्वमावाहयामि स्थापयामि ॥
११ ॐ सुधायैनमः सुधामावाहयामि स्थापयामि॥ १२ ॐ हरिधनुषे नमः हरिधनुरावाहयामि स्थापयामि ॥ १३ ॐ शङ्खाय नमः
शङ्खमावाहयामि स्थापयामि॥ १४ॐ विषायनमः विषमावाहयामि स्थापयामि॥ आवाहितदेवताभ्यो नमः यथासम्भवोपचारं पूजयेत्॥

ततो गृहमध्ये भैरवादीनां द्वारशाखादीनां गृहस्थोपस्कराणां स्थानानां च पूजनं यथोक्तक्रमेण कुर्यात् ॥
१ असिताङ्गभैरवाय नमः॥ २ रुरुभैरवाय नमः॥ ३चण्डभैरवाय नमः॥ ४ क्रोधभैरवाय नमः॥ ५ उन्मत्तभैरवाय नमः॥ ६कपालि-
भैरवाय नमः॥ ७ भीषणभैरवाय नमः ॥ ८ संहारभैरवाय नमः॥ एतान्सम्पूज्य भैरवेभ्यो नमः इमं बलिं समर्पयामि ॥ एवं सर्वत्र
बलिं दत्वा प्रार्थयेत्॥सर्वविघ्नविनाशाय सर्वानिष्टनिवृत्तये॥पूजिताः शुभदाः सन्तु भैरवाः सर्वसिद्धिदाः॥ततस्तत्रैव प्रागाद्यास्वेव-
१ ब्राह्म्यै नमः ॥ २ माहेश्वर्यै नमः॥ ३ कौमार्यै नमः॥ ४ वैष्णव्यै नमः ॥ वाराह्यै नमः ॥ ६ नारसिंह्यै नमः ॥ ७ इन्द्राण्यै नमः ॥
८ चामुण्डायै नमः॥ सम्पूज्य १ ब्राह्म्यै इमं बलिं समर्पयामि॥ २ माहेश्वर्यै इमं बलिं समर्पयामि॥ ३कौमार्यै इमं बलिं समर्पयामि॥
४ वैष्णव्यै इमं बलिं समर्पयामि ॥ ५ वाराह्यै इमं बलिं समर्पयामि ॥ ६नारसिंह्यै इमं बलिं समर्पयामि॥ ७ इन्द्राण्यै इमं बलिं समर्प-
यामि ॥ ८ चामुण्डायै इमं बलिं समर्पयामि॥ ततः प्रार्थयेत्॥ सर्वाशुभनिवृत्तिं मे कुर्वन्तु मातरो मम ॥ पूजिताः शुभदाः सन्तु रक्षन्तु
सर्वतः सदा॥ ततो गृहसर्वपूजा । गृहमध्यद्वारशाखापूजा । मन्त्रः—द्वारमाश्रित्य सर्वेषां शुचिर्भूत्वा समाहितः । द्वारपालान्समभ्यर्च्य
द्वाररक्षां विधाय च ॥ यवकुशदूर्वाश्वेतसर्षपगन्धाक्षतान् पुष्पाणि विकीर्य दिव्यदृष्ट्या विलोक्य दिव्यान् विघ्नान्समुत्सार्य ॥ दक्षिण-

शाखापूजा॥ स्थापितेयं मया शाखा शुभदा ऋद्धिदाऽस्तु मे॥पूजिता च मया भक्त्या सर्वदाऽस्तु स्थिराऽस्तु मे॥ यो धारयति सर्वेषां
जगति स्थावराणि च। धाता दक्षिणशाखायां पूजितो वरदोऽस्तु मे॥ धात्रे नमः॥ धर्माय नमः॥ ज्ञानाय नमः॥ वैराग्याय नमः॥
ऐश्वर्याय नमः॥ दक्षिणद्वारे ॥ श्रियै नमः॥ जयायै नमः॥ विजयायै नमः॥ गौर्यै नमः॥ श्रियै नमः॥ इति दक्षिणशाखापूजनम्॥
यः समुत्पाद्य विश्वेशो भुवनानि चतुर्दश। विधाता वामशाखायां स्थिरो भवतु पूजितः॥विधात्रे नमः॥धर्माय नमः॥ज्ञानाय नमः॥
वैराग्याय नमः॥ ऐश्वर्याय नमः॥ द्वारश्रियै नमः॥ चण्डिकायै नमः॥ शङ्खाय नमः॥ अब्जाय नमः॥ इति वामशाखा पूजनम्॥
ऊर्ध्वं देहल्यै नमः॥ गजवक्त्र गणाध्यक्ष हे हेरम्बांबिकात्मज। विघ्नान्निवारयाशु त्वमूर्ध्वोदुम्बरसंस्थितः॥ गणपतये नमः॥
दक्षिणे। ऋद्ध्यै नमः॥ वामे-बुद्ध्यै नमः॥ अधो देहल्याम्॥ यस्याः प्रसादात्सुखिनो देवाः सेन्द्राः सहोरगाः। सा वैश्रीर्देहली-
संस्था पूजिता शुद्धिदाऽस्तु मे॥ द्वारश्रियै नमः॥ आधारशक्त्यै नमः॥ कूर्मासनाय नमः॥ क्षीरोदकाय नमः॥ अनन्ताय नमः॥
आधाराय नमः॥ रत्नद्वीपाय नमः॥ माणिक्यमण्डपाय नमः॥ कल्पतरुभ्यो नमः॥ स्वर्णमयवेदिकायै नमः॥ सिंहासनाय नमः॥
इत्यूर्ध्वाधोदेहलीपूजा॥ततो गृहमध्यस्तम्भपूजा। भारपदेपूजा॥ धारण त्वं महाभारनिर्मितो विश्वकर्मणा। स्थापितः शुभदो नित्यं गृह-
भारक्षमो भव॥इति मध्यभारपदं सम्पूज्य ततो दीपस्थापने पूजयेत्॥तिमिरस्य तिरस्कर्ता ज्योतीरूपः सुविश्रुतः। विघ्नान्धकारनाशाय
पूजयामि समृद्धिदम्॥दीपेशाय नमः॥ ततश्चुल्हीं पूजयेत्। महानस इति ख्यातो देवयज्ञादिसिद्धिकृत्। अन्नादिसाधनं स्थानं धर्म-
मूलशुभप्रदम्॥ पाकस्थानाय नमः॥ चूल्ह्यां विश्वेशाय नमः॥ कारपाणाय नमः॥ धर्माय नमः॥ पाकभाजनम्। पूजनाच्छुभदा ज्येष्ठा
सन्धानभाण्डसंस्थिता॥ स्थानं च रससम्पत्तेरस्तु मे सर्वसिद्धिदम्॥ सन्धानभाण्डे ज्येष्ठायै नमः॥ यन्मे दुरिन्द्रो महत इति मन्त्रम्॥
जलस्थान पूजा॥ शङ्खस्फटिकवर्णाभ श्वेतदिव्याम्बरावृत। पाशहस्त महाबाहो कृपाङ्कुरु दयानिधे॥ आवाहयामि देवेश पवित्रं पाप



नाशनम्। जलपात्रसमाख्याता देवता ऋषयस्तथा॥ ईश्वरनिर्मितं पात्रं स्थापितं चैव विष्णुना। देवदेवमहादेवनिर्मितं ब्रह्मणा
स्वयम्॥ तेनैवाभ्युक्षणं कुर्यात् सर्वोपद्रवनाशनम्। आगच्छ पात्रदेवेश अस्मदर्थे कृपाङ्कुरु॥ कलशाय नमः॥ जलस्थाने वरुणाय
नमः॥ सम्मार्जनी पूजा—ग्रहशालाशुद्धिकरणम्। गृहमध्यस्थमार्गदेवताः पूजयामि॥ मार्गदेवताभ्यो नमः॥ सम्मार्ज्जनीकामाय
नमः॥ अमृताय नमः॥ बलभद्राय नमः॥ पेषण्यां चरक्याः पूजा। सौभाग्यं सुभगे देहि पेषणी संस्थिता सदा। पिष्टनिष्पादनार्थाय
पूजिता शुभदाऽस्तु मे॥पेषण्यां सुभगे देहि पेषणि संस्थिता सदा। पिष्टनिष्पादनार्थाय पूजिता शुभदास्तु मे॥पेषण्यां सुभगायै नमः॥
चरक्यै नमः॥ पेषण्यै नमः॥ उलूखलपूजा॥ व्रीहीनां खण्डनं यच्च तुषाणां च विमर्दनम्। त्वदधीनमतः पूजा गृहाण सुमुखो भव॥
उलूखाय नमः॥ मुशलाय नमः॥ केलीस्थानकपूजा॥ शयने कामाय नमः॥ अमृताय नमः॥ प्रीत्यै नमः॥ रत्यै नमः॥ धृत्यै
नमः॥ कान्त्यै नमः॥ मनोहरायै नमः॥ मनोरमायै नमः॥ सदनायै नमः॥ कामायै नमः॥ दीपिन्यै नमः॥ सुभगायै नमः॥
इति काम पूजा॥ मध्ये सुपूजिता देवाः सन्तु मे सर्वसिद्धिदाः। नश्यन्ति सर्वविघ्नानि देवानां पूजनादिह॥ मध्ये सर्वदेवेभ्यो
नमः॥ अथ देवस्थापनम्। आवाहयामि देवेशं सर्वदेवमयं प्रभुम्। अर्चने स्थानमाश्रित्य वास्तुदोषापनयनाशय॥ अत्र तुलसीदूर्वा-
पूजनम्॥ तुलस्यमृतजन्मासि वन्दिता च सुरासुरैः। सौभाग्यसंततिं दत्वा सर्वसौख्यकरा भव॥ दूर्वेह्यमृतसंपन्ने शतमूले शताङ्कुरे।
तथा ममापि सन्तानं कुरु देव्यजरामरम्॥ इति तुलसीदूर्वापूजनम्॥ पशुस्थाने गोशालाम् पूजयेत्॥ आवाहयामि सुरभेधेनो त्वां
लोकमातरम्। पूजिता शुभदा त्वं मे पूर्णान्कुरु मनोरथान्॥ रथचक्राय नमः॥ धुरन्धराय नमः॥ सर्वाधिपो महादेव ईशानः
शूल ईश्वरः। पशूनां पतिरस्माकम्पूजितः शुभदः सदा॥ पशुपतये नमः॥ एवं सर्वत्र पूजापूर्वकं बलिं दद्यात्॥
वास्तुपुरुषमूर्तिनिक्षेपः-गृहस्य आग्नेयकोणे आकाशपदे जानुपरिमितगर्तं खनयित्वा तं गोमयेनोपलिप्य शुक्लचन्दनपुष्पाक्षता-

दिभिरलङ्कृत्य यवगोधूमतिलकङ्गवः मुद्गकाः श्यामाकाः चणकाः इति सप्तबीजानि दध्योदनं च प्रक्षिप्य जलपूर्णं शुक्लपुष्पयुतं गन्धादिभि-
रचितं नवकुम्भं हस्तद्वयेन आदाय जानुभ्याम् अवनिं गत्वा ॐवरुणायनमः इतिमन्त्रेण कुम्भस्थजलेनगर्तं पूरयेत्।ततः मृन्निर्मितपेटिकायां
यवगोधूमतिलकङ्गवः मुद्गकाः श्यामाकाः चणकाः इति सप्तबीजं दध्योदनं शैवालं पुष्पाणि च प्रक्षिप्य पूर्वस्थापितोत्तरवृषसंस्थवास्तु-
मूर्तिं तस्यां मृत्पेटिकायां संस्थाप्य तां पेटिकां गर्ते ईशानकोणे संस्थाप्य ॐवास्तुपुरुषायनमः इत्यनेन मन्त्रेण गन्धादिभिःपूजयेत् ॥
प्रार्थना-पूजितोसि मया वास्तो होमाद्यैरर्चनैः शुभैः ।प्रसीद पाहि देवेश देहि मे गृहजं सुखम्।।सशैलसागरां पृथ्वीं यथा वहसि
मूर्धनि।तथा मां वह कल्याणसम्पत्सन्ततिभिः सह ॥ नमस्ते वास्तुपुरुष भूशय्याभिरतप्रभो । मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा ॥
प्रार्थयामीत्यहंदेवशालाया अधिपस्तुयः । प्रायश्चित्तप्रसङ्गेन मन्दिरार्थं मयाकृतम् ॥ मूलच्छेदं तृणच्छेदं कृमिकीटनिपातनम् । हननं
जलजीवानां भूमौ शस्त्रेण घातनम्।। अनृतं भाषितं यच्च किञ्चिद्वृक्षस्यपातनम् । एतत्सर्वंक्षमस्वेदं यन्मया दुष्कृतं कृतम् ॥ मन्दिरार्थं
कृतंपापमज्ञानेनाथ चेतसा । तत्सर्वं क्षम्यतां देव शोभनं कुरु मन्दिरम् । यावच्चन्द्रो नगाः सूर्यस्तिष्ठन्ति प्रतिपादिताः । तावत्त्वयात्र
देवेश स्थेयं भक्त्यानुकम्पया ॥ यथा मेरुगिरेः शृङ्गं देवानामालयः सदा । तथा शिख्यादिभिः सार्कं मम गृहे स्थिरो भव ॥ इति
प्रार्थ्य गर्तं तथैव मृदा पूरयेत् तं गोमयेनोपलिप्य शुक्लगन्धाक्षतपुष्पैर्भूषयेत् ॥
श्रेयोदानम्-ब्रह्मादय ऋत्विजादयश्च आचार्यद्वारा श्रेयोदानं कुर्युः।।उदङ्मुखआचार्यः प्राङ्मुखस्थितयजमानहस्ते श्रेयोदानं कुर्यात्॥

---

१ यवगोधूमधान्यानि तिलाः कङ्गुश्च मुद्गकाः । श्यामाकाश्चणकाश्चैव सप्तधान्यमुदाहृतम् ॥ २ मृदाधिक्ये शुभं साम्ये मध्यमं न्यूनत्वेत्यधमं फलं विद्यात् ॥
३ कल्पद्रुमादिग्रन्थेषु तु वरणक्रमेण आचार्यादयः स्वं स्वं श्रेयोदानं कुर्युः इत्युक्तम्। सौकर्याय अत्र प्रयोगे आचार्यद्वारा श्रेयोदानमाहृतमस्ति ॥ इदं श्रेयःसंपादनं
निर्मूलत्वाद्यजमानप्रतारणमात्रमेव ऋत्विकर्तृककर्मणः फलस्य यजमाननिष्ठत्वात्॥ केचित्तु पुत्रकृतवैतरणीदानजन्यश्रेयोदानवन्माघस्नानादिजन्यपुण्यदानवच्चेदमपि श्रेयो-



शिवा आपः सन्तु इति यजमानहस्ते उदकं दत्वा सौमनस्यमस्तु-इति पुष्पाणि ॥ अक्षतं चारिष्टं चास्तु इति अक्षतांश्च दत्वा
ततो दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चास्तु इति पुनरुदकं दत्वा ॥ आचार्यः-हस्ते साक्षतसोदकपूगीफलं गृहीत्वा भवन्नियोगेन मया
अस्मिन् सग्रहमखशालाकर्मपूर्वकवास्तुशान्त्याख्ये कर्मणि यत्कृतम् आचार्यत्वं तथा च एभिर्ब्राह्मणैः सह यत्कृतं ब्रह्मत्वं गाणपत्यं
सादस्यं च यः कृतो होमस्तस्मात् आचार्यत्वात् ब्रह्मत्वात् गाणपत्याच्च सादस्यात् होमात् यदुत्पन्नं श्रेयस्तदमुनासाक्षतसोदकपूगीफलेन
तुभ्यमहं सम्प्रददे तेन श्रेयसा त्वं श्रेयस्वान्भव ॥ प्रतिगृह्य भवामि इति यजमानो वदेत् ॥
दक्षिणादानम् ॥ सपत्नीको यजमानः अग्नेः पश्चिमतः उपविष्टः उदङ्मुखानाचार्यादीन्वरणक्रमेण कनिष्ठमध्यमोत्तमपक्षाणां
शक्त्यनुसारिपक्षमाश्रित्य पूजापूर्विकां दक्षिणां दद्यात्॥हस्तेजलमादाय देशकालौ स्मृत्वा मया आचरितस्य सग्रहमखशालाकर्मपूर्वक-
वास्तुशान्त्याख्यस्य कर्मणः साङ्गतासिद्धये आचार्यादिवृतेभ्यो ब्राह्मणेभ्यः पूजनपूर्वकं दक्षिणाप्रदानं करिष्ये ॥
आचार्यपूजनम्-आचार्याय एतत्ते पाद्यं शिष्टाचारात्पादौ प्रक्षाल्य इदमर्घ्यम् इमे तुभ्यं बार्हस्पत्ये वाससी एष ते गन्ध इमानि
पुष्पाणि एष ते धूपः दीपः नैवेद्यताम्बूलादीनि इति दत्वा एतावतीं दक्षिणां तुभ्यमहं सम्प्रददे ॥
आचार्याय गोप्रदानम्-हिरण्यं कुशाक्षतकुसुमजलान्यादाय पूर्वोक्तविशेषणवति काले मया आचरितस्य सग्रहमखशालाकर्म-
पूर्वकवास्तुशान्त्याख्यस्य कर्मणः फलप्रतिष्ठासिद्ध्यर्थं अमुकसगोत्राय अमुकप्रवराय शुक्लयजुर्वेदान्तर्गतवाजिमाध्यन्दिनीयशाखा-
ध्यायिने अमुकशर्मणे आचार्याय गोनिष्क्रयभूतमिदं हिरण्यम् अग्निदैवतं तुभ्यमहं सम्प्रददे ॥ हिरण्यासम्भवे रजतं दद्यात् ॥

---

दानमविरुद्धमित्याहुः । इति कल्पद्रुमकारोक्तम् ॥ खण्डदीक्षितास्तु-श्रेयोदानं निर्मूलत्वाद्यजमानप्रतारणमात्रमिति केचन वदन्ति तदयुक्तं विधिवाक्यश्रवणात् ॥
तदुक्तं प्रयोगपारिजाते वामनः-आचार्यप्रभृतिभ्यश्च कर्मार्चनफलं ततः । समिदाज्यचरूणां च तिलहोमफलं तथा ॥ तेभ्यो जपफलं तद्वद्भूगीवाजलपूर्वकम् । तत-
स्तेभ्यो यथाशक्ति दातव्या दक्षिणाः पृथक्। इत्युक्तत्वात् ॥ परशुराममहारुद्रपद्धतौ-यथोक्तविधिना यादृक् अस्माभिरेवनं कृतम् । तेन यज्जनितं पुण्यं स पुण्येन हि
पुण्यभाक् ॥ भव देवप्रसादेन तत्पुण्यं तव नो मम॥ इत्युक्त्वा कर्मकृद्धस्ते श्रेयः सम्पाद्यते द्विजैः ॥

ततो ब्रह्मन्नेतत्तेपाद्यमित्यादिना पूर्वोक्तप्रकारेण पूजापूर्वकं ब्रह्मणे दक्षिणां दद्यात् ॥ एवं गाणपत्याय सदस्याय ऋत्विग्भ्यः यथोक्तदक्षिणां दत्त्वा आशिषो गृह्णीयात् ॥

स्वर्णदानमन्त्रः—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ इदं यथाशक्ति सुवर्णम् अग्निदैवतम् अमुकशर्मणे तुभ्यमहं सम्प्रददे ॥ प्रतिगृह्णामि ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥

भूमिदानमन्त्रः-सर्वभूताश्रया भूमिर्वराहेण समुद्धृता। अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छ मे॥ इमां भूमिं विष्णुदैवतां वा तन्निष्क्रयी-भूतं यथाशक्तिरजतद्रव्यम् अमुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥

तिलपात्रदानम्—महर्षेर्गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः। तस्मादेषां प्रदानेन मम दोषो व्यपोहतु॥ एतांस्तिलान् प्रजापति-दैवतान् आचार्याय तुभ्यमहं सम्प्रददे न मम॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ प्रजापतये प्रतिगृह्णामि॥

अथाभिषेकः-आचार्यादयः सर्वे उदङ्मुखास्तिष्ठन्तः ग्रहवेदीशानस्थकलशोदकं वास्तुपीठादिसकलपीठस्थकलशोदकानि पात्रान्तरे उद्धृत्य तैर्दूर्वापञ्चपल्लवैर्वक्ष्यमाणैर्वैदिकैः पौराणैः मन्त्रैश्च प्राङ्मुखोपविष्टं सकुटुम्बं यजमानं तद्वामत उपविष्टां पत्नीञ्च अभिषिञ्चेयुः ॥

ॐ आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ १४/३६ ॥

---

१ दानानि— स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये ॥ गोभूहिरण्यवासांसि माहेश्वरपदं तथा । दानानि च प्रदयामि नानादोषोपशान्तये ॥

२ नारदपुराणे अध्याय ११ श्लोक ६४ ॥ पृथिवी वैष्णवी पुण्या पृथिवी विष्णुपालिता । पृथिव्यास्तु प्रदानेन प्रीयतां मे जनार्दनः ॥

३ परशुरामः—अभिषेकं मूर्ध्नि होमं माङ्गल्यं स्वस्तिवाचनम्। प्रैष्यं च मन्त्रपाठं च तिष्ठन् कुर्यात् सदैव हि ॥ ४ संस्कारकौस्तुभे—सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता। विप्रपादक्षालने च ह्यभिषेके च वामतः॥ विप्रपादक्षालनं तु पित्र्यकर्मणि विहितम्॥ वामे पत्नी त्रिषु स्थाने पितॄणां पादशोधने। रथारोहणकाले तु ऋतुकाले तथा भवेत्॥ ५ गीतवाद्यादिमङ्गलघोषपुरःसरोऽभिषेकः कार्यः इति कल्पद्रुमकाराः॥ परशुरामः—पीठस्थैः कुम्भतोयैश्च पञ्चपल्लवसंयुतैः। यजमानस्य कर्तव्यं स्नपनं चाभिषेचनम्॥ ऋत्विग्भिर्हि संतुष्टैः प्राङ्मुखैर्वाप्युदङ्मुखैः। अभङ्गावयवैर्विप्रैस्तथा ह्युद्दीप्तभूषणैः॥ मन्त्रैर्वरुणदैवत्यैः स्वशाखोक्तैः पुराणजैः। अन्यैरप्यभिषेकोक्तैरभिषिञ्चेत्पुनः पुनः ॥



यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ १५/३६ ॥ तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥ १६/३६ ॥ शुचिरा पूतऽएमि ॥ ३/४ ॥

आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्वꣳ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽएमि ॥ ४६/२० ॥ स्वाहा देवाऽअमृता मादयन्ताम् ॥ ४६/२० ॥

घृतं घृतपावानः पिबत वसां वसापावानः ... घृतप्रुषा मनसा मोदमानाः स्वाहा देवाऽअमृता मादयन्ताम् ॥

स्तोकानामिन्दुं प्रति शूरऽइन्द्रो वृषायमाणो वृषभस्तुराषाट् ॥ घृतप्रुषा मनसा मोदमानाः स्वाहा ॥ ... पृथिव्यां ... पुष्यात् ॥ ४७/२० ॥

आ यात्विन्द्रोऽवसऽउप नऽइह स्तुतः सधमादस्तु शूरः ॥ वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥ ४८/२० ॥ (सुम्नं ... )

आ नऽइन्द्रो दूरादा नऽआसादभिष्टिकृदवसे यासदुग्रः ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥ ४८/२० ॥

आ नऽइन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ॥ तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥ ४९/२० ॥

त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ ५०/२० ॥

इमं मे वरुण श्रुधी हवमद्या च मृडय ॥ त्वामवस्युरा चके ॥ १/२१ ॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽआयुः प्रमोषीः ॥ २/२१ ॥

त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ ३/२१ ॥

स त्वन्नोऽअग्नेऽवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ॥ अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽएधि ॥ ४/२१ ॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ॥ अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥ १२/१२ ॥

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ३६/४ ॥

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ॥ प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम ॥ ३४/३४ ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ॥ भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३६/३४ ॥

इदमापः प्रवहतावद्यं च मलं च यत् ॥ यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम् ॥ आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥ १७/६ ॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ॥ अनाधृष्याय त्वा वाताय स्वाहाऽप्रतिधृष्याय त्वा वाताय स्वाहा ॥

अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा ॥ ७/३८ ॥ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु

प्रपितामहाः ॥ पवित्रेण शतायुषा॥ पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः॥ पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ३७/१९॥
अग्न आयूंषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ३८/१९ ॥
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ३९/१९ ॥
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्॥अग्ने क्रत्वा क्रतूँ रनु॥ ४०/१९॥यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा॥ब्रह्म तेन पुनातु मा॥ ४१/१९॥
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्... पवित्रेण सवेन च॥माम्पुनीहि विश्वतः॥ ४३/१९॥
पवमानः सो अद्य नः पवित्रेण विचर्षणिः॥यः पोता स पुनातु मा॥ ४२/१९॥उभाभ्यान्देव सवितः पवित्रेण सवेन च॥माम्पुनीहि विश्वतः ॥ ४३/१९॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ॥ तया मदन्तः सधमादेषु वयं स्याम पतयो रयीणाम् ॥ ४४/१९ ॥
आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ॥ भवा वाजस्य सङ्गथे ॥ ११२/१२॥
पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ॥ सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ ११/३४ ॥ चित्पतिर्मा पुनातु वाक्पतिर्मा
पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ ४/४ ॥
शिरो मे श्रीर्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि ॥ राजा मे प्राणो अमृतः सम्राट्चक्षुर्विराट्श्रोत्रम् ॥ ५/२० ॥
जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड्भामः॥ मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रम्मे सहः ॥ ६/२० ॥
बाहू मे बलमिन्द्रियः हस्तौ मे कर्म वीर्यम् ॥ आत्मा क्षत्रमुरो मम ॥ ७/२० ॥
पृष्ठीर्मे राष्ट्रमुदरमः सौ ग्रीवाश्च श्रोणी ॥ ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥ ८/२० ॥
नाभिर्मे चित्तं विज्ञानम्पायुर्मेऽपचितिर्भसत् ॥ आनन्दनन्दावाण्डौ मे भगः सौभाग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्मोऽस्मि विशि राजा
प्रतिष्ठितः॥ ९/२० ॥ पयः पृथिव्याम्पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ ३६/१८ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥ सरस्वत्यै वाचो यन्तुर्यन्त्रियै दधामि बृहस्पतेष्ट्वा साम्राज्येनाभि-
षिञ्चाम्यसौ ॥ ३०/९ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥ ३७/१८॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै
भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ ३/२० ॥
सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण ॥ क्षत्राणाङ्क्षत्रपतिरेध्यति दिद्यून्पाहि ॥ ११/? ॥
विश्वानि देव सवितर्दुरितानि परा सुव ॥ यद्भद्रन्तन्न आ सुव ॥ ३/३० ॥
शमग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ॥ सचेतसो विश्वेदेवा यज्ञम्प्रावन्तु नः शुभे ॥ ७६/१८ ॥
त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः ॥ रक्षा तोकमुत त्मना ॥ ७७/१८ ॥
अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ॥ प्रप्रदातारन्तारिष ऊर्जन्नो धेहि द्विपदे चतुष्पदे ॥ ८३/११ ॥
पालाशं भवति। तेन ब्राह्मणोऽभिषिञ्चति ब्रह्म वै पलाशो ब्रह्मणैवैनमेतदभिषिञ्चति ॥ औदुम्बरं भवति । तेन स्वोऽभिषिञ्चत्यन्नं वा
ऊर्गुदुम्बर ऊर्ग्वै स्वं यावद्वै पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क्स्वं तस्मादौदुम्बरेण स्वोऽभिषिञ्चति॥ नैयग्रोधपादम्भवति । तेन-
मित्र्यो राजन्योऽभिषिञ्चति पद्भिर्वै न्यग्रोधः प्रतिष्ठितो मित्रेण वै राजन्यः प्रतिष्ठितस्तस्मान्नैयग्रोधपादेन मित्र्यो राजन्योऽभिषिञ्चति ॥
आश्वत्थं भवति । तेन वैश्योऽभिषिञ्चति स यद्देवा आश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत तस्मादाश्वत्थेन वैश्योऽभिषिञ्चति ॥
सर्वसुरभ्युन्मर्दनम्भवति परमो वा एष गन्धो यत्सर्वसुरभ्युन्मर्दनं गन्धेनैवैनमेतदभिषिञ्चति ॥
मुदेव कुल्पाञ्जुहोति । प्राणा वै कुल्पा अमृतमु वै प्राणा अमृतेनैवैनमेतदभिषिञ्चति ॥ अथ साम गायति क्षत्रं वै साम क्षत्रेणैवैनमेतदभि-
षिञ्चत्यथो साम्राज्यं वै साम साम्राज्येनैवैनं साम्राज्यं गमयति सर्वेषां वा एष वेदानां रसो यत्साम सर्वेषामेवैतद्वेदानां रसेनाभिषिञ्चति ॥

पौराणाः—सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु
विजयाय ते । आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः सर्वे दिक्पालाः
पान्तु ते सदा॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः॥ एतास्त्वामभिषिञ्चन्तु
देवपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्वा

यक्षराक्षसपन्नगाः ॥ ऋषयो मुनयो गावो देवमातर एव च । देवपत्न्योद्रुमानागादैत्याश्चाप्सरसां गणाः॥ अस्त्राणि सर्वशस्त्राणि राजानो
वाहनानि च।औषधानि च रत्नानि कालस्यावयवाश्च ये॥सरितः सागराः शैलास्तीर्थानि जलदानदाः।एते त्वामभिषिञ्चन्तु सर्वकामार्थ-
सिद्धिदाः॥ ब्रह्मा विष्णुश्च रुद्रश्च मुनयः सकलाग्रहाः । वेदमन्त्राश्च कल्पाश्च प्रयच्छन्तु च सौभगम् । तपोधनाः कर्मपरा ह्यग्निहोत्रपरा-
यणाः। अग्निहोत्रं च यज्ञाश्च तव सन्तु सुखप्रदाः॥ मीमांसाश्च पुराणानि चेतिहासाः ससूत्रकाः। भाष्यवार्तिकतत्त्वज्ञाः कल्याणानि
दिशन्तु ते॥अग्निः सोमश्च वायुश्च धर्मः सत्यं क्षमा दया । तव स्वस्तिपरा नित्यं सन्तु वै शुभदायकाः॥ ब्रह्माणी चैव गायत्री सावित्री
श्रीरुमा सती । अरुन्धत्यनसूया च तव सन्तु फलप्रदाः ॥ तीर्थानि सरितः पुण्याः सरांसि पुष्कराणि च । अचलाश्च चलाश्चैव
तव स्वस्तिकराः सदा ॥ वेदव्यासश्च वाल्मीकी रामश्चापि पराशरः। देवलः पर्वतश्चैव दुर्वासा भार्गवस्तथा ॥ याज्ञवल्क्यश्च जाबालि-
र्जमदग्निः शुचिश्रवाः । विश्वामित्रः स्थूलशिराश्च्यवनोऽत्रिर्विदूरथः ॥ एकतश्च द्वितश्चैव त्रितो गौतमगालवौ । शाण्डिल्यश्च भरद्वाजो
मौद्गल्यो वेदवाहनः ॥ कात्यायनश्च कण्वश्च वालखिल्यास्तथैव च । पृथुर्दिलीपो भरतो मान्धाता च पुरूरवाः ॥ अम्बरीषः ककुत्स्थश्च
मुचकुन्दोऽथ भूभृतः। श्वेतश्च शृङ्गवान्मेरुर्विन्ध्याद्रिर्गन्धमादनः॥ माल्यवान्पारियात्रश्च सर्व एव महीधराः। ऋग्वेदोऽथ यजुर्वेदः सामवेदो
ह्यथर्वणः ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ॥ छन्दः शास्त्राणि सर्वाणि पुराणैः सकलैः सह ॥ साङ्ख्ययोगौ पञ्चरात्रं
शैवं पाशुपतं तथा । गायत्री पापशमनी दुर्गादेवी महाशिवः ॥ स्थानानि च समस्तानि पुण्यान्यायतनानि च । लवणः क्षीरतोयश्च
घृतमण्डोदकस्तथा॥दधिमण्डः सुरोदश्च इक्षुः स्वादूदकस्तथा ।पुष्करश्च प्रयागश्च प्रभासं नैमिषं तथा ॥ गयाशिरो ब्रह्मशिरस्तथैवोत्तर-
मानसम्॥गङ्गाद्वारं कुशावर्तः बिल्वकं नीलपर्वतः॥ वाराहं भृगुतुङ्गश्च शालिग्रामसरस्तथा । शूर्पारकं पौण्डरीकं गङ्गासागरसङ्गमम्॥
धर्मारण्यं फल्गुतीर्थमविमुक्तं तु मोक्षदम्। गङ्गा सरस्वती पुण्या सरयूर्गण्डकी तथा ॥ कौशिकी यमुना क्षिप्रा चन्द्रभागा च गोमती ।
मन्दाकिनी दशार्णा च तामसी च कुमुद्वती ॥ रेवा वैतरणी भीमा कृष्णा वेण्या मही तथा । गोदावरी भीमरथी गौतमी चाश्वनद्यपि॥
तुङ्गभद्रा ताम्रपर्णी कावेरी नेत्रवत्यपि । नन्दा चालकनन्दा च करतोया च पिप्पला॥ सर्वपापशमन्यश्च सर्वलोकस्य मातरः । स्वतो-
यपूर्णैः कलशैरभिषिञ्चन्तु सर्वदा ॥ भूराद्याः सप्तलोकाश्च पातालानि तथैव च । द्वीपा जम्ब्वादिकाः सप्त तथा सप्तैव सिन्धवः ॥ ब्रह्मादि-

सप्तकल्पाश्च मनवश्च चतुर्दश । कृतं त्रेता द्वापरश्च कलिश्चेति चतुर्युगम् ॥ संवत्सराश्च ऋतवो मासपक्षदिनानि च । एते त्वामभिषिञ्चन्तु
सर्वकामार्थसिद्धये॥सहस्राक्षं शतधारम् ऋषिभिः पावनं कृतम्। तेनत्वामभिषिञ्चामि पावमान्यः पुनन्तु ते॥ भगं ते वरुणो राजा भगं सूर्यो
बृहस्पतिः । भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।ललाटे कर्णयोरक्ष्णोरापो निघ्नन्तु ते सदा॥
ॐशान्तिःशान्तिः सुशान्तिर्भवतु॥हस्ते जलं गृहीत्वा अभिषेककर्तृभ्यो ब्राह्मणेभ्यो यथोत्साहदक्षिणां दास्ये तेन श्रीकर्माधीशः प्रीयताम्।

अभिषिक्तः सपत्नीको यजमानः सर्वौषधिभिरुद्वर्तिताङ्गः गङ्गादिशुद्धोदकेन स्नात्वा उभाभ्यामभिषिक्ताभ्यां त्यक्तानि
स्नानवस्त्राण्याचार्याय दत्वा शुक्लमाल्याम्बरधरो धृतमङ्गलतिलकः स्वासने उपविशेत् ॥

घृतपात्रदानम्—घृतपूरितकांस्यपात्रे मुखावलोकनं कुर्यात्–ॐरूपेणं वो रूपमभ्यागान्तुथो वो विश्ववेदा विभजतु॥ ऋतस्य
पथाप्रेत चन्द्रदक्षिणा वि स्व॒ः पश्यव्युन्तरिक्षँ यतस्व सदस्यैः ॥ ४५ ॥ब्राह्मणम्—रूपꣳ रूपम्प्रतिरूपोबभूवतदस्यरूपम्प्रति चक्षणाय॥
इन्द्रो मायाभिः पुरुरूपऽ ईयते युक्ता ह्यस्य हरयः शतादशेत्ययं वै हरयो यम्वै दश च सहस्राणि बहूनि चानन्तानि चतदेतद्ब्रह्मापूर्व-
मनपरमनंतरमबाह्यमयु मात्मा ब्रह्म सर्वानु भूरित्यनुशासनम् ॥ इदम् आज्यपात्रं सदक्षिणाकम् आचार्याय तुभ्यमहं सम्प्रददे ॥

ब्राह्मणभोजनसङ्कल्पः—कृतस्य सग्रहमखशालाकर्मपूर्वकवास्तुशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान्
भोजयिष्ये तेन श्रीकर्माङ्गदेवता वास्तुपुरुषः प्रीयताम् ॥

भूयसीदक्षिणाप्रदानम्—हस्ते जलमादाय नानावेदान्तर्गतनानाशाखाध्यायिभ्यो नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो
दीनेभ्योऽनाथेभ्यश्च यथाशक्ति भूयसीं दक्षिणां दातुमुत्सृजे॥ ॐतत्सदिति वदन् भूयसीं दक्षिणां दत्त्वा तेषाम् आशिषो गृह्णीयात्॥

देवताविसर्जनम्—पुष्पाक्षतप्रक्षेपेण स्थापितदेवान्विसर्जयेत्–ॐउत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उप प्रयन्तु मरुतः सुदा-
नवऽ इन्द्र प्राशूर्भवा सचा ॥ ३४/५६ ॥ यान्तु देवगणाः सर्वे स्वशक्त्या पूजिता मया ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

पीठादिदानम्—गणेशमातृकाग्रहादिपीठानि अवशिष्टपूजोपस्कराणि च आचार्याय दद्यात्–हस्ते जलं गृहीत्वा–इमानि गणेश-
मातृकाग्रहादिपीठानि समूर्तिकानि सकलशानि सवस्त्राणि अवशिष्टपूजोपस्कराणि च आचार्याय तुभ्यमहं सम्प्रददे ॥

युयोध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते
अग्निपूजनम्-ॐ अग्ने नय सुपथा रायेऽ अस्म्मान्विश्श्वानि देव वयुनानि विद्वान् ॥ युयोध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽ उक्तिं विधेम ॥३६/८॥ अग्नये नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

ऋधंगयाऽ ऋधंगुताशमिष्ठाः प्रजानन्न्यज्ञ-
अग्निविसर्जनम्-ॐ वयꣳ हि त्वा प्रयति यज्ञेऽ अस्म्मिन्नग्ने होतारमवृणीमहीह ॥ ऋधंगयाऽ ऋधंगुताशमिष्ठाः प्रजानन्न्यज्ञमुपयाहि विद्वान्त्स्वाहा ॥२०/८॥ ॐ अनु वीरैरनु पुष्ष्यास्स्म गोभिरन्न्वश्श्वैरनु सर्वेण पुष्टैः ॥ अनु द्विपदानु चतुष्पदा वयन्देवा नो यज्ञमृतुथा नयन्तु ॥१९/२६॥ ॐ यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वां योनिङ्गच्छ स्वाहा ॥ एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तञ्जुषस्व स्वाहा ॥२२/८॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ गच्छ त्वं भगवन्नग्ने स्वस्थाने विश्वतोमुख ॥ हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥ इति अग्निं विसर्जयेत् ॥

अञ्जलिं बद्ध्वा-चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥

हस्ते कुशजलाक्षतान्गृहीत्वा-मया यत्कृतं यथाकालं यथादेशं यथाज्ञानं यथाशक्ति सग्रहमखशालाकर्मपूर्वकवास्तुशान्त्याख्यं कर्म तेन श्रीभगवान् परमेश्वरः प्रीयताम् ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥ हस्तस्थितकुशजलाक्षतान् भूमौ निक्षिपेत् ॥

सम्पूर्णतावाचनम् ॥ अञ्जलिं बद्ध्वा-मया यत्कृतं सग्रहमखशालाकर्मपूर्वकवास्तुशान्त्याख्यं कर्म तत्कालहीनं भक्तिहीनं शक्तिहीनं श्रद्धाहीनं च भवतां ब्राह्मणानां वचनात् सर्वं सम्पूर्णमच्छिद्रं चास्तु ॥ विप्रा वदेयुः-अस्तु परिपूर्णम् ॥

अथ प्रैषात्मकपुण्याहवाचनम्[1] ॥ स्वपुरतः पञ्चवर्णैः अष्टदलं कृत्वा तत्र भूमिं स्पृष्ट्वा-ॐ मही द्यौः पृथिवी च नऽ इमं यज्ञम्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥८/३२॥ यवप्रक्षेपः-ॐ ओषधयः समवदन्त सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥१२/९६॥ तदुपरि कलशस्थापनम्-ॐ आजिघ्र कलशम्मह्या त्वा विशन्त्विन्दवः ॥ पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः ॥८/४२॥

---

१ कर्मान्ते पुण्याहवाचननिर्णयः पुण्याहवाचनसूत्रम्—पुण्याहवाचनमृद्धिपूर्तेष्वृद्धिर्विवाहान्तापत्यसंस्कारः प्रतिष्ठोद्यापनादि पूर्तं तत्कर्मणश्चाद्यन्तयोः कुर्यात् तथा च शौनकः—स्वस्तिवाचनमेवं तु सर्वेषामृद्धिकारकम् । आदावन्ते च कर्तव्यमिति यज्ञविदां मतम् ॥ अपरे तु-पुण्याहवाचनं शस्तमादौ स्यात् सर्वकर्मसु । कृत्वैव तद् बुधः कुर्यात् सर्वकर्माणि मानवः ॥ इत्याद्याश्वलायनवचनादादावेव कार्यमित्याहुः ॥ अत्र कुलदेशाचारतो व्यवस्था ॥



जलपूरणम्-ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्त्थो वरुणस्यऽ ऋतसदन्न्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ॥४/३६॥ गन्धप्रक्षेपः-ॐ त्वाङ्गन्धर्वाऽ अखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्माददमुच्यत ॥१२/९८॥ धान्यप्रक्षेपः-ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा ॥ दीर्घामनु प्रसितिमायुषे धान्देवो वः सविता हिरण्ण्यपाणिः प्रतिगृब्भ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोऽसि ॥१/२०॥ सर्वौषधीप्रक्षेपः-याऽ ओषधीः पूर्वा जाता देवेब्भ्यस्त्रियुगम्पुरा ॥ मनै नु बब्भ्रूणामहꣳ शतन्धामानि सप्त च ॥१२/७५॥ दूर्वाप्रक्षेपः-ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्प्परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥१३/२०॥ पञ्चपल्लवप्रक्षेपः-ॐ अश्श्वत्त्थे वो निषदनम्पर्ण्णे वो वसतिष्कृता ॥ गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम् ॥१२/७९॥ सप्तमृद्प्रक्षेपः-ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः ॥३६/१३॥ फलप्रक्षेपः-ॐ याः फलिनीर्य्याऽ अफलाऽ अपुष्पा याश्च पुष्पिणीः ॥ बृहस्प्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥१२/८९॥ पञ्चरत्नप्रक्षेपः-ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानि दाशुषे ॥११/२५॥

हिरण्यप्रक्षेपः-हिरण्यगर्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्म्मै देवाय हविषा विधेम ॥१३/४॥

रक्तसूत्रवेष्टनम्-ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः ॥ वासोऽ अग्ने विश्श्वरूपꣳ संव्ययस्व विभावसो ॥११/४०॥

पूर्णपात्रम्-ॐ पूर्ण्णा दर्वि परा पत सुपूर्ण्णा पुनरापत ॥ वस्नेव विक्रीणावहाऽ इषमूर्ज्जꣳ शतक्रतो ॥३/४९॥

वरुणावाहनम्-ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा नऽ आयुः प्रमोषीः ॥२१/२॥ अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि ॥

प्रतिष्ठापनम्-ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टं यज्ञꣳ समिमन्दधातु ॥ विश्श्वे देवासऽ इह मादयन्तामोँ३म्प्रतिष्ठ ॥२/१३॥ ॐ वरुणाय नमः चन्दनं समर्पयामि । इत्यादिपञ्चोपचारैः सम्पूज्य तत्त्वायामीति पुष्पाञ्जलिं समर्प्य अनेन पूजनेन वरुणः प्रीयताम् ॥ अनामिकया कलशं स्पृष्ट्वा अभिमन्त्रयेत्-कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥
गायत्र्यादिभ्यो नमः इत्यनेन पञ्चोपचारैरभ्यर्च्य कलशं प्रार्थयेत्–देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ
विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठन्ति भूतानि यतः काम-
फलप्रदाः। त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेत-
हाराय सुमङ्गलाय। सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक। पुण्याहवाचनं
यावत्तावत्त्वं सन्निधो भव॥ ततो यजमानः युग्मविप्रान् गन्धमाल्यवस्त्रदक्षिणादिभिः सम्पूज्य तान् उदङ्मुखानुपवेश्य पूजितकलशं
कराभ्यामालभ्य–मम गृहे ॐ पुण्याहंभवन्तो ब्रुवन्तु॥विप्राः–ॐपुण्याहम्॥ॐपुण्याहं भवन्तो ब्रुवन्तु॥ विप्राः–ॐ पुण्याहम्॥ॐ पुण्याहं
भवन्तो ब्रुवन्तु॥विप्राः–ॐ पुण्याहम्॥ममं गृहे ॐ स्वस्ति भवन्तो ब्रुवन्तु॥ विप्राः–ॐस्वस्ति॥मम गृहे ॐ स्वस्ति भवन्तो ब्रुवन्तु॥ विप्राः–
ॐस्वस्ति॥मम गृहे ॐ स्वस्ति भवन्तो ब्रुवन्तु॥ विप्राः–ॐ स्वस्ति॥मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु॥विप्राः–ॐ ऋद्ध्यताम्॥मम गृहे
ॐ ऋद्धिं भवन्तो ब्रुवन्तु॥ॐ ऋद्ध्यताम्॥मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु॥ॐ ऋद्ध्यताम्॥इति पुण्याहं वाचयित्वा मन्त्राशिषो गृहीत्वा–
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥ ॐ विष्णवे नमः॥ॐविष्णवे नमः॥ॐविष्णवे नमः॥ ततो ब्राह्मणान् भोजयित्वा दीना-
ननाथांश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः सन्तुष्टो हविष्यं भुञ्जीत॥इति सग्रहमखशालाकर्मपूर्वकवास्तुशान्तिप्रयोगः॥

१ संक्षिप्तपुण्याहवाचने तु कल्याणं श्रीश्चेति द्वयोर्वाचनं नोक्तं तदाह रूपनारायणीये मदनरत्ने च बौधायनः–पुण्याहं स्वस्ति ऋद्धिरित्योंकारपूर्वकं त्रिस्त्रिरे-
कैकामाशिषो वाचयेत् ॥ एकैकमिति पुण्याहादिभिः संबद्ध्यते। एकैकमित्यस्यान्तरमाशिष्यमिति शेषः। तथा च पुण्याहादिरूपामेकैकामाशिषं त्रिस्त्रिर्वाचयेदित्येव-
माशिषो वाचयेदिति वाक्यार्थः ॥ २ यजमानेनान्वारब्ध आचार्यो यदि पुण्याहं वाचयेत्तदा ममास्य यजमानस्य गृहे इति वाच्यम् ॥ ३ ॐकारपूर्वकं तु ब्राह्मण-
जातीययजमानमात्रविषयं तत्राह यमः–पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते। एतदेव निरोंकारं कुर्यात्क्षत्रियवैश्ययोः॥ सोंकारं ब्राह्मणे कुर्यान्निरोंकारं महीपतौ।
उपांशु च तथा वैश्ये स्वस्ति शूद्रे प्रकीर्तयेत् ॥



## वास्तुशान्तिसाहित्यनी यादी.

| | | | | | |
|---|---|---|---|---|---|
| श्रीफल ६, सुकुं श्रीफल १ | नाडाछडीनां बंडल ४ | कोपरूं शेर ०। | बदाम मगज शेर ०। | वज तोलो०।, चंपो तोलो०। | प्रत्येकमां–- सुवर्ण, हीरो, |
| सोपारी सफेत शेर २॥ | अगरवत्ती तोला ५ | काजु शेर ०॥ | घहुंला तोलो ०॥ | नागरमोथ तोलो ०। | नीलम,प्रवाल,मोतनिाखवानां |
| कुंकु शेर ०। | दशाङ्ग[1] धूप छूटो तोला ५ | जरदालु सेर ०॥ | सरशव नवटांक | ए दश वस्तु कुटीने राखवी | कंसाराबाजारसाहित्य– |
| अत्तर बे आना भार | कर्पूरगोटी बंडल ३ | अंजीर सेर ०॥ | सुगंधीवालो नवटांक | [3]सात जातनी माटीनी विगत | मुख्यकलशाराधन, |
| गुलाल शेर ०॥ | सुखडनां छोडां नवटांक | एलची तोलो १ | सर्वौषधी माटे--कुष्ठ[2] तोलो०। | १घोडालनी,२हस्तिस्थाननी, | पुण्याहवाचन तथा ग्रहना |
| सफेत अबीर सेर ०। | चन्दनमाटे सुखडनो ककडो | लविंग तोलो १ | जटामांसी तोलो ०। | ३ राफडानी, ४ संगमनी, | ऐशानमांवरुणपूजनादिमाटे |
| रांगुली शेर २ | चन्दन घसवामाटे ओरसियो | द्राक्ष शेर ०॥ | हरदल तोलो ०। | ५ ध्रोनी, ६ राज्यस्थाननी, | त्रांबाना कलश ६ |
| कालो अबीर शेर ०। | केसरतोलो ०। | तल पाली २, जव सेर १ | दारुहरदल तोलो ०। | ७ गोशालानी, | तथा त्रांबानी तरभाणी ७ |
| मध तोलो १ | खडीसाकरसेर ०॥ | गुगल नवटांक | मोरवेल तोलो ०। | सफेत काचा सुतरनी दडी | त्रांबानी गागर १ |
| सिन्दुर नवटांक | खांडसेर ०॥, गोलसेर ०॥ | पस्ता शेर ०। | शिलाजीत तोलो ०। | नंग २ | त्रांबानुं अर्घपात्र १ |
| दळेली हरदल सेर ०॥ | खारेक सेर ०॥ | कपुरकाचली तोलो १ | चन्दन तोलो ०। | [4]पञ्चरत्ननां पडीकां ५ ते | आज्य[5]स्थाली, चरु[6]स्थाली |

१ दशाङ्गधूपः मदनरत्ने–षड्भागकुष्ठं द्विगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः। हरीतकी सर्जरसं समांशं दर्पैकभागं त्रिलवं शिलाजम्॥ घनस्य चत्वारि पुरस्य
चैको धूपो दशाङ्गः कथितो मुनीन्द्रैः॥ दर्पः–कस्तूरी ॥ कुंकुमं–केशरम् ॥ लाक्षा–लाख ॥ नखं–नखला ॥ सर्जरसः–राळ ॥ घनः–नागरमोथ ॥ पुरः–गुग्गुल इति प्रसिद्धः॥
२ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने। वचाचम्पकमुस्ते च सर्वौषध्यो दश स्मृताः॥ ३ अश्वस्थानाद्गजस्थानाद्वल्मीकात् सङ्गमाद्ध्रदात्। राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत्।
४कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्। एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः॥ ५ आज्यस्थाली रेणुः–आज्यस्थाली प्रकर्तव्या तैजसद्रव्यसम्भवा। महीमयी वा कर्तव्या
सर्वास्वाज्याहुतीषु च॥आज्यस्थाल्याः प्रमाणं च यथाकामं तु कारयेत्॥ तैजसं सुवर्णादि ॥ ६ चरुस्थाली रेणुः–मृण्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते। तिर्यगूर्ध्वं समिन्मात्रा
दृढा नातिबृहन्मुखी ॥ कुलालचक्रघटितमासुरं मृण्मयं स्मृतम्। तदेव हस्तघटितं स्थाल्यादि खलु दैविकम् ॥ औदुम्बरी ताम्रमयीत्यर्थः॥

अने पूर्णपात्र[1]माटे
त्रांबाना टोप बे शेर
चोखाचढे तेवा त्रण
कांसानी थाली बे
कांसानी वाटकी त्रण
त्रांबानी मोटी तरभाणी १
त्रांबानो मोटो वाटको १
त्रांबानी आचमनी मोटी १
घंटा १, आरती पीतलनी १

धूप करवानुं पात्र १
दीपमाटे त्रांबानां कोडियां बे
रंगुलीपुरवानुं यंत्र पित्तलनुं
जनोइना जोटा १५

**सोनीनो सामान–**
सोनानी वास्तुमूर्ति १
सर्पाकार ध्रुवनी मूर्ति १
नवग्रहनी सोनानी १
सोनानी सळी एक बे इंचनी

**कापड बाजारसाहित्य–**
ग्रह तथा ब्रह्मादिना स्थापन
माटे सफेतमलमल वार ४
गणपती तथा मातृका स्थापन
माटे लाल कापड वार बे
पीलुं कापड वार १
लीलुं रेशमी वार १
गुलाबी रेशमी वार १
समग्रग्रहोमाटे एकजवस्त्रतथा
उपवस्त्र अर्पण करवुं होयतो

मुकटो एक
रेशमी ककडो श्वेत एक
अथवा धोतीयुं एक
अने खेस एक
लाल रेशमी वार ०॥
स्थण्डिल वा कुण्डमाटे माटी
टोपली ४, इट १००
गायनुं दूध सेर ०।
गायनुं दहीं सेर ०।
गायनुं घृतनवटांक

**पञ्चगव्यनी[2] विगत--**
लालगायनुंमूत्रआठमासा
श्वेतगायनुंछाणसोलमासा
पीलीगायनुंदूधबारमासा
कालीगायनुंदहिंबारमासा
कालीगायनुंघृतआठमासा
जोजूदाजूदारंगवाली गायोनां
मूत्रादि मलवां असंभवहोय
तो गमे ते गायनां लेवां
पीली, राती, काली नील
धोळी विगेरे रंगनी
धजाओ १० दस
लाकडामां खोसेली

**मोदीनो सामान–**
घृत शेर १०, घहुं पायली १
चोखा पायली २, मग शेर १
चणा शेर १, अडद शेर १
दीवडांमाटे अडदनी दाळनो
लोट शेर १

---

१ पूर्णपात्रलक्षणं रेणुः--यावतान्नेन भोक्तुस्तु तृप्तिः पूर्णैव जायते। तावता धर्मतः कुर्यात् पूर्णपात्रमिति स्थितिः॥ अन्यच्च--यवैर्वा व्रीहिभिः पूर्णं शूर्पं तत् पूर्णपात्रकम् ॥ तथा च–अष्टमुष्टिर्भवेत् किञ्चित् किञ्चिदष्टौ तु पुष्कलम्। पुष्कलानि च चत्वारि पूर्णपात्रं विदुर्बुधाः ॥ शूर्पप्रमाणम्–शूर्पं त्वरत्निमात्रं स्यादर्षीकं वैणवं तु वा। लम्बं त्वरत्निमात्रं स्यादिति यज्ञविदो विदुः॥ २ रुद्रकल्पद्रुमजपपरिच्छेदे–सुवर्णादिपात्रे पद्मपलाशादिपत्रे वा ताम्रायाः कृष्णायाः वा गोःपलमितस्याष्टमाषपरिमितस्य वा गोमूत्रस्य गायत्र्या ग्रहणम् ॥ गन्धद्वारामिति मन्त्रेण श्वेताया गोः अंगुष्ठार्धमितस्य षोडशमाषपरिमितस्य वा गोमयस्य ग्रहणम् ॥ आप्यायस्वेति ताम्रायाः हेमवर्णाया वा गोः सप्तपलस्य द्वादशमाषमितस्य वा गोमयाष्टगुणस्य गोमूत्रत्रिगुणस्य वा क्षीरस्यादानम् ॥ दधिक्राव्ण इति रक्तायाः कृष्णवर्णाया वा गोस्त्रिपलस्य दशमाषमितस्य गोमयात्पञ्चगुणस्य गोमूत्रद्विगुणस्य वा दध्नोग्रहणम् ॥ तेजोसीतिमन्त्रेण कपिलाया वा गोरेकपलस्याष्टमाषमितस्य वा गोमयचतुर्गुणस्य वाज्यस्य ग्रहणम् ॥ देवस्यत्वेत्यादिकेन पूष्णोहस्ताभ्यां गृह्णामीत्यन्तेन मन्त्रेण पलमितस्य चतुर्माषमितस्य वा कुशोदकस्य ग्रहणम्। गोमूत्रादिकापिलं वा ग्राह्यं अलाभेगव्यमात्रम् ॥

---

कुशनुं जल चारमासा
चोखापाली एक, घहुंशेर बे
दीवडांमाटे घहुनोलोटशेर १
वरी एटले साळ शेर १
चीणो शेर १

**फुरूट बाजारसाहित्य–**
सफत कुष्माण्ड १
लीलीद्राक्षसेर ०।
शेरडी ककडो १

लीली सोपारी एक
नारंगी ( संतरां ) ३
जंबीरएटलेएकजातनुं
लांबुफल १
जामफल २
बिजोरुं १ केलांसोनेरी बार
दाडिम ३ मोसंबि ३
सफरचंद ३
ऋतुप्रमाणेबीजांफलो एकएक

**मालीनो सामान–**
केलना स्थंभ ४
बीलीनां फल ५
माटिनां कोडियां बे

**पञ्चपल्लवनी[1] विगत-**
पीपलानां पान १०
उंबरानां पान १०
पिपरीनां पान १०
तोरणमाटे आंबानांपान १००
वडनां पान १०
नागरवेलनां पान ५०

**समिधनी[2] विगत–**
आकडानी समिध ३०
खाखरानी समिध १११
खेरनी समिध ३०
अघाडानी समिध ३०
पिपलानी समिध ३०
उंबरानी समिध ३०
शमीनी समिध ३०
दूर्वाना जुडा २
दर्भनो मोटो जुडो १
छुटां पुष्प टोपली एक नीचे
मुजब--
गुलाब, मोगरो, जावेल,
कमल, चंपक, बकुल,
सेवती, कणेर, विगेरे
पुष्पो टोपली १
पुष्पोना हार १५
तुलसी एक आनानी
बीलीपत्र एक आनानां

**प्रकीर्ण सामान–**
वांसनी छाबडी १
वांसनी भूंगळी (फूंकणी) १

---

१ पञ्चपल्लवाः ब्राह्मे–अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः। पञ्चभङ्गा इति प्रोक्ताः सर्वकर्मसु शोभनाः ॥ २ ग्रहसमिधः–अर्कः पालाशखदिरावपामार्गोथपिप्पलः। उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ अलाभे तु प्रकर्तव्या सर्वेपालाशजाः शुभाः ॥ यस्य यस्य ग्रहस्य या या समित् सा सा तस्यतस्याधिदेवतानां प्रत्यधिदेवतानां चेति कैश्चिदुक्तमस्ति तथापि कल्पद्रुमकारैस्तु अधिदेवताप्रत्यधिदेवतापञ्चलोकपालवास्तुक्षेत्रपालदिक्पालदेवतानां पालाशसमिद्भिरेव होम उक्तः तथैवानुसृतमस्माभिः ॥ अत्र सामित्संख्या अष्टाष्टपक्षाश्रयेण यत्रान्यत्पक्षाश्रयेण होमः तत्र समित्संख्याद्यधिकाज्ञेया ॥ समिद्धोमसंख्या–ग्रहान्प्रत्येकं प्रतिद्रव्यं अष्टोत्तरशतमष्टाविंशतिरष्टौ वा आहुतीनां संख्या। यदाग्रहाणामष्टोत्तरशतं तदा अन्येभ्योऽष्टाविंशतिः। यदाग्रहाणामष्टाविंशतिस्तदाऽन्येभ्योऽष्टौ ॥ यदाग्रहाणामष्टौ तदाऽन्येभ्यश्चतस्रः द्वौ इति संप्रदायः ॥ वसिष्ठः–यदिग्रहाणामष्टौस्यादधिप्रत्यधिकेषु च। चतुश्चतुर्हुनेद्धैरम्बादीनां द्विद्विसंख्यया॥ समिधां लक्षणम्-यज्ञपार्श्वे–समित्पवित्रं वेदश्च त्रयः प्रादेशसम्मिताः॥ छन्दोगपरिशिष्टे कात्यायनः–नाङ्गुष्ठादधिका कार्या समित्स्थूलतरा क्वचित्। नवियुक्तत्वचा चैव न सकीटा न पाटिता ॥ प्रादेशान्नाधिका नोना न तथा वै द्विशाखिका। न सपर्णासमित्कार्या होमकर्मसु जानता ॥ स्मृत्यर्थसारे–सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्तथा। शस्ता दशाङ्गुलास्तास्तु द्वादशाङ्गुलिकास्तु वा। आर्द्राः पक्वाः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः। अपाटिताश्चाद्विशाखाः कृमिदोषविवर्जिताः ॥ ईदृशोहोमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥ प्रागग्राः समिधो ग्राह्या अखर्वा नैव स्फाटिताः। काम्येषु वश्यकर्मादौ विपरीता जिघांसतः ॥ विशीर्णा विफला ह्रस्वा वक्राबहुशिखाः कृशाः। दीर्घाः स्थूलाघुणैर्जुष्टाः कर्मसिद्धिविनाशकाः॥ प्रादेशमात्राः समिध अशाखा अपलाशकाः। होतव्यामधुसर्पिभ्यां दध्ना क्षीरेणसंयुताः ॥ शङ्खः–समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ॥ शूद्रानीतैः क्रयक्रीतैः कर्मकुर्वन् व्रजत्यधः ॥ संस्काररत्नमालायाम्–यज्ञाद्यर्थं शूद्रादिभिराहृतानां दर्भसमिधादीनां पवमानानुवाकेन प्रोक्षणाच्छुद्धिः ॥

| | | | | | |
|---|---|---|---|---|---|
| स्रुक्¹, स्रुवे², प्रणीता³, प्रोक्षणी⁴, | वरणीना विप्रो सात | टुवाल ७ आसन ७ | ग्रह, मातृका तथा ब्रह्माना | वरणीना विप्रोमाटे दूध | पाणी उपरनीशेवालतोलो १ |
| खातमां पूरवामाटे एक इटमां | अथवा श्रद्धाप्रमाणे, ते | छाणां १२ तथा होम माटे | स्थापन माटे लाकडाना | बरफी, जांबु, पेंडा, कोपरा | खेरना शंकु ४ |
| खाडो कराववो | प्रत्येकमाटे वरणसाहित्य-- | खेरनां, डबल फोडेलां | बाजठ ३ | पाक इत्यादि | बलिदान माटे शीरो तथा |
| बत्तीमाटे कापुस, पैसा २ नुं | धोतीयां ७ खेस ७ | सरपण बोजो ०॥ | यजमानादिने बेसवा माटे | कुण्डवेदीमाटे कडियो | वाफेल चणा |
| कांडिनुं बाकस १ | गोमुखी ७ मालारुद्राक्षनी ७ | वरणीना ब्राह्मणो माटे | पाटला ४ | बेगारी. | गोमूत्र लोटो १ |
| दडियापुडा २ | पंचपात्र ७ तरभाणी ७ | कर्मसमाप्तिये भोजन | पाटलापर बिछावा गालिचा, | तेल शेर ०। | गायनुं छाण दडियो १ |
| पत्रावलीपुडो १ | अर्घपात्र ७ आचमनी ७ | अथवा सीधां. | कंबल अथवा दर्भासनो. | | |

१ स्रुक्लक्षणं कात्यायनः–बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिलाह ९ समुखप्रसेका मूलदण्डा भवन्ति । त्रिः प्रादेशो बाहुः । प्रसृताङ्गुलिः पाणिरामणिबन्धनाद्धस्तः उच्यते । तन्मात्रं पुष्करं भवतीत्यर्थः । कारिकायां तु–षड्त्रिंशाङ्गुलदीर्घास्रुक्कारयेत्खादिरादिभिः । कर्दमे गोपदाकारा पुष्करं तद्वदेवहि। पुष्कराग्रं षडंशं तु खातं द्व्यङ्गुलविस्तृतम्॥ अङ्गुष्ठैकं स्थूलतरे दन्ते तस्य च कंकणम् । २ स्रुवमाह कात्यायनः–खादिरस्रुवः ॥ अरत्निमात्रस्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः ॥ यज्ञपार्श्वे–अङ्गुष्ठपर्ववृत्तश्चारत्निमात्रः स्रुवो भवेत ॥ पुष्करार्द्धंभवेत्खातं पिण्डकार्द्धं स्रुवस्तथा । पिण्डकार्द्धं मुष्टयर्द्धमित्यर्थः । ३ प्रणीतालक्षणं रेणुः–द्विषडङ्गुलदीर्घश्च तदर्द्धेन तु विस्तृतः । चतुरङ्गुलखातस्तु मूलदण्डो विकङ्कतः ॥ प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेत् ॥ चमसलक्षणं यज्ञपार्श्वे–चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः । त्र्यङ्गुलं तु भवेत्खातं विस्तारे चतुरङ्गुलम् ॥ विंशत्यङ्गुलदीर्घत्वामिति यज्ञविदो विदुः ॥ ४ प्रोक्षणीपात्रलक्षणम्॥ रेणुः--वैकङ्कतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते । हंसवक्त्रप्रसेकं च त्वग्बिलं चतुरङ्गुलम् ॥ ग्रहवेदीमाहमत्स्यपुराणे–गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् । वप्रद्वययुतां वेदीं वितस्त्युच्छ्रायसंयुताम् ॥ स्थापनाय च देवानां चतुरस्रामुदक्प्लवाम्॥ गर्तस्य कुण्डस्येत्यर्थः ॥ उत्तरपूर्वेण ईशानभागे इत्यर्थः॥ वप्रद्वयं नाममेखलाद्वयं तत्र द्व्यङ्गुलोच्छ्रायः प्रथमवप्रः त्र्यङ्गुलोच्छ्रायो द्वितीयवप्रः विस्तारस्तुद्वयोरप्यङ्गुलपरिमितः॥अत्र प्रकारान्तरं वसिष्ठः–कुण्डस्यरुद्रदिग्भागे द्विहस्तंपीठमाचरेत । किञ्चिन्मध्योन्नतं कुर्यादुच्छ्राये द्वादशाङ्गुलम् ॥ त्रिशाङ्गुलं प्रकर्तव्यं ह्यन्तरं कुण्डपीठयोः । वस्त्रेणाच्छाद्यतत्पीठं तत्प्रमाणेन धीमता ॥ तत्र चाष्टदलं पद्मं कुर्याच्छ्रेष्ठैः सिताक्षतैः ॥



ग्रन्थकर्तृप्रशस्तिः—क्षेत्रं हि भारतेऽस्मिन्महत्सुपुण्यं चकास्ति सिद्धपुरम्। कपिलाश्रमविख्यातं यत्र प्राची सरस्वती वहति ॥ मुक्ता च देवहूतिर्यस्मिन्स्नानं सुवर्णदानं च । श्राद्धं मातृगयाख्यं भवरयगणितं कृतं सर्वम्॥यस्मिन्नुत्तरखण्डान्मन्त्रदृशो मूलराजभूपतिना । आहूता हि सहस्राधिकषोडशवाडवाः सुविख्याताः॥ तेभ्येकविंशतिभ्यो विप्रेभ्योऽदायि सिद्धपुरमेतत् । सर्वोपस्करयुक्तं तथैकविंशतिपदानि दत्तानि॥दत्तं प्रथमं पदकं द्विवेदिने भार्गवाय पुत्राय। द्वैतीयिकं तु दत्तं द्विवेदिने भार्गवाय पित्रे च ॥ दत्तं पदं तृतीयं कौशिकगोत्राय पण्डितायाथ । दत्तं पदं चतुर्थं त्रिवेदिने दाल्भाय गोत्राय ॥ पञ्चमपदकं गौतमगोत्रायाथ द्विवेदिने दत्तम् । दत्तं षष्ठं पदकं वत्ससगोत्राय ठक्कुरायाथ॥सप्तमपदकं दत्तं द्विवेदिपाराशराय मन्त्रदृशे । अष्टमपदकं दत्तं चोपाध्यायाय काश्यपायाथ॥ दत्तं नवमं पदकं भारद्वाजद्विवेदिने सुमहत् । दशमं पदकं दत्तं शाण्डिल्याय द्विवेदिने चाथ ॥ एकादशं च पदकं शौनकगोत्राय पण्डितायाथ । दत्तं द्वादशपदकं त्रिवेदिने वै वसिष्ठगोत्राय ॥ मुख्यं त्रयोदशपदं मौनसगोत्राय ठक्कुरायाथ ।.तद्वच्चतुर्दशपदं याज्ञिकविप्राय गर्गगोत्राय॥पञ्चदशं वै कुच्छसगोत्रायाथ द्विवेदिने पदकम्।उद्दालकगोत्राय षोडशपदकं द्विवेदिने दत्तम्॥कृष्णात्रिगोत्रिणे वै द्विवेदिने तत्र सप्तदशपदकम् । अष्टादशं पदं वै कौण्डिन्याय द्विवेदिने दत्तम्॥ एकोनविंशतितमं पण्डितमाण्डव्यगोत्रिणे दत्तम् । विंशतितमं पदं यच्चोपाध्यायौपमन्यवायाथ ॥ राज्ञा प्रसन्नमनसा विप्रवराय द्विवेदिने चाथ । श्वेतात्रिगोत्रिणे वै तथैकविंशतितमं पदं दत्तम् ॥ तेषां मुख्यतमे श्रीठक्कुरसंज्ञे त्रयोदशे पदके । शुक्ले यजुषि श्रेष्ठे माध्यन्दिन्यां वाजसनेय्यां च ॥ धाराम्बा कुलदेवी यस्य गणेशो महोदराख्यश्च । वीरेश्वरश्च यक्षो महाकालभैरवः शर्म विष्णुः ॥ तादृङ्मौनसगोत्रे मौनसवैतानहव्यसावेति । प्रवरत्रयसंयुक्ते गणको गोविन्दरामशर्माऽभूत ॥ गणितादित्रिस्कन्धज्योतिःशास्त्रज्ञ एव यः प्रथितः । ज्ञानादियुतो ज्योतिषवैद्यकसद्धर्मशास्त्रनिष्णातः तस्य भाईशङ्करनामा तस्य सुतः शास्त्रवित्सुजनसेव्यः ॥ तत्तनय उमाशङ्कर आस्तिक्यप्रभृतिविप्रगुणयुक्तः । श्रीवालुकेशसंस्कृतपाठगृहाध्यापकप्रधानेन । सिद्धपुरे संवसता ग्रन्थः सुतोऽहं दुर्गाशङ्करशास्त्री स्वयं सुविख्यातः । श्रीब्रह्मचारिपदभृद् यस्य गुरुर्देवचेतनानन्दः ॥ इत्येवमर्थयेऽहं दुर्गाशङ्करसुधीर्विभुं नित्यम् ॥ संयोजितो मया चायम् ॥ भूयात्तु वास्तुशान्तिर्ह्युपयुक्तः कर्मकाण्डिविप्रेभ्यः ।

१ ब्रह्मकर्मसमुच्चयः–यजुर्वेदी विप्रोए अवश्य संग्राह्य छे. मूल्यमात्र रु. बे २
२ ग्रहशान्तिप्रयोगः–मूल्य रु. १–०–० रुपैयो एक.
३ रुद्रस्वाहाकारसमुच्चयः–मूल्य रुपैयो १॥ एक रुपयो आठ आना
४ उपयुक्तमन्त्रसमुच्चयः–४२५ मन्त्राः सन्ति. मूल्यमेकोरूप्यकः १
५ हवनात्मकशतचण्डीप्रयोगः (अपूर्णः पत्र१०८फार्म१८)मू०रू०१–२
६ हवनात्मकविष्णुयागप्रयोगः–(अपूर्णः पत्र८४फार्म१४) मू०आ. १४
७ हवनात्मकमहारुद्रप्रयोगः–(अपूर्णः पत्र११४फार्म१९)मू०रू० १–३
८ वैदिकवास्तुशान्तिप्रयोगः– मूल्यम् रूपकः १ रुपैयो एक.
९ यजुर्वेदरुद्राष्टाध्यायी–मूल्यम् आणकाः षट् ६.
१० यजुर्वेदरुद्राष्टाध्यायी–डेमी १२ पेजी मूल्यम् आणकाः षट् ६.
११ वैदिकसर्वपूजा श्रीसूक्तं यजुर्वेदीयरुद्राष्टाध्यायी मृत्युञ्जयजपविधिश्च—मूल्यम् आणकाः चत्वारः ४.
१२ पुराणोक्तसर्वपूजा शिवमहिम्नःस्तोत्रसहिता–मू. आणकाः चत्वारः ४
१३ पुराणोक्तसर्वपूजा—मूल्यम् आणकाः त्रयः ३.
१४ ज्योतिषविभागः–जातकालङ्कारः—मूल्यम् रूप्यकौ द्वौ २.
१५ ग्रहगोचरज्योतिषम्—मूल्यमाणकौ द्वौ २.

प्राप्तिस्थानम्—श्रीवालुकेश्वरसंस्कृतवैदिकपाठशाला, पोस्ट मलबार हिल, मुंबई नं० ६.